# सुलभ चरित्राणि

## विविध महापुरुषोना चरित्रो



संपादक-संशोधक

पंन्यासप्रवर श्री वज्रसेनविजयजी

शिवमस्तु सर्वजगतः ।

परमात्मने नमः ।

श्री दान-प्रेम-रामचंद्र-भद्रंकर सद्‌गुरुभ्यो नमः

पूर्वाचार्य विरचितानि

# सुलभ-चरित्राणि


• संपादक •

पंन्यासप्रवर श्री वज्रसेनविजयजी गणिवर्यः



• प्रकाशक •

भद्रंकर प्रकाशन

शाहीबाग, अहमदाबाद-३८०००४

संपादक परिचय

परम पूज्य कलिकाल कल्पतरुगच्छाधिपति आचार्यदेव
श्रीमद् विजयरामचन्द्रसूरीश्वर शिष्यरत्न,
परमपूज्य अध्यात्मयोगी, पंन्यासप्रवरश्री
भद्रंकरविजयजीगणिवर्य शिष्यरत्न,
प्रशान्तमूर्ति पू. आचार्यदेव
श्रीमद् विजयकुंदकुंदसूरीश्वर शिष्यरत्न
पंन्यासप्रवर
श्री वज्रसेनविजयजी गणिवर्यः

●

प्राप्तिस्थान

पार्श्वनाथ पुस्तक भंडार
तलेटी रोड, पालीताणा
फोन ( ०२८४८ ) २५३३२३

सरस्वती पुस्तक भंडार
रतनपोल हाथीखाना
अहमदाबाद-३८०००१

तृतीय आवृत्ति
संवत - २०६७

मूल्य १०-००

● मुद्रक ●
वर्धमान पुस्तक प्रकाशन
शाहीबाग, अहमदाबाद-३८०००४

## देव-गुरु वंदना

परम कृपालु, देवाधिदेव तीर्थंकर परमात्माने
कोटी कोटी वंदना

## • दिव्य कृपा •

परमपूज्य, कलिकाल कल्पतरु, आचार्यदेव
श्रीमद् विजयरामचंद्रसूरीश्वरजी महाराजा....!

परमपूज्य अध्यात्मयोगी पंन्यासप्रवरश्री
भद्रंकरविजयजी गणिवर्यश्री....!

परमपूज्य, प्रशान्तमूर्ति आचार्यदेव श्रीमद्
विजयप्रद्योतनसूरीश्वरजी महाराज....!

परमपूज्य, प्रसन्नमूर्ति आचार्यदेव श्रीमद्
विजयकुंदकुंदसूरीश्वरजी महाराज....

परमपूज्य, हालाररत्न, मुनिराजश्री
महासेनविजयजी महाराज....!

## • आशीर्वाद •

परमपूज्य गच्छाग्रणी, आचार्यदेव
श्रीमद् विजय सुदर्शनसूरीश्वरजी महाराज,
परमपूज्य तपस्वी सम्राट् आचार्यदेव
श्रीमद् विजय राजतिलकसूरीश्वरजी महाराज,
परमपूज्य गच्छाधिपति आचार्यदेव
श्रीमद् विजय महोदयसूरीश्वरजी महाराज

# પ્રકાશકીય

સ્વાધ્યાયથી સિદ્ધિ....!

આપણા પૂર્વાચાર્ય ભગવંતોએ શાસ્ત્રોમાં ઉલ્લેખ કર્યો છે 'સ્વાધ્યાય દ્વારા આત્મા સિદ્ધિની પ્રાપ્તિ કરે છે.'

એ શાસ્ત્રવચનોને લક્ષ્યમાં રાખીને....સ્વાધ્યાયની લગનીપૂર્વક પોતાની નાદુરસ્ત તબીયત હોવા છતાં પરમપૂજ્ય પંન્યાસ શ્રી વજ્રસેનવિજયજી ગણિવર્યને જે પ્રાચીન ગ્રંથોનું તથા સાથો-સાથ પરમપૂજ્ય, પરમોપકારી, અધ્યાત્મયોગી, પરમ ગુરુદેવ પંન્યાસ પ્રવર ભદ્રંકર વિજયજી ગણિવર્યશ્રીનાં ચિંતનો-લેખો-પત્રો આદિનું સંપાદન - સંકલન કરીને સંઘ સમક્ષ મૂકીને સાધુ-સાધ્વીજી ભગવંતોને સ્વાધ્યાય-અભ્યાસની તક આપી રહ્યા છે. તેમજ શ્રાવકોને અણમોલ ચિંતનોના વાંચન દ્વારા તેમના આત્માને શુભભાવનાઓ દ્વારા ભાવિત કરાવી વિકાસ સધાવી રહ્યા છે....

એમાં આ "સુલભ ચરિત્રાણિ" ગ્રંથ એટલે પૂર્વાચાર્ય ભગવંતોના ચરિત્રો જે સંસ્કૃત બુકના અભ્યાસ પછી સંસ્કૃત-વાંચનમાં ઉપયોગી વાંચન તરીકે પુરવાર થયા છે....

આ બીજી આવૃત્તિમાં લાભ લેનાર દાતાઓની અમે અનુમોદના કરીએ છીએ.

ઉપકારી સાધુ-સાધ્વીજી ભગવંતોના પઠન-પાઠન માટે ઉપયોગી આ ગ્રંથને પ્રકાશન કરતાં આજે આનંદ અનુભવીએ છીએ....

આવા અન્ય ઉપકારક ગ્રંથોના સંપાદન દ્વારા પૂજ્ય પંન્યાસ શ્રી વજ્રસેનવિજયજી ગણિ હજુ પણ શ્રી સંઘ ઉપર ઉપકાર કરતા રહે તેવી શાસનદેવને પ્રાર્થના કરીએ છીએ....

પ્રાંતે આ ગ્રથના અધ્યયન દ્વારા મુમુક્ષુઓ આત્મ કલ્યાણકારી સર્વ સુખના ભોક્તા બને એજ અપેક્ષા સાથે....

શ્રી ભદ્રંકર પ્રકાશન

## સૌજન્યદાતા

- પૂ.આ.શ્રી રત્નસેનસૂરીશ્વરજી મ.સા.ની
પ્રેરણાથી શ્રી શ્વેતાંબર સંઘ ટ્રસ્ટ
મુ. કરજત (મહારાષ્ટ્ર)

- શ્રી સારંગપુર તળિયાની પોળ
જૈન સંઘ. - અમદાવાદ

- શ્રી અભિનવ જૈન શ્વેતાંબર
મૂ.પૂ. સંઘ - ડી. કેબીન,
સાબરમતી - અમદાવાદ

# पुरोवचनम्....!

पुष्पमेकम्भवेद् वानेकं,

तत्कदाप्यात्मीयकर्त्तव्यतः पराङ्मुखम् नैव भवति, स्वीयपरिमलं सदा सर्वतः प्रसारयत्येव यावन्निजास्तित्वम्। महापुरुष-गुणगीत्यव-सरेऽप्येवम्, रे तेनाप्यधिकमवश्यमाख्येयमेव।

अन्वात्मीयास्तित्वमपि स्वगुणगरिम्णस्सुगन्धन्ते तु सदा सर्वत्र प्रसार यन्त्येव।

पुष्पपरिमलं खलु परहेतवे,

धूपसुगन्धमपि परस्मै,

चन्दनशैत्यमपि परोपकाराय,

नदीवहनमप्यनात्मीयाय....

तथैव

महताञ्जीवनमपि परार्थाय-परमार्थायैव सञ्जातमस्ति ! साम्प्रतकाले यदा-मनो-मानव-तद्गृहाणि लघूभवन्ति तदा भूतपूर्वाणामेषाम्महर्षीणां संस्मरणा-गुणगीतिश्च नूनङ्किञ्चिदधिकर्णमाचष्टे एव।

## कृतेस्सृष्टिः

यथा-विकीर्णेभ्यः पुष्पेभ्यस्सकाशाद्राशीभूतम्पुष्पवृन्दम्रमणीयतम-माभाति स्वप्रभावम्प्राविर्भावयति।

तथा-महापुरुषाणाञ्जीवनकवनानि बहुशो बहुभिः कृतिभिः पठितानि, श्रुतानि चाथाध्ययनपद्धत्या एकस्मिन्सूत्रे (ग्रन्थे) पठन-पाठनार्थञ्चापि किञ्चित्करणीयमेव।

प्रस्तुतपुस्तिकायास्सम्पादकाः पूज्यपाद-पंन्यासश्री-वज्रसेनविजयजी गुरुवर्याश्चिरकालेनैतादृश्याः कस्याश्चिदनुपमायाः कृत्याः सृष्टयर्थम् समुत्सुका आसन्नेव । तावत्पुनर्यथा प्रकाशाय घृत-वर्ति-विद्युच्छलाकापात्रेषु प्राप्तेषु एतत्कार्यम् सुकरम्भवेत्तथा पूज्यपादानामन्तस्थलस्येयमुरभावनाऽपि योग्य-सहायकर्तृभिस्सफलीभवेदिति अज्ञायि ।

धर्मनगरी-पत्तनस्थितबहुश्रुतसम्पन्न-पण्डितश्री-चन्द्रकान्त-महोदयस्य सूक्ष्मेक्षिका, श्री डीसा-सङ्घस्यार्थिक-सम्पूर्ण-सहायश्चेति प्रेरकालम्बनेन सम्पादकपरमर्षिर्न केवलन्निश्चितः किन्तूत्कण्ठितऽप्यबोभूयत ।

## विषयप्रवाहेऽवगाहनम्

अधुना यदा विज्ञानधर्मम्पुरस्कृत्य विकासस्यमिषेण प्रत्यहन्निःसीमम् वाचनम्प्रादुर्भवति तदाध्यात्मिकविकासस्यौजः प्रसारयन्ती पूर्वकालित-सत्पुरुषाणाम्प्रोज्ज्वलयशोगीतिर्न केवलं स्मृतिपथे किन्तु चिरञ्जीवकरण-स्यैकप्रयत्नरूपेण अध्ययनकक्षेऽग्रगमनकरणलक्ष्यबिन्दुनैव इयङ्कृतिरा-कृतिरूपेण निर्माप्यते ॥

श्रीप्रसन्नचन्द्रराजर्षिः, श्रीअतिमुक्तकमुनिरित्यादिमुनिप्रवराणां सुभद्रा-एवन्नर्मदासुन्दरीप्रभृति बह्वीनाम्महासतीनाङ्कथाश्रेणी अस्याम् पुस्तिकायां सङ्गृहीतास्ति ॥

यथा-अनुप्राकृतविज्ञानपाठमालाध्ययनम् एतद्विषये (प्राकृत विषये) प्रगत्यर्थम्-बालावबोधार्थञ्च "पाइअविन्नाण कहा" १-२ प्रकाशितास्ति या लघुभिःकथानकैः प्राकृतभाषाया बोधं सुकरङ्कारयति-तथैव संस्कृतभाषाया अपि प्रथमामध्यमयोः प्राथमिकाध्ययनस्य पश्चात्प्राकृतवद् बालावबोधकारिका काऽपि सुकरपुस्तिका साम्प्रतकाले प्रायोऽनुपलब्धा, इति हेतोः प्रथमामध्यम-योरध्ययनपश्चादारम्भे यन्महाकाव्यवाचनण्टीकावाचनञ्च तत्सूर्यप्रकाशे तारकगणना तुल्यमभवत् इति हेतोर्ज्ञानपिपासूनामुत्साहो मूर्तिमान्भवे-

द्वाचनपद्धतिश्च सुकरीभवेदिति हेतोश्च पूज्यपादानाम्प्रेरणया विविध-चरित्राणाङ्कथानकादीनाञ्च सञ्चयनपरिमार्जनयो: कार्यम्बहुभिर्मुनिभि: पं. श्री चन्द्रकान्त महोदयेन च जञ्जनितम् ।

प्रस्तुतपुस्ताकामादौ यत्तन्महापुरुषस्य महासत्याश्च जीवनन्तदनु तदध: टीप्पणीकायां दुर्गमशब्दा: कठीनसमासाश्च दर्शितास्सन्ति, कथानकप्रान्ते च यत्तत्कथानकस्य प्रश्ना: अभ्यासरूपेण समाविष्टास्सन्ति, येषामुत्तराणि अपि विद्यार्थीभिस्संस्कृतगिरि दातुम्प्रयतितव्यम् येन संस्कृतगिरि लेखनोच्चारण-योश्शक्ति: प्रादुर्भवेदिति ।

**पं. राजुभाई संघवी**
रीसाला जैन पाठशाला
डीसा B. K.

## सज्झायसमो तवो नत्थि

महापुरुषो फरमावे छे, के, स्वाध्याय समान तप नथी. कारण के-
स्वाध्यायथी वैराग्य पुष्ट थाय छे.
वैराग्यथी समता पुष्ट थाय छे.
समताथी समाधि प्राप्त थाय छे.
समाधिथी सद्गति प्राप्त थाय छे.
सद्गतिथी परंपराए सिद्धि थाय छे.

અધ્યાત્મયોગી પંન્યસપ્રવરશ્રી
ભદ્રંકરવિજયજી ગણિવર્ય.

# સંપાદકીય

## (પ્રથમ આવૃત્તિ)

માનવનું મન કંઈને કંઈ વિચારોમાં, ચિંતનોમાં પડ્યું હોય છે. જો સારા નિમિત્તો મળે તો સારા વિચારો કરે....ખરાબ નિમિત્તો મળે તો ખરાબ વિચારો આવે.

સારા વિચારો દ્વારા સારા પદાર્થોનું સર્જન થાય તે સહજ છે. આ નાનકડા પણ વિશાળ ગુણગરિમાંથી સમૃદ્ધ ગ્રંથના સર્જનમાં સદ્વિચાર જ કારણ બની ગયો.

સંવત ૨૦૪૪નું રાધનપુર ચાતુર્માસ પૂર્ણ કરી પરમ કૃપાળુ શ્રીશંખેશ્વર દાદાની યાત્રા કરી રાધનપુરથી ભીલડીયાજીનો છ'રિપાલિત સંઘ પૂર્ણ કરીને મારા નાના ગુરુબાંધવ હેમપ્રભવિજયના સંસારી કુટુમ્બિઓની વિનંતીથી દીક્ષા પછી સૌ પ્રથમવાર કચ્છ તરફ જઈ રહ્યા હતા.

એક દિવસ વિહારમાં મુનિ હેમપ્રભવિજય એકદમ મૌનપૂર્વક ચાલી રહ્યા હતાં, કંઈક વિશેષ ઊંડા ચિંતનમાં હોય તેમ મને લાગ્યું. પ્રશ્ન કર્યો કે આજે શું ચિંતન ચાલે છે ? અરસ-પરસના ગુરુભાઈ હોવા છતાં ગુરુ-શિષ્ય જેવા સંબંધે બંધાયેલા હેમપ્રભ મહારાજે વાત કરી કે, આજે રાત્રે વિચારો આવ્યા તેમાં થયું કે નાના-નવા સાધુ-સાધ્વીજી ભગવંતોને પ્રારંભિક પ્રયત્નોથી સંસ્કૃતની બે બુકોનું અધ્યયન તો થઈ જાય છે, પણ ત્યારપછી કેટલાકને પંડિતજી આદિ તથા વડીલોના સમયાભાવે કાવ્ય આદિ નથી થઈ શકતા તો કેટલાકને ખ્યાલ પણ નથી આવતો કે હવે શું વાંચન કરવું. તો એના વિકલ્પ તરીકે નાના-નાના ગદ્ય ચારિત્રોને શુદ્ધ કરી તેમાં આવતા અઘરા શબ્દોનો અર્થ કરી અને સમાસોને ખોલીને, સરલ કરી આપવામાં આવે તો ખૂબ ઉપયોગી થાય અને દરેક ચરિત્રમાં અંતે અભ્યાસ મુજબ પ્રશ્નો કરવામાં આવે. જેથી વાંચન દ્વારા શું સમજ્યા તે જણાવી શકે.

આ કાર્ય માટે વ્યાકરણ કાવ્યનો વિશેષ અભ્યાસ કરનાર જુદા જુદા મહાત્માઓને ચરિત્રની ઝેરોક્ષો કરાવીને મોકલી આપવી અને તેઓ જે

સુધારા વધારા કરે તે બધા મેળવીને જે સાચા હોય - અઘરા શબ્દો હોય તે એક પ્રતમાં ફાઈનલ કરીને છપાવવામાં આવે તો પહેલા પણ મહાત્માઓની જ્ઞાન આરાધના થાય અને એમના શુભભાવો ભળે અને પછીના મહાત્માઓને પણ લાભ થાય. એ રીતે જ્ઞાનભક્તિ થઈ શકે એવા વિચારો આવે છે...

એમની ભાવના સાંભળતા મને પણ આનંદ થયો કે ખરેખર આ ઉપયોગી કાર્ય છે. તે માટે પંડિતજી માણેકભાઈ, પંડિતજી અમૃતભાઈ પંડિતજી ચંદ્રકાન્તભાઈ, પંડિતજી રાજુભાઈ વગેરેની સલાહ લેતા બધા તરફથી પ્રોત્સાહન મળ્યું, પ્રતો ઝેરોક્ષ થઈ. જુદા જુદા સાધ્વીજી મહારાજોએ સંશોધન કર્યું. સાધુ ભગવંતોએ પણ એ ચરિત્રો જોયા અને પંડિતજી ચંદ્રકાન્તભાઈ તથા પંડિતજી રાજુભાઈએ પણ પોતાનાં મૂલ્યવાન સમય ફાળવીને નજર કરી.

અંતે હું દરેક ચરિત્રોને જોઈ ગયો જ્યાં જ્યાં જે જે ઉપયોગી હતું તેનો ઉમેરો કર્યો. શુદ્ધિ કરી વ્યવસ્થિત કર્યા અને ઘણા મહાત્માઓ તથા પંડિત બંધુ બેલડીના સહયોગે તૈયાર થયેલ આ ગ્રંથને છપાવવાનું નક્કી કરાયું.

ચાતુર્માસ ડીસા હતા. ડીસા સંઘ સાધુ સાધ્વીજી ભગવંતો માટે આરાધના-સ્વાધ્યાય-સંયમ-પઠન-ગોચરી-સ્થંડીલભૂમિ-દવા-ડૉક્ટરની સગવડતા આદિ ઘણાં કારણોસર અનુકૂળ હોવાથી અમારી સુંદર આરાધના સાથે શ્રીસંઘની આરાધના પણ સારી રીતે થઈ રહી હતી.

એમાં સંઘના પ્રમુખ સુશ્રાવક રમણિકભાઈ સાથે વાત થતાં તેઓએ જ્ઞાનખાતા માટે કાર્ય સૂચવવા જણાવ્યું અને કુદરતી આ સુલભ-चरित्राणि ગ્રંથનું કાર્ય ચાલતું હતું એટલે આ ગ્રંથની ઉપયોગિતા બતાવી. સુશ્રાવક રમણિકભાઈએ સંઘમાં મિટીંગમાં વાત કરતા શ્રી સંઘે ઉલ્લાસભેર આ જ્ઞાનભક્તિ માટે ભાવ દર્શાવી અમને વાત કરી "આ ગ્રંથના પ્રકાશનનો લાભ અમને મળો" એટલે અમે પણ હા પાડી અને ગ્રંથનું કાર્ય શરૂ કર્યું.

આજે આનંદ થાય છે કે પૂજ્ય ઉપકારીઓની અત્યંત અમીભરી કૃપાદૃષ્ટિથી આ કાર્ય પૂર્ણ થઈ રહ્યું છે.

આ ચરિત્રોના વાંચનમાં એ લાભ છે કે પ્રથમ તો સરલ સંસ્કૃત ભાષાનો બોધ થશે. જેથી વિશેષ વાંચનમાં પ્રગતિ થશે. ચરિત્રલેખક મહાપુરુષોના ભાવો મૂળ શબ્દોથી જાણવા મળશે. અવસરે ચરિત્રનાયકો જેવું જીવન જીવવા પ્રેરણા મળશે. ઉપરાંત પર્વોના ચરિત્રદ્વારા પર્વોની વિશેષતા તથા તેના દ્વારા લાભાન્વિત થયેલા મહાપુરુષોના જીવન વાંચીને એ પર્વો પ્રત્યે શ્રદ્ધા વધશે અને એ પર્વોની આરાધના કરવાનું પ્રેરક બળ મળશે.

ગ્રુપના વડીલો તથા પંડિતજીઓને એક નમ્ર ભલામણ....!

બાહ્ય-અભ્યંતર બન્ને દૃષ્ટિથી ઉપકારક ઉપયોગી આ ગ્રંથનાં અધ્યયન અધ્યાપન દ્વારા આપશ્રીઓ આપના ગ્રુપમાં થતા કલાસમાં આ નાનકડા ગ્રંથમાં આવેલા ૨૫ જેટલા નાના મોટા ચરિત્રોનું વાંચન કરાવીને નૂતન અભ્યાસીને વિશેષ પ્રોત્સાહિત કરશો.

હવે પછી....

આ ગદ્ય વિભાગ પછી પદ્ય તરીકે સૌ પ્રથમ ખંડાન્વય, દંડાન્વય, પદચ્છેદ, સમાસ, વિગ્રહ, અર્થ કરવાની પદ્ધતિ-સામાન્ય સરલ નિમયો દ્વારા બતાવીને સકલાર્હત્‌નું કાવ્યની રીતે સંપાદન કરીને પછી અન્ય પદ્ય ચરિત્રોનું કાર્ય કરવાની ભાવના છે. જેમાં એ ચરિત્રોમાં આવતા અઘરા શબ્દો, સમાસો ખોલવા સાથે સંધિના નિયમો કે અન્ય ઉપયોગી નિયમોનું, રૂપોનું માર્ગદર્શન આપવાનું છે.

તો આ ગ્રંથનાં અધ્યયન માટે આપ સર્વે આપના શિષ્યો-વિદ્યાર્થીઓને વિશેષ પ્રોત્સાહિત કરશો.

આપણે સૌ આવા મહાપુરુષોના જીવન વાંચન દ્વારા એ પ્રમાણેનું સુંદરજીવન જીવી મોક્ષની સાધના કરતાં કરતાં અંતે સર્વકર્મથી મુક્ત બની મોક્ષ સુખનાં અધિકારી બનીએ એ જ અભિલાષા.

શ્રી દાનસૂરિ જ્ઞાનમંદિર — પં. વજ્રસેનવિજય
અમદાવાદ

# સંપાદકીય

## (બીજી આવૃત્તિ)

ભાવના ભવનાશિની....!

આ....ઉક્તિ યથાર્થ છે.

જેવી જેની ભાવના તેવું તેનું ફળ....

શુભ ભાવના....! પરોપકાર ભાવના લક્ષ્યપૂર્વક કરવામાં આવે તો તેનું પરિણામ સુંદર, સારું અને જલ્દી આવે છે.

આવું જલ્દી સુંદર અને સારું...પરિણામ આવ્યું છે મારા લઘુ ગુરુભ્રાતાની ભાવનાનું...

પ્રથમ આવૃત્તિનાં સંપાદકીયમાં જણાવ્યા મુજબ કરેલી એમની ભાવના કેવી સફળ બની કે સેંકડો પૂજ્ય સાધુ - સાધ્વીજી ભગવંતો - પંડિતજીઓ તથા મુમુક્ષુ આત્માઓ એ સંસ્કૃત બુક કર્યા પછી વાંચનના પ્રવેશ માટે અને કેટલાંક પૂજ્ય સાધુ-સાધ્વીજી ભગવંતો વ્યાખ્યાનો માટે આ પ્રકાશનનો ઉપયોગ કર્યો છે. કરી રહ્યા છે અને જે કોઈએ બીજા પાસે આ ગ્રંથ જોયો ત્યારે અમારી પાસે મંગાવે છે....

આ પ્રકાશનની પ્રથમ આવૃત્તિ પૂર્ણ થઈ જતાં માંગ તો ચાલુ ને ચાલુ જ રહી, કારણ કે આ ગ્રંથ એક પાઠ્ય પુસ્તક જેવો ગ્રંથ હોવાથી એની માંગ રહેવાની એ વિચારીને આજે અમો ફરી બીજી આવૃત્તિનું પ્રકાશન કરી રહ્યા છીએ. જેથી અમે આપ સર્વે પુણ્યાત્માઓનાં સ્વાધ્યાયમાં નિમિત્ત બનશું તેનો અમને આનંદ છે....

હા....બીજી ભાવના હતી પદ્યવિભાગ જેમાં ખંડાન્વય, દંડાન્વય-પદચ્છેદ-સમાદ-વિગ્રહ-અર્થ વગેરેની સમજ મળે અને કાવ્યમાં પ્રવેશ થાય તેવું પ્રકાશન "સુલભ કાવ્ય પ્રવેશિકા" ના નામથી પ્રકાશિત થયું જેમાં કાવ્યના નિમયો અને પ્રેકટીકલ રૂપે....સકલાર્હત્ અને ભકતામરનું ખંડાન્વય આદિ બધું જ કરીને બતાવ્યું છે.

પોતાની રીતે આગળ વધે તે માટે સ્નાતસ્યા-મિત્રાનંદ-ચરિત્ર વગેરે ફક્ત દંડાન્વયના ક્રમ નંબર આપીને મૂકેલ છે. એ રીતે સંસ્કૃતના અભ્યાસની સાથે આગળ વાંચનમાં વિકાસ કરાવવા માટે આ પણ પાઠ્યપુસ્તક રૂપ બન્યું છે.

જે ટૂંક સમયમાં પણ ખૂબ જ પ્રચલિત બન્યું છે. ઘણા પૂજ્ય સાધુ-સાધ્વીજી ભગવંતો એનો સદુપયોગ કરી રહ્યા છે....

આવા ઉપયોગી ગ્રંથોના સંપાદન દ્વારા મહાત્માઓ સ્વાધ્યાયમાં મગ્ન બનીને જે નિર્જરા સાધી રહ્યા છે અને સાધશે....તેના અનુમોદનાના અંશરૂપ લાભથી સંતુષ્ટ બની જ્ઞાન-આરાધનાના...આનંદનો આસ્વાદ પામી આપણે સૌ પૂર્ણજ્ઞાનપદને પામનારા બનીએ.....

પં. વજ્રસેનવિજય

●●●

# संकेतसूचि

वि.-વિશેષણ
पुं.-પુંલિંગ
समा बहु-સમાનાધિકરણ બહુવ્રીહિ
ષ.तत्पु-ષષ્ઠી તત્પુરુષ
स्त्री-સ્ત્રીલિંગ
नपुं.-નપુંસકલિંગ
तृ.त.पु. } તૃતીયા તત્પુરુષ
तृ.त.
वि.पू.क- વિશેષણ પૂર્વપદ કર્મધારય
ગ.પ.પ. ગણ પરસ્મૈપદ
द्वि.तत्पु-દ્વિતીયા તત્પુરુષ
च्वि.स.-ચ્વિપ્રત્યયાન્ત સમાસ
ब.वी.
ब.स. } બહુવ્રીહિ સમાસ
બહુ.સ.
सं.भू.कृ.- સંબંધકભૂતકૃદન્ત
स.तत्पु.- સપ્તમી તત્પુરુષ
उप. तत्पु.- ઉપપદ તત્પુરુષ
द्विगु.स.- દ્વિગુ સમાહાર
व्यधि.ब.- વ્યધિકરણ બહુવ્રીહિ
वि. उत्त. क. વિશેષણ ઉત્તરપદ કર્મધારય
अव. पू. क. - અવધારણ પૂર્વપદ કર્મધારય
इ. द्वन्द्व. - ઈતરેતર દ્વન્દ્વ
हे. कृ. - હેત્વર્થ કૃદન્ત
वि.उभ.क.- વિશેષણ ઉભયપદ કર્મધારય
અવ્ય-અવ્યય
प्रादि क.- પ્રાદિ કર્મધારય
प्रा.ब.व्री. પ્રાદિ બહુવ્રીહિ
અવ. કર્મ-અવધારણ કર્મધારય
त्रि.-પુંલિંગ-સ્ત્રીલિંગ-નપુંસકલિંગ
चतु. तत्पु.- ચતુર્થી તત્પુરુષ
कु. पू. कर्म.- કુપૂર્વપદ કર્મધારય

# अनुक्रमणिका


| | |
|---|---|
| १. श्रीअभयदानोपरि दुर्भगायाः कथानकम् | १ |
| २. श्रीगजसुकुमालचरित्रम् | ३ |
| ३. श्रीप्रसन्नचन्द्रराजर्षिचरित्रम् | ९ |
| ४. श्रीअतिमुक्तमुनिचरित्रम् | १५ |
| ५. श्रीसुभूमचक्रवर्त्तिचरित्रम् | २१ |
| ६. श्रीनागदत्तचरित्रम् | २७ |
| ७. श्रीवङ्कचूलचरित्रम् | ३३ |
| ८. श्रीइलाचीपुत्रचरित्रम् | ४१ |
| ९. श्रीदामनकचरित्रम् | ४९ |
| १० धर्मप्रभावे सिद्धदत्तकथा | ५५ |
| ११. श्रीआर्द्रकुमारचरित्रम् | ६४ |
| १२. श्रीकामकुम्भकथा | ८० |
| १३. श्रीजम्बूकुमारचरित्रम् | १०५ |
| १. भवदेवपूर्वभवः | १०६ |
| २. जम्बूकुमारवृत्तान्तः | १०८ |
| ३. मधुबिन्दुदृष्टान्तः | १०९ |
| ४. अष्टादशनातरा | ११० |
| ५. महेश्वरदत्तदृष्टान्तः | ११० |
| ६. बगपामरदृष्टान्तः | ११० |
| ७. वायसदृष्टान्तः | १११ |
| ८. वानरदृष्टान्तः | १११ |
| ९. अतृप्तिदृष्टान्तः | ११२ |
| १०. मातङ्गीविद्या | ११२ |
| ११. शङ्खधमकदृष्टान्तः | ११३ |

१२. वानरदृष्टान्तः ११३

१३. तुरङ्गमदृष्टान्तः ११४

१४. विप्रपुत्रदृष्टान्तः ११४

१५. तुरगीकथा ११४

१६. मासाहसपक्षिदृष्टान्तः ११५

१७. मित्रत्रयदृष्टान्तः ११५

१८. ब्राह्मणपुत्रीदृष्टान्तः ११५

१९. ललिताङ्गदृष्टान्तः ११८

१४. श्रीचन्दनबालाचरित्रम् १२३

१५. श्रीसुभद्राचरित्रम् १३६

१६. श्रीचेल्लणामहासतीचरित्रम् १४४

१७. श्रीसत्यभामाचरित्रम् १५२

१८. श्रीनर्मदासुदरीचरित्रम् १६२

१९. श्रीअक्षयतृतीया कथा १७२

२०. श्रीचैत्रीपूर्णिमा कथा १७७

२१. श्रीमेरुत्रयोदशीकथा १८३

२२. श्रीसौभाग्यपञ्चमीकथा १९२

२३. श्रीकार्त्तिकपूर्णिमाकथा २००

२४. श्रीमौनैकादशीकथा २०७

२५. श्रीपौषदशमीकथा २१८

# सुलभ-चरित्राणि

## [ १ ]

## ॥ श्री अभयदानोपरि दुर्भगायाः कथानकम् ॥

**यो दद्यात्काञ्चनं मेरुं, कृत्स्नां[१] चापि वसुन्धराम् ।**
**एकस्य जीवितं दद्या-न्न हि तुल्यमहिंसया ॥२॥**

अतोऽभयदान-माहात्म्यख्यापनार्थं कथानकमुच्यते-

तथाहि-वसन्तपुरेऽरिदमनो राजा, तस्य पञ्च राज्यस्तासु चैका दुर्भगा, चतस्रोऽत्यन्तवल्लभाः,

एकदा चतुर्वधूसमेतो राजा निजप्रासादगवाक्षस्थो[२] नानाविधक्रीडा-विलासं कुर्वंस्तिष्ठति, तस्मिन्नवसरे एकश्चौरो राजमार्गेण नीयमानो राज्ञा सपत्नीकेन दृष्टः, स च कीदृशः ? [३]कण्ठन्यस्तरक्तकणवीरमालो[४] रक्तवस्त्र-परिधानो, रक्तचन्दनानुलिप्तगात्रः पुरस्ताद्वाद्यमानवध्यडिण्डिमः[५], इत्थं विविधविडम्बनाभिर्विडम्ब्यमानं तं चौरं दृष्ट्वा राज्ञीभिः पृष्टं, किमकार्यमनेना-कारीति, तदा एकेन राजपुरुषेण तासां पुरः कथितं, परद्रव्यापहारेण राजविरुद्ध-मनेन कृतमिति, ततः सञ्जातकृपया एकया राज्या विज्ञप्तो राजा, स्वामिन् ! यो भवता मह्यं प्राग्वरः प्रतिपन्नः सोऽधुना दीयतां, येनाहमेकदिनमुपकरोमि चौरं, तदा कथञ्चिद्राज्ञा प्रतिपन्नं तद्वचः, ततस्तया स्नानादिपुरस्सरं दीनार [६]सहस्रव्ययेन विविधवस्त्रालङ्कारैरलङ्कृतः स चौरः, ततो द्वितीया द्वितीयदिने राजानं विज्ञाप्य दीनारदशहस्रव्ययेन स सत्कृतः, ततस्तृतीयया तृतीयदिने दीनारलक्षव्ययेन स उपचरितः[७], ततश्चतुर्थ्या दीनारकोटिव्ययेन चतुर्थो दिवसोऽतिवाहितः, ततः पञ्चम्या दुर्भगया राज्या पञ्चमदिने राज्ञः समीपमागत्य विनयपूर्वकं दीनवचसा नृपो विज्ञप्तः, स्वामिन् ! मम दुर्भगाया उपरि भवदीया तादृशी कृपा नास्ति, तेन मया कदापि भवन्तो न याचिताः, अधुनाऽस्य चौरस्य जीवितदानं मया त्वां

याच्यसे, तदा राज्ञापि जीवितप्रदानपूर्वकं चौरः प्रदत्तोऽनया च तं चौरं स्वगृहे नीत्वा समान्यभोज्येन भोजयित्वा कथितं, मया तुभ्यं जीवितं प्रदत्तं, पुनश्चौर्यं मा कार्षी[८]स्ततोऽसौ हृष्टस्तदा सपत्नीभिर्हसितं नास्य त्वया किञ्चित् सुखकारि कृतं, तासां च परस्परं बहूपकारविषये विवादे सञ्जाते राज्ञा स एव चौरः समाहूय पृष्टोऽहो कया तव बहूपकारः कृतः ? इति, तेनाप्यभाणि भो महाराज ! चत्वारि दिनानि यावन्मरणभयभीतेन मया न किञ्चित्स्नान-भोजनादिसुखमज्ञायि, अद्य पञ्चमेऽहनि[९] अस्याः पञ्चम्या राज्ञ्या मुखादभयदानाकर्णनेन परमसुखमनुभूयते, अत एव तस्या उपकारः सर्वतो महान्, एतच्चौरवचः श्रुत्वा सर्वैरपि सा प्रशंसिता, पट्टराज्ञी च कृता, अतः सर्वदानानामभयदानं श्रेष्ठमिति ज्ञापितम् ।

ततः सुर्शाविकेणात्र पर्वणि खण्डन-पेषण[१०]-वस्त्रक्षालनाद्यारम्भो विवर्जनीयः, तैलिक-लोहकारभ्राष्ट्रकर्मकारकादिषु[११] वाचा धनव्ययेन चारम्भो निवारणीयः, स्वशक्त्या [१२]बन्दिमोक्षश्च कार्यः, ग्रामनगरमध्येऽमारीघोषणा कारयितव्या, येन केनापि प्रकारेण जीवरक्षा कार्या ॥

## ॥ इति अभयदानकथानकम् ॥

### : अभ्यास :

प्रश्न : १. कीदृशं चौरं दृष्ट्वा राज्ञीभिः किमप्रच्छि ?

२. कतिभी राज्ञीभिश्चौर उपकृतः ? केन प्रकारेण ?

३. सुश्रवाकेण केन प्रकारेणारम्भो वर्जनीयः ?

**१. कृत्स्न संपूर्ण. २. गवाक्ष पुं.-ઝરુખો. ३. कणवीरस्य माला कणवीर-माला । रक्त चासौ कणवीरमाला च रक्तकणवीरमाला । कण्ठे न्यस्ता कण्ठन्यस्ता । कण्ठन्यस्ता रक्तकणवीरमाला यस्य सः कण्ठन्यस्तरक्तकणवीरमालः । ( समा. बहु ) ॥ ४. कणवीर पुं. કણેર ५. डिण्डिम पुं. વાજિંત્ર વિષે ६. दीनार पुं. - સોનામહોર ॥ ७. उपचरित वि. - સરભરા કરી. ८. मा कार्षीः कृ ધાતુ અદ્યતની કર્તરિ બી. પું. એક વ. "मा"નો યોગ હોવાથ अ આવેલ નથી. ॥ ९. अहन् નપું.-દિવસ. ॥ १०. पेषण નપું. હળવું. ११. भ्राष्ट्रकर्म નપું. - ભઠ્ઠા સંબંધી કાર્ય ॥ १२. बन्दि પું. - કેદી ॥**

• • •

# [ २ ]

# ॥ श्रीगजसुकुमालचरित्रम् ॥

**सहते चोपसर्गान् यो जनः प्राणान्तकारकान् ।**
**लभते निर्वृतिं गज-सुकुमालयतीशवत् ॥१॥**

भद्दिलाख्ये नगरे नागाभिधो जैनधर्मपरायणः श्रेष्ठी बभूव । तस्य च परमश्राविका जिनधर्मदेवगुरुभक्तिपरा शुद्धसम्यक्त्वशालिनी, प्रशस्यमाना सुलसाख्या प्रियासीत्, अथ द्वारिकाधीशवसुदेवनृपपार्श्वात् कंसेन याचितानां देवक्याः सप्तानामपत्यानां मध्यात् षट्पुत्रास्तेषां जन्मसमये केनचिद् देवेन प्रच्छन्नं संहृत्य तस्या नागश्रेष्ठिपत्न्याः सुलसाया गृहे मुक्ता आसन् । सुलसया च ते पुत्रवत् पालिताः, क्रमेण यौवनं प्राप्तास्ते षडपि देवकीसुतास्तुल्याकारा-स्तुल्यरूपाश्च, सुलसया प्रत्येकं द्वात्रिंशत्कन्याः परिणायिताः कियत्काला-नन्तरमेकदा तैः षड्भिरपि श्रीनेमिनाथप्रभोर्धर्मदेशना श्रुता, प्रतिबोधं प्राप्य गृहीता च तैः श्रीपारमेश्वरी दीक्षा । क्रमेण चरमशरीरिणश्च ते सर्वेऽपि द्वादशाङ्गे पारिणो[1] बभूवुः

अन्यदा भूमौ विहरन्तस्ते षडपि मुनिवराः श्रीनेमिप्रभुणा सह द्वारिका-नगर्यां समायाताः, अथान्यदा षष्ठतपःपारणादिने युगलिनौ[2] भूत्वा ते षडपि भ्रातृमुनयो गोचरचर्यार्थं नगरीमध्ये गताः । एवं भिक्षार्थं भ्रमतां तेषां मध्यात् प्रथमं युगलं दैवयोगेन श्रीकृष्णगृहे सम्प्राप्तम् । तदा हृष्टया देवक्योत्थाय वन्दनपूर्वकं मोदकैस्तद्युग्मं प्रतिलाभितं, तस्मिन् साधुयुग्मे गते किञ्चित्समयान्तरे द्वितीयमपि साधुयुगलं तत्रैव कृष्णगृहे भिक्षार्थमायातं, देवक्या च तथैव पूर्ववत्समुत्थाय वन्दनपूर्वकं तदपि युगलं मोदकैः प्रतिलाभितम्, गतं च तदपि साधुयुगलम् । इतः किञ्चित्कालानन्तरे दैवयोगेन तृतीयमपि समानरूपं तुल्याकारं मुनियुगलं तत्रैव भिक्षार्थं समायातम् । तद्युगलमपि पूर्ववन्मोदकैः प्रतिलाभ्य विस्मितमानसा देवकी तन्मुनियुगलं प्रति प्राह भो मुनी ! युवां मुहुर्मुहुरत्रैव

मदीयगेहे विहर्तुं कथं समायातौ ? युवयोः किं दिग्मोहो जातोऽस्ति ? अथवा नगरीमध्येऽन्यगेहे क्वापि भिक्षा लभ्यमाना नास्ति ? अथवा किं ममैव मतिभ्रमो जातोऽस्ति ? तत् श्रुत्वा तत्साधुयुगलं प्राह, हे महासति ! नूनं तवैव मुधा दिग्मोहो जातोऽस्ति । यतो वयं षडपि बान्धवाः समानरूपास्तुल्याकाराश्च भद्दिलपुरवास्तव्यनागश्रेष्ठिसुलसाश्राविकयोः पुत्राः स्मः ।

अस्माभिश्च श्रीनेमिजिनेश्वरस्य धर्मदेशनां निशम्य वैराग्यतस्तस्य पार्श्वे दीक्षा गृहीतास्ति । वयं द्वौ द्वौ साधू मिलित्वा पृथक् पृथगेव भवत्या भाग्यवत्या गृहे भिक्षार्थं समायाताः स्मः ततो हृष्टा देवकी स्वापराधक्षमां याचित्वा तौ साधू वन्दते स्म । अथ तयोर्गमनानन्तरं देवकी दध्यौ, अमी षडपि साधवो नूनं कृष्णतुल्या दृश्यन्ते, तिलमात्रेणाप्येतेषां मुनीनां कृष्णस्य चान्तरं न विलोक्यते, नूनमेते षडपि ममैव पुत्राः सम्भाव्यन्ते, किञ्च पर्वमतिमुक्तमुनीन्द्रेणापि ममैवमुक्तमस्ति, यत्तव ते षडपि पुत्रा जीवन्तः सन्ति । इति संशयान्दोलिता सा देवकी निजसंशयापनोदाय द्वितीयेऽह्नि श्रीनेमिप्रभुपार्श्वे समायाता । तत्र प्रभुं प्रणम्य देवकी यावन्निजसंशयापनयनार्थं प्रष्टुमिच्छति, तावन्निजज्ञानेन तदीयभावज्ञः प्रभुरेव तस्यै स्माह, भो देवकि ! एते षडपि शत्रुसेनाद्यास्तवैव सूनवः सन्ति, देवेन सुलसाया गृहे मुक्तास्तत्र च वृद्धिं प्राप्ताः सन्ति । तत् श्रुत्वा व्यपगतसंशयाऽतीवहृष्टा प्रसवत्स्तनी सा देवकी तान् षडपि मुनीन् प्रत्येकं वन्दते स्म । ततः किञ्चित् खिन्नमानसा देवकी प्रभुं प्राह, हे स्वामिन् ! मयैषु तनयेषु मध्यादेकोऽपि नन्दनो न लालितः, तेन मम मनस्यत्यन्तं दुःखं जायते । तत् श्रुत्वा भगवान् जगौ, भो देवकि ! त्वं मुधैव कथं ताम्यसि ? इह जगति सर्वेऽपि प्राणिनः पुराकृतानि निजनिजकर्माण्येवानुभवन्ति, तवाप्यत्र पुरा कृतं कर्मैवोदयमागतमस्ति, त्वया पूर्वभवे तव सपत्न्या रत्नानि हृतान्यासन्, तद्रत्नापहारतो दुःखं प्राप्ताया अतीवरुदत्यास्तस्यास्त्वयैकं रत्नं पुनः समर्पितमासीत् । ततः प्रभुं प्रणम्य निजं प्राक्कृतं कर्म निन्दन्ती सा देवकी निजगृहे समागत्य विच्छायवदनाऽस्थात् इतस्तत्र समायातः कृष्णो निजमातरं विच्छायवदनां निरीक्ष्यापृच्छत्, भो मातः ! अद्य त्वं किं विच्छायवदना विलोक्यसे ? एवंविधा का चिन्ता तव हृदये वर्तते ? तदा देवकी तन्मुनीनामागमनादिसकलं वृत्तान्तं

कृष्णाय निवेद्य जगौ, हे पुत्र ! एवं मम जीवितं सर्वमेव निष्फलं जातम्, यतः-

**त्वज्ज्येष्ठान् सुलसा बाल्ये यशोदा त्वामपालयत् ।**
**अपूर्यत न मे बाललालनस्य मनोरथः ॥१॥**

**वत्स ! तस्मादहं पुत्र-मीहे वाञ्छितपूर्तये ।**
**बाललालनहर्षो हि देवीनामपि दुर्लभः ॥२॥**

एवं निजमातरं चिन्तातुरां वीक्ष्य तामाश्वास्य कृष्णः प्राह, हे मातरेतद्विषये त्वया खेदो न कार्यः, वासवध्वजिनीपतिं[३] हरिणैगमेषिणं देवं समाराध्य नूनं तव मनोरथमहं पूरयिष्यामि । इत्युक्त्वा कृष्णेन द्रुतं तस्य देवस्याराधनं कृतम् । तदा स हरिणैगमेषी देवः प्रकटीभूय कृष्णमाह, भो विष्णो ! नूनं देवक्यास्ते मातुरष्टमः पुत्रो भविष्यति, परं प्राप्ततारुण्यः स पुण्यात्मा प्रव्रज्यां ग्रहीष्यति । इत्युक्तवा स देवो निजं स्थानं गतः । कृष्णेनापि स वृत्तान्तो निजजनन्यै निवेदितः । ततः कियति काले व्यतिक्रान्ते कश्चिन्महर्द्धिको देवः स्वर्गाच्च्युत्वा तस्या देवक्याः कुक्षाववतीर्णः, तदा तया देवक्या स्वप्ने गजः प्रेक्षितः । क्रमेण सम्पूर्णसमये सा मनोहराकारं शुभलक्षणं सुतमेकमसूत । तस्य पुत्रस्य जन्मोत्सवं कारयित्वा स्वप्नानुसारेण वसुदेवो "गजसुकुमाल" इत्यभिधानमदात् । अथ देवकी निजहृदयेऽत्यन्तं हृष्टा तं पुत्रं स्तन-पानदानोत्सङ्गारोपणादिना सुखेन वर्धयामास । क्रमेण मातापित्रोर्भ्रातुश्च नेत्राणि प्रमोदयन्, मनोहरवचनानि जल्पन् स गजसुकुमालकुमारो वृद्धिं प्राप । ततः सम्प्राप्त-यौवनोऽसौ पितुराज्ञया महोत्सवेन द्रुममहीपतेः प्रभावत्याख्यां कन्यां परिणीतवान् । अथ तस्यामेव द्वारिकायां नगर्यामेकः सोमशर्माभिधो द्विजो वसति स्म, तस्य सोमाभिधानात्यन्तं मनोहररूपलावण्योपेता तनयास्ति ।

ततोऽन्यदा मातापितृभ्यां, कृष्णेन भ्रात्रा चाऽनिच्छन्नपि स गज-सुकुमालो महताग्रहेण तया सोमाभिधया द्विजकन्यया सह परिणायितः अथ दैवयोगेन तस्मिन्नेव दिने तस्या द्वारिकाया नगर्या बहिरुद्याने श्रीनेमिनाथो भगवान् समवासार्षीत्, देवैश्च मिलित्वा तत्र समवसरणं विहितम् । सर्वे

नागरिकाश्च प्रभोर्वन्दनार्थं हर्षोत्फुल्लनयनास्तत्र समवसरणे संमायाताः वसुदेव समुद्रविजयकृष्णादियादवा अपि सपरिवारा धर्मोपदेशमाकर्णयितुं श्रीनेमिप्रभोः पार्श्वे तत्र समवसरणे समाययुः भगवानपि तत्र भव्यानां संसारसागरतरणनौनिभां धर्मदेशनामदात्, तद्यथा-

**निर्दन्तः करटी[४] हयो गतजवश्चन्द्रं विना शर्वरी ।**
**निर्गन्धं कुसुमं सरो गतजलं छायाविहीनस्तरुः ॥**
**रूपं निर्लवणं[५] सुतो गतगुणश्चारित्रहीनो यति-**
**र्निर्देवं भुवनं न राजति तथा धर्मं विना पौरुषम् ॥१॥**

**त्रिवर्गसंसाधनमन्तरेण, पशोरिवायुर्विफलं नरस्य ।**
**तत्रापि धर्मं प्रवरं वदन्ति, न तं विना यद्भवतोऽर्थकामौ ॥२॥**

एवंविधां जिनेश्वरमुखादाविर्भूतां धर्मदेशनां श्रुत्वा वैराग्यवासितहृदयो गजसुकुमालो निजपितरावापृच्छ्य महताडम्बरेण कृष्णकृतनिष्क्रमणमहोत्सवः प्रभुपार्श्वे प्रव्रज्यां जग्राह । यतः-

**जह चयइ चक्कवट्टी, नियरज्जं पवित्थंर मुहुत्तेण ।**
**न चयइ तहा अहन्नो, दुबुद्धी खप्परं दुमओ ॥१॥**

ततः प्राप्तसंयमः स गजसुकुमालमुनिर्द्वादशाङ्गपारीणः क्रमेण बहुश्रुतो जातः । नित्यं षष्ठाष्टमदशमादि तीव्रं तपः कुर्वाणोऽसौ मुनिर्नगराद्बहिः कायोत्सर्गस्थितो ध्यानपरः परमात्मलीनो भवति । ततोऽन्येद्युः स गजसुकुमालो मुनिः प्रभुमापृच्छ्य सायं श्मशाने गत्वा शुभध्यानं ध्यायन् कायोत्सर्गेण तस्थौ । इतस्तत्राकस्मादागतेन दुष्टेन तस्य श्वशुरेण सोमशर्मद्विजेन तं कायोत्सर्गस्थं निजजामातरं गजसुकुमालमुनिं दृष्ट्वा क्रोधाभिभूतेनेति ध्यातम्, अरे ! अयं पापी गजसुकुमालो मदीयां पुत्रीं परिणीय तत्कालमेव तां परित्यज्य दीक्षां गृहीत्वा मुधैव विडम्बयामास, इति चिन्तयन् क्रोधोद्धतः स द्विजाधमस्तत्र कायोत्सर्गस्थितस्य तस्य गजसुकुमालमुनेर्मस्तकोपरि [६]शकट्याकारमेकं

[7]घटीकण्ठं मुमोच । ततस्तत्र ज्वलन्त्याश्रिताया ज्वलदङ्गारकानानीय स तैस्तं घटीकण्ठं बिभरामास । ततो द्रुतमेव ततः पलाय्य स निजगृहे समायातः इतः कायोत्सर्गध्यानस्थितस्य तस्य गजसुकुमालमुनेस्तैर्ज्वलदङ्गारैः सर्वाणि कर्मेन्धनानि तथा दग्धानि, यथा क्षणमात्रादेव स केवलज्ञानमासाद्य मुक्ति-धामनि ययौ । अथ प्रभाते देवक्यादिपरिवारयुतः कृष्णः प्रभुं नन्तुं समाययौ, परं तत्र तं गजसुकुमालमुनिमनीक्ष्योत्सुकीभूतः स प्रभुं पप्रच्छ, हे स्वामिन् ! स मे भ्राता गजसुकुमालो मुनिः क्वास्ति ? अहं सपरिवारस्तं वन्दितुमिच्छामि । तदा प्रभुणा प्रोक्तम्, भो कृष्ण ! तस्य तव भ्रातुर्द्विजसाहाय्येन निर्वाणमभूत् । एवं वज्रप्रहारोपमं प्रभुवनचं निशम्य मोहमूढः कृष्णादिपरिवारो द्रुतं मूर्च्छितः । कियत्समयानन्तरं पुनर्लब्धचैतन्योऽश्रुपूर्णनयनः कृष्णः पुनः प्रभुं पप्रच्छ, हे भगवन् ! तस्य मम भ्रातुर्मुनेः कथं निर्वाणं जातम् ? प्रभुः प्राह, भो कृष्ण ! नूनं तस्य महामुनेर्द्विजस्य सहायेन निर्वाणमभूत् । श्मशाने कायोत्सर्ग-ध्यानस्थितस्य तस्य मस्तके तेन द्विजेन ज्वलदङ्गारभृता शकटी मुक्ता, तेन तस्य तूर्णमेव कर्मक्षयादन्तकृत्केवलित्वेन निर्वाणमभूत् ।

यदि स द्विजोऽधुना तस्यैवंविधं सहायं नाऽकरिष्यत्, तदा बहुकालेन कष्टात्कर्मक्षयोऽभविष्यत् । यथाद्यैव त्वया मार्गे समागच्छता देवकुलिका-निर्मापणार्थमेकैकामिष्टिकां वहन् द्विजो दृष्टः, तदा त्वयापि तस्य सहायार्थ-मेकेष्टिका[8] तत्रानीता । तद् दृष्ट्वा तव सर्वेणापि परिवारेण तत्रैकैकेष्टिका समानीता । एवं तत्र समूहीभूताभिस्ताभिरिष्टिकाभिस्तस्य द्विजस्य क्षणमात्रेण देवकुलिका निष्पन्ना, एवं च यथा तस्य द्विजस्येष्टिकावहनकार्यं तव सहायेन समाप्तम् । तथा तस्य गजसुकुमालमुनेरपि तस्य द्विजस्य सहायेन सर्वकर्म-क्षयात्तूर्णं निर्वाणमभूत् । अथ तस्य द्विजस्योपरि त्वया कोपो न कार्यः । तत् श्रुत्वा कृष्णेन पुनरपि भगवते पृष्टम्, हे भगवन् ! किंनामा स द्विजोऽस्ति ? तदा प्रभुणा प्रोक्तम्, भोः कृष्ण ! अद्यैव प्रतोल्यां[9] प्रविशन्तं त्वां वीक्ष्याकस्मादेव भयभीतस्य यस्योरस्फोटात्तत्रैव मरणं भविष्यति, स एव द्विजस्त्वया गज-सुकुमालमुनेर्निर्वाणसहायकर्ता ज्ञेयः ततः कृष्णेन सकुटुम्बेन तस्य गजसकु-

मालमुनेः शरीरस्य बहुविलापपुरस्सरमग्निसंस्कारो विहितः । ततः प्रभुणा शान्तरसमयधर्मदेशनया कृष्णादीनां शोको दूरीकृतः । ततो देवक्यादियुतः कृष्णस्ततो निःसृत्य पुरीं प्रति गन्तुं प्रवृत्तः इतः प्रतोल्यां सन्मुखमागच्छन् स विप्रः कृष्णमागच्छन्तं विलोक्य भयभीतो हृदयस्फोटात्तत्रैव मृतः एवमकस्मात्तं विप्रं मृतं दृष्ट्वा कृष्ण उपलक्षयामास । ततस्तस्य विप्रस्य चरणयोर्दवरकं[१०] बन्धयित्वा तेन तस्य तच्छबं पुरमध्ये घर्षणपूर्वकं भ्रमितम्, पटहो वादितश्च यः कोऽप्यतः परं यतीनां घातं करिष्यति, स मयैवं विगोपयिष्यते । अथ पुत्रवियोगेन देवकी बहु विलापमकरोत्, परं प्रभुणा धर्मदेशनया प्रतिबोधिता साप्यनित्य-भावनां भावयामास ॥

**॥ इति क्षमाफलोपदर्शने श्रीगजसुकुमालमुनिचरित्रं समाप्तम् ॥**

**: अभ्यास :**

प्रश्नः १. भिक्षार्थमागतं मुनियुगलं दृष्ट्वा देवक्याः किमाश्चर्यं बभूव ?

२. देवक्याः पुत्रज्ञानं कथञ्ज्ञातम् ? पुत्राञ्ज्ञात्वा सा कीदृशी भूता ?

३. देवक्या केन कारणेन एकोऽपि नन्दनो न लालितः ?

४. कृष्णेन तस्याः पुत्रमनोरथः कया रीत्या पूरितः ?

५. गजसुकुमालमुनिं सोमिलश्वशुरः कीदृशम् उपसर्गं कृतवान् ? कथम् ?

६. सोमिलस्य शिक्षां न कर्तुं भगवता नेमिनाथेन कृष्णाय किमाख्यातम् ?

**१. पारिन् वि. પાર પામેલ ॥ २. युगलिन् वि.- બે-બે. (જોડલું) ॥ ३. ध्वजिनीपति पुं.- સેનાપતિ ( ध्वजिन्याः पतिः ध्वजिनीपतिः ष. तत्पु. ) ॥ ४. करटिन् पुं હાથી ५. निर्लवणं वि. સુંદરતા વિનાનું ॥ ६. शकटी स्त्री. સગડી ॥ ७. घटीकण्ठ पुं.-ઘડાનો કાંઠલો ॥ ८. इष्टिका स्त्री. ઈંટ ९. प्रतोली स्त्री-નગરનો દરવાજો ॥ १०. दवरक पुं-દોરી. ॥**

• • •

# ।। श्रीप्रसन्नचन्द्रराजर्षिचरित्रम् ।।

पोतनपुरे नगरे प्रसन्नचन्द्रो राजा बभूव, सोऽतीवधार्मिकः, सत्यवादी, न्यायधर्मैकनिपुणः स एकदा सन्ध्यायां गवाक्षस्थितो नगरस्वरूपं विलोकयति, तस्मिन्नवसरे नानावर्णान्यभ्राणि[१] जातानि, सन्ध्यारागः सञ्जातः, तं दृष्ट्वाऽतीव हर्षितो राजा मुहुर्मुहुर्विलोकयति, तत्सन्ध्यास्वरूपं क्षणिकं दृष्टनष्टमिव नष्टम्, राज्ञा चिन्तितं, क्व गतं सन्ध्यारागसौन्दर्यम्, अनित्यता पुद्गलानाम्, सन्ध्याराग इव देहोऽप्यनित्यः, संसारे प्राणिनां किमपि सुखं नास्ति, यदुक्तं-

**[६]दुःखं स्त्रीकुक्षि[४]मध्ये [१]प्रथम-**
**मिह [२]भवे [३]गर्भवासे [५]नराणाम्,**
**[७]बालत्वे [८]चापि [९]दुःखं**
**[१०]मललुलितवपुः[२] [११]स्त्रीपयःपानमिश्रम् ।**
**[१२]तारुण्ये [१३]चापि [१५]दुःखं**
**[१६]भवति [१४]विरहजं वृद्ध[१७]भावोऽप्य[१८]सारः,**
**संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ।।१।।**

एवं वैराग्यरङ्गेण रञ्जितमना राजा चिन्तयति संसारे वैराग्योपमं सुखं नास्ति । यदुक्तं-

**भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयम् ।**
**दास्ये स्वामिभयं, गुणे खलभयं, वंशे कुयोषिद्भयम् ।।**
**माने म्लानिभयं, जये रिपुभयं, [३]काये कृतान्ताद्भयम् ।**
**सर्वं नाम भयं भवेच्च भविनां वैराग्यमेवाभयम् ।।१।।**

एवं वैराग्यपरायणो राजा स्वं पुत्रं राज्ये स्थापयित्वा स्वयं दीक्षां

जग्राह। तत्कालकृतलोचो भूमौ विहरन् राजगृहोद्याने कायोत्सर्गमुद्रया तस्थौ। तस्मिन्नवसरे श्रीमान् वर्धमानस्वामी ग्रामाद् ग्रामं विहरन् चतुर्दशसहस्र-साधुपरिकरितः सुरनिर्मितकाञ्चनकमलोपरि चरणौ धारयन् राजगृहे गुणशैले चैत्ये समवासार्षीत्, सुरैरागत्य समवसरणं निर्मितम्। वनपालका झटिति नगरे समेत्य श्रेणिकं विज्ञपयामासुः, स्वामिन्! भवदीयमनोवल्लभाः श्रीवर्धमानस्वामिनो वने समवसृताः। एतद्वनपालकवचनं श्रुत्वा राजाऽतीव हृष्टः कोटिप्रमितं धनं तस्मै ददौ, स्वर्णजिह्वां च ददौ। तदनन्तरं राजा महताडम्बरेण जिनवन्दार्थं चलितः, तस्य राज्ञः सैन्यमुखे सुमुखदुर्मुखनामानौ द्वौ दण्डधरौ चलितौ। तदनु ताभ्यां प्रसन्नचन्द्रो मुनिर्वने कायोत्सर्गमुद्रया स्थितो दृष्टः, सुमुखेनोक्तं धन्योऽयं मुनिः, येनैतादृशी महती राज्यलक्ष्मीस्त्यक्ता, संयमश्रीश्च गृहीता, एतस्य नाम्नापि पापं याति किं पुनः सेवनेन ? तदा दुर्खेनोक्तं अधन्योऽयं, महापापोऽयं मुनिः किमिमं पुनः पुनर्वर्णयसि ? एतेन समः कोऽपि [४]पापभाग् नास्ति। सुमुखेन मनसि चिन्तितं, अहो दुर्जनस्वभावोऽयं यद् गुणेषु दोषमेव गृह्णाति यदुक्तं-

**आक्रान्तेव[४] महोपलेन मुनिना शप्तेव दुर्वाससा।**
**सातत्यं बत मुद्रितेव [५]जतुना नीतेव मूर्च्छां विषैः।**
**बद्धेवाऽतनुरज्जुभिः[६] परगुणान् वक्तुं न शक्ता सती।**
**जिह्वा लोहशलाकया खलमुखे विद्धेव संलक्ष्यते ॥१॥**

तथा चोक्तं-

**आर्योऽपि दोषान् खलवत्परेषाम्,**
**वक्तुं हि जानाति, परं न वक्ति।**
**किं काकवत्तीव्रतराननोऽपि!**
**कीरः[७] करोत्यस्थिविघट्टनानि ॥२॥**

ततः सुमुखेनोक्तं भो दुर्मुख! किमर्थमेनं मुनीश्वरं महात्मानं निन्दसि ? तदा दुर्मुखेणोक्तं भो! एतस्य नामापि न ग्रहीतव्यम्। यदयं पञ्चवार्षिकं बालं

राज्ये स्थापयित्वा निर्गतः, परन्त्वेतद्वैरिभिर्मिलित्वा एतन्नगरमुल्लुसितम्,[८] एतदीयाः पौरजनाः क्रन्दन्ति, विलापं कुर्वन्ति, महद्युद्धं जायते, अधुना ते एतदीयं बालकं निहत्य राज्यं ग्रहीष्यन्ति, एतत्सर्वं पापमेतच्छिरसि, इति श्रुत्वा ध्यानस्थितेन प्रसन्नचन्द्रराजर्षिणा चिन्ततमहो ! मयि स्थितेऽपि मदीयाः शत्रवो यदि बालकं निहत्य राज्यं गृह्णन्ति तर्ह्येषा मानहानिर्ममैवेति स ध्यानाच्चलितः, मनसैव वैरिभिः सार्धं तेन युद्धं कर्तुमारब्धम् । अतीवरौद्ररूपतामापन्नस्तन्मनां रौद्रं ध्यानं ध्यायति, मनसैव वैरिणं निहन्ति, हता इमे इति बुद्ध्या समीचीनं जातमिति मुखेनापि जल्पते, अधुनान्यं मारयामीति पुनरपि मनसा युद्धाय प्रवर्तते । एतस्मिन्नवसरे श्रेणिकेन हस्तिस्कन्धाधिरूढेन[९] प्रसन्नचन्द्रो दृष्टः, अहो धन्योऽयं राजर्षिरयमेकाग्रमनसा ध्यानं करोति । श्रेणिकोऽपि गजादुत्तीर्य त्रिःप्रदक्षिणीकृत्य[१०] पुनः पुनर्वन्दते स्तौति च । तं वन्दित्वा मनसा स्तुवन् गजमारुह्य स्वामिसमीपमागतः, समवसरणं च दृष्ट्वा पञ्चाभिगमनविधिना जिनं वन्दित्वा करकमलौ मूकुलीकृत्यैवं[११] स्तौति स्म । यदुक्तं-

**अद्याऽभवत्सफलता नयनद्वयस्य,**
**देव ! त्वदीयचरणाम्बुजवीक्षणेन ॥**
**अद्य त्रिलोकतिलक ! प्रतिभासते मे,**
**संसारवारिधिरयं चुलुकप्रमाणः ॥१॥**

**दिट्ठे तुह मुहकमले, तिन्निवि णट्ठाइं निरवसेसाइं ।**
**दारिद्दं दोहग्गं, जम्मंतरसंचियं पावं ॥२॥**

इत्याद्यष्टाधिकशतसङ्ख्यैः काव्यैर्जिनं स्तुत्वा यथास्थानमुपविष्टः, प्रभुणा क्लेशनाशिनी धर्मदेशना प्रारब्धा, देशनान्ते श्रेणिकः स्वामिनं पृच्छति स्म । हे विभो ! यदवसरे मया प्रसन्नचन्द्रो वन्दितस्तदवसरे यदि स कालधर्मं प्राप्नोति तदा क्व गच्छति ? स्वामिनोक्तं तदा सप्तमीं नरकपृथ्वीं याति, श्रेणिकेनोक्तं स्वामिन्नधुना क्व गच्छति ? भगवतोक्तं षष्ठीं नरकपृथ्वीं याति, पुनरपि श्रेणिकेन क्षणं विलम्ब्य पृष्टं अधुना, क्व गच्छति ? भगवतोक्तं पञ्चमीं

पृथ्वीं याति। पुनरपि क्षणं विलम्ब्य पृष्टम्, भगवतोक्तं चतुर्थीं पृथ्वीं याति। एवं तृतीयायां द्वितीयायां, प्रथमायाम्, पुनरपि श्रेणिकेन पृष्टं, प्रभो ! अधुना क्व गच्छति ? भगवतोक्तं प्रथमदेवलोके, एवं द्वितीये तृतीये चतुर्थे पञ्चमे षष्ठे सप्तमे अष्टमे नवमे दशमे एकादशे द्वादशे च एवमनुक्रमेण नवसु ग्रैवेयकेषु यावत्-पञ्चानुत्तरविमानानि तावत्पर्यन्तं। श्रेणिकप्रश्नानन्तरं भगवता तत्प्रश्नोत्तरं दत्तम्। अनया रीत्या सभायां प्रश्नोत्तरनिर्णये जायमाने, अस्मिन्नवसरे नभसि देवदुन्दुभिनिनादं[१२] निशम्य श्रेणिकेन पृष्टम्, प्रभो ! क्वायं दुन्दिभिनिनादः ? प्रभुणोक्तं प्रसन्नचन्द्रराजर्षेः केवलज्ञानं समुत्पन्नम्, तत्र सुरा दुन्दुभिं ताडयन्ति, जयजयारावः सञ्जायते, श्रेणिकेनोक्तं प्रभो ! किमेतत्कौतुकं मया न ज्ञातं, किमिदं स्वरूपं ? स्वामिन् ! कृपां विधायैतदुदन्तं[१२] प्रसादीकुरु, प्रभुणोक्तं श्रेणिक ! सर्वत्रापि मन एव प्रधानम्। यदुक्तं-

**मन एव मनुष्याणां, कारणं बन्धमोक्षयोः।**
**क्षणेन सप्तमीं याति, जीवस्तण्डुलमत्स्यवत् ॥१॥**

तथा चोक्तम्-

**मरणमरणेंदियमरणं, इन्दियमरणे मरंति कम्माइं।**
**कम्ममरणेण मुक्खो, तम्हा मणमारणं पवरं ॥२॥**

भोः श्रेणिक ! यदवसरे त्वया प्रसन्नचन्द्रोऽभिवन्दितस्तदवसरे [१३]त्वदीय-दण्डधरदुर्मुखवचनं श्रुत्वा स ध्यानाच्चलितः, परसेनया युद्धं मनसैव करोति स्म। त्वया त्वेवं ज्ञातं यन्महामुनीश्वरोऽयं एकाग्रमनसा ध्यानं ध्यायति, परन्तु तेन तवदसरे वैरिभिः सार्द्धं मनसा महद्युद्धमारब्धमभूत्, ततो युद्धेन सप्तमनरक-गमनयोग्या आयुःपुद्गला मेलिताः, न तु निकाचितबन्धेन बद्धाः, तदनु त्वं तं वन्दित्वाऽत्रागतः, तेन तु मनसा युद्धे क्रियमामे शस्त्रैः सर्वेऽपि शत्रवो निहताः, शस्त्राणि सर्वाण्यपि च व्ययितानि,[१४] शत्रवोऽपि सर्वे क्षयं नीताः, एतदवसरे एकः शत्रुः सन्मुखं स्थित, शस्त्र तु पार्श्वे न स्थितं, तदा प्रसन्नचन्द्रेण [१५]रौद्रध्यानपरायणेन मनसि विचारितम्, [१६]शिरःस्थलोहमयेन पट्टेन

वैरिणं ताडयामीति बुद्धया साक्षादेव हस्तौ तेन शिरसि न्यस्तौ, तत्कालं कृतकेशलुञ्चनं स्वं शिरो दृष्ट्वा स पश्चाद्वलितः, अहो धिग्मयाऽज्ञानान्धितधिया[१७] रौद्रध्यान-परायणेन किं चिन्तितम् ? त्यक्तसावद्य-सङ्गस्य गृहीतयोगस्य वान्तभोगस्य ममैतद्युद्धं न घटते । कस्य सुतः ? कस्य प्रजाः ? कस्यान्तःपुरम् ? अरे दुरात्मन् ! त्वया किं विचारितम् ? सर्वमप्यनित्यं यदुक्तं-

**चला विभूतिः क्षणभङ्गि यौवनम् !**
**कृतान्तदन्तार्ववर्ति जीवितम् ।**
**तथाप्यवज्ञा परलोकसाधने,**
**अहो ! नृणां विस्मयकारि चेष्टितम् ॥१॥**

एवं शुभध्यानमापन्नः प्रतिक्षणं [१८]निकृष्टनिकृष्टतराध्यवसायबद्धानि कर्मदलिकान्युन्मूलयामास, शुभतराध्यवसायवशेन सप्तानामपि पृथिवीनां गमनयोग्यानि दलिकानि स्फेटयित्वोर्द्धवं यावत्सर्वार्थसिद्धविमानगमनयोग्यं कर्मदिलं मेलयित्वोत्तरोत्तरपरिणामधारया परमपदप्राप्तिपरमकारणं क्षपकश्रेणि-शरणमाश्रित्य घातिकर्मक्षयं विधाय तत्कालमेवोज्जवलं केवलज्ञानमाप अतस्तत्प्रभावात्सुरा एकीभूय गीतगानाद्युत्सवं कुर्वन्तीति श्रुत्वा श्रेणिकः सविस्मयं मुहुर्मुहुः शिरो धुन्वन् प्रभुं वन्दित्वा निस्सन्देहो भूत्वा स्वस्थानं जगाम । प्रभुरप्यन्यत्र विजहार, प्रसन्नचन्द्रोऽपि बहुकालं यावत्केवलित्वेन भूमौ विहृत्य शिवपदमलङ्कृतवानित्युपनयः, अत एवात्मनः साक्षिकमाचरितं पुण्यपापं फलदायीति दृष्टान्तः ॥

**॥ इति श्रीप्रसन्नचन्द्रराजर्षिचरित्रम् समाप्तम् ॥**

**: अभ्यास :**

प्रश्नः १. कीदृशं दृश्यं दृष्ट्वा प्रसन्नचन्द्रराज्ञः वैराग्यमभूत् ?

२. संसारे कुत्र-कुत्र स्थाने भयानि वर्तन्ते ? किमभयम् ?

३. प्रसन्नचन्द्रराजर्षिणा मनसि युद्धं कथं कृतम् ?

४. खलस्य जिह्वा कीदृशी ?

५. प्रसन्चन्द्रराजर्षेः युद्धविषयिदुर्ध्यानं केन प्रकारेण वलितम् ?

६. मनुष्याणां बन्ध-मोक्षयोः किं कारणम् ?

१. अभ्र नपुं. - વાદળ ॥ २. मलेन लुलितम् मललुलितम् ( तृ. तत्पु. ) मललुलितञ्च तद् वपुश्च मललुलितवपुः । ( वि. पू. क. ) મલથી ખરડાયેલ શરીર ॥ ३. कृतान्त पु.-यम् ॥ ४. पापं भजति पापभाक् । ( उपपद. ) પાપને ભજનારો ॥ ४. મોટા પથ્થરથી દબાયેલી, દુર્વાસા ઋષિથી શાપિત થયેલી, લાખથી અત્યંત જડાયેલી, વિષયથી મૂર્ચ્છા પામેલી, જાડા દોરડાથી બંધાયેલી, લોઢાની શળીથી વિંધાયેલી જાણે ન હોય તેવી દુર્જનના મુખમાં રહેલી જીભ બીજાના ગુણને બોલવામાં શક્તિમાન થતી નથી. ५. जतु पुं. - લાખ. (દ્રવ્ય વિશેષ) ॥ ६. न तनवः अतनवः ( नञ् तत्पु. ) अतनवश्चामूः रज्जवश्च अतनुरज्जवः ( वि. पू. क. ) ताभिः अतनुरज्जुभिः જાડા એવા દોરડાઓ વડે ॥ ७. कीर पुं. - પોપટ ॥ ८. उद् + लुस १ ग. प. प. લુંટવું, દુઃખ દેવું ॥ ९. हस्तिनः स्कन्धः हस्तिस्कन्धः । ( ष. तत्पु. ) तमधिरूढः हस्ति-स्कन्धाधिरूढः । ( द्वि. तत्पु. ) तेन-हस्तिस्कन्धाधिरूढेन । હાથીના સ્કંધપર આરૂઢ થયેલા વડે ॥ १०. अप्रदक्षिणां प्रदक्षिणां कृत्वाप्रदक्षिणीकृत्य । ( च्वि स. ) પ્રદક્ષિણા કરીને । ★ तस्मिन् मनो यस्य सःसन्मना । ( ब. व्री. ) ॥ ११. मूकुलीकृत्य सं. भू. कृ. - બંધ કરીને ॥ १२. देवानां दुन्दुभयः देवदुन्दुभयः । ( ष. तत्पु. ) तेषां निनादः देवदुन्दुभि-निनादः । ( ष. तत्पु. ) तम्-देवदुन्दुभिनिनादम् । દેવદુન્દુભિના અવાજને ॥ १२. उदन्त पु.-प्रस्ताव. ( वृत्तान्त ) १३. तव अयम् त्वदीयः- वि તમારું આ. (तद्धित.) १४. व्ययित ભૂ. કૃ.-નાશ થયેલ. ( वि+अय् धातु ) १५. रौद्रश्च तद् ध्यानञ्चरौद्र ध्यानम् । ( वि. पू. क. ) तस्मिन् परायणः रौद्रध्यानपरायणः । ( स. तत्पु. ) तेन-रौद्र ध्यानपरायणेन । રોદ્ર ધ્યાનમાં પરાયણ એવા તેના વડે ॥ १६. शिरसि-तिष्ठति-शिरस्थः । ( उप. तत्पु. ) ( शिर-स्थश्चासौ लोहमयश्चशिरःस्थलोहमयः । ( वि. पू. क. ) लोहस्य विकार-लोहमय । ( लोह+मयट् ) ( तद्धित ) માથા પર રહેલ લોખંડના ॥ १७. अज्ञानेन अन्धिता-अज्ञानान्धिता ( तृ. त. ) अज्ञानान्धिता धीः यस्य सः अज्ञानान्धितधीः । तेनअज्ञानान्धितधिया ( समा. बहु. ) અજ્ઞાનથી અન્ધ થઈ છે બુદ્ધિ જેની એવા તેના વડે ॥ १८. निकृष्ट वि.-ગાઢ ॥

• • •

# [ ४ ]

## ॥ श्रीअतिमुक्तमुनिचरित्रम् ॥

**कृतानेकतमस्कोऽपि,[१] निजं निन्दन् सुभावतः ।**
**ईर्यापथिकया सिद्धो, ह्यतिमुक्तो महामुनिः ॥१॥**

पेढालाख्ये पुरे महानगरे श्रीविजयाभिधो राजा राज्यं चकार, तस्य सच्छीलशालिनी श्रीमत्यभिधा राज्ञी बभूव । तौ द्वावपि दम्पती जैनधर्म-कुशलावास्ताम्, दानशीलतपोभावनापूजाप्रभावनाऽमारीघोषणासप्तक्षेत्र्यां[२] स्वधनवापादिपुण्यकार्यंकुरुतः स्म । यतः-

**स्वल्पश्रीसंयुता येऽपि, दानं कुर्वन्त्यनेकधा ।**
**स्वशक्तिं प्रकटीकृत्य, ते धन्या दानिनां मताः ॥१॥**

**रोगक्लेशमदोन्मादैः, सर्वदुःखपरीषहैः ।**
**स्वीकृतं ये न मुञ्चन्ति, व्रतं स्युस्ते बुधैः[३] स्तुताः ॥२॥**

क्रमाद्धर्मकार्याणि कुर्वतोस्तयोरेकः शुभलक्षणोपेतः सुतोऽभूत्, तस्य पुत्रस्य जन्मोत्सवं कृत्वा राज्ञा अतिमुक्त इति नाम दत्तम् । एवं क्रमेण स बालो वृद्धिं प्राप्नुवन् अष्टवार्षिको जातः । एकदाऽसौ समवयस्कैरन्यैः[४] बालैः समं रथ्यायां[५] रममाणोऽभूत् । इतो गोचरचर्यायै तत्र विरचन्तं श्रीगौतमस्वामिनं गणधरेन्द्रं दृष्ट्वा सोऽतिमुक्तकुमारो हृष्टः सन् प्रणम्य प्राह, 'हे भगवन् ! के यूयं किमर्थं चात्र विचरथ ?' तैरुक्तं 'वयं श्रमणाः स्मः, शुद्धाऽऽहारलाभार्थं च विहरामः' । अतिमुक्तेनोक्तम्, 'भगवन् ! तर्हि मदीयगृहे समागच्छत, मे माता युष्मभ्यं शुद्धाऽऽहारं दास्यति', इत्युक्त्वा तदीयाङ्गुलीलग्नः स गौतमस्वामिनं निजगृहे समानयत् । श्रीमत्यपि भगवन्तं श्रीगौतमस्वामिनं समागतं दृष्ट्वा-ऽतीवहृष्टा शुद्धाहारैः प्रत्यलाभयत् । अथ तदा निवृत्य गच्छन्तं श्रीगौतम-

स्वामिनमनुगम्य अतिमुक्त उवाच, 'भगवन्नहं भवादृशो भवितु-मिच्छामि'। तदा गौतमेनोक्तम्, 'भो अतिमुक्तक ! त्वमद्यापि बालोऽसि, जैनदीक्षा च दुष्कराऽस्ति, अतस्त्वया व्रतपालनं सुदुष्करं सम्भाव्यते। यतः-

**तपःक्रियामनोगुप्ति-विनयादिसुकर्मभिः।**
**चारित्रं दुष्करं बाल्ये, जायते नात्र संशयः ॥१॥**

तत् श्रुत्वा अतिमुक्तेनोक्तम्, भगवन् ! नाहं बालः, नूनमहं महाव्रत-स्वीकारेण भवादृशो भविष्यामि, अतो मां वदत, यूयं कुत्र वसथ ? यथाहं भवद्भिः सह तत्रागच्छामि। श्रीगौतमेनोक्तम्, 'ममाचार्याः श्रीवीरजिनेन्द्रा अत्र पुरोद्याने निवसन्ति, वयमपि तैः सार्धं तत्रैव वसामः' इति श्रुत्वा स बालोऽप्यतिमुक्तः तेन सह श्रीवीरजिनालङ्कृते पुरोद्याने समागतः। गौतम-युक्तस्तत्रागत्य अतिमुक्तको जिनं नत्वा, धर्मं श्रुत्वा बुद्धो गृहमागत्याब्रवीत् पितरौ। 'हे मातः ! हे पितः ! अद्य मया पुरोद्यानं गतेन श्रीवीरप्रभो-र्मुखाद्धर्मश्रवणं कृतम्। अतोऽहमस्मादतिघोरस्वरूपात् संसारादुद्विग्नोऽस्मि, तेन माम् दीक्षाग्रहणार्थमनुमन्येथाम्'। मातापितृभ्यां प्रोक्तम्, 'हे वत्स ! त्वया कथमेवमुच्यते ? त्वमेक एवावयोः पुत्रोऽसि, राज्यस्यास्य क आधारो भविष्यति ? किञ्चाऽस्माकं वृद्धत्वे त्वमेवाधारो भविष्यसि। अधुना त्वावयोरेव दीक्षाग्रहणावसरोऽस्ति। त्वं त्वधुना बालोऽसि। भागवती दीक्षा च सुदुष्करा विद्यते'। तत् श्रुत्वा अतिमुक्तकः प्राह, 'भोः पितरौ ! किं ज्ञायते को वृद्धः ? कश्च लघुः ? संसारे सर्वेषामनित्यत्वमेव सम्भाव्यते। कः कस्य पुत्रोऽस्ति ? संसारे भ्रमतां जीवानां बहवः सम्बन्धा बहुषु भवेषु जाताः सन्ति। परं न कोऽपि कस्यापि शरणं यतः-

**माया पियरो भाया, भज्जा पुत्ता य मित्त धणनिवहा।**
**न य सरणं संसारे, जीवाणं मुत्तुं जिणवयणं ॥१॥**

**यः पिता स हि पुत्रः स्यात्, यः पुत्रः स पिता भवेत्।**
**यः पुत्रः स भवेन्माता, या माता सा सुतो भवेत् ॥२॥**

**एवं भवे भवेऽनेक-सम्बन्धाः कर्मयोगतः !**
**जायन्ते देहिनां तेन, कः पुत्रः कः पितोच्यते ॥३॥**

किञ्च -

**संसारंमि असारे, नत्थि सुहं वाहिवेयणापउरे ।**
**जाणंतो इह जीवो, न कुणइ जिणदेसियं धम्मं ॥४॥**

एवं मातापितरावनुज्ञाप्य सोऽतिमुक्तकुमारो महोत्सवपूर्वकं श्रीगौतमस्वामिहस्तेन प्रव्रज्यां जग्राह । एवं श्रीगौतमस्वाम्यादिष्टे चारित्रक्रियां कुर्वन् हृष्टचित्तः सन् सोऽतिमुक्तमुनिः शुद्धं संयममाराधयति स्म ।

अथैकदा गोचरचर्यया कस्मिंश्चिद् ग्रामे भ्रमन् सोऽतिमुक्तको मुनिरेकया वृद्धया हसन्त्या प्रोक्तः, 'भोः क्षुल्लकमुने ! किं त्वया सकाले एव उत्सूरः[६] कृतः ? किं ज्ञात्वा त्वयास्मिन् बाल्यवयस्येव चारित्रं' गृहीतम् ? एवमपूर्ववाण्या निजहृद्यतीवचमत्कृतः स क्षुल्लकोऽतिमुक्तमुनिः प्राहयज्जानामि तन्न जानामि । तत् श्रुत्वा सविलक्षं चमत्कृतया तया बृद्धया तदुक्तोत्तर-भावार्थमजानन्त्या प्रोक्तम्, भोः क्षुल्लकमुने ! त्वया किं प्रोक्तम् ?' अहं त्वदुक्तवचनतत्त्वार्थं ज्ञातुमशक्तास्मि । तदा स क्षुल्लकोऽपि निजोक्तवचनतत्त्वार्थं जगौ, भो वृद्धे ! व्रतग्रहणे सकाले बाल्येऽपि क उत्सूरं कुर्यात् ? यद् जानामि तन्मरणं क्वापि वयसि निश्चितं भविष्यतीति, इति मया संसारदुःखमुक्त्यर्थं सकालेऽपि बाल्ये व्रतं गृहीतमस्ति । उत्सूरस्तु सः कालस्तदैवज्ञायते यदा ज्ञानं भवति, तद् ज्ञानं तु ममाद्यापि प्राप्तं नास्ति, इति मदुक्तवचनतत्त्वार्थो ज्ञेयः । तदुत्तरं श्रुत्वा तया वृद्धया चमत्कृतया हृदि चिन्तितं, अहो ! अनेन क्षुल्लकेनापि मनिना सत्यमेव प्रोक्तम् । इति विचिन्त्य तया श्राविकया तस्यातिमुक्तमुनेः पार्श्वे हास्यकृतस्वापराधक्षमायाचनपूर्वकं सम्यक्त्वमूलानि द्वादश श्राद्धव्रतानि स्वीकृतानि । अतिमुक्तक्षुल्लकोऽपि शुद्धान्नापानं विहृत्य धर्मशालायां गतः ।

अथैकदा स क्षुल्लकः कैश्चिन्मुनिभिः सार्धं देहचिन्तार्थं बहिर्भूमौ गतः । तत्र वर्षाकालत्वात् कानिचिल्लघुपल्वलानि[७] जलापूर्णान्यासन्, तेषु जलपूर्ण-

पल्वलेषु [८]नागरिकबालाः स्वस्वपत्रप्रवहणानि तारयन्तः क्रीडयामासुः । एवं क्रीडतस्तान् बालान् दृष्ट्वा सोऽतिमुक्तमुनिवरोऽपि निजबाल्यचापल्यस्वभावतः स्वकीयकाष्ठतर्पिणीपात्रं तेषु पल्वलेषु तारयन् तैर्बालैः सह क्रीडां कर्तुं प्रवृत्तः, कथयामास च 'भो बालाः ! पश्यत पश्यत ! ममापीयं नौर्जले तरतीति' । एवं बालैः सह क्रीडन्तं तं दृष्ट्वा ते स्थविरमुनयस्तं निवार्य तेन सह पुनरुपाश्रये समाजग्मुः । ततः प्रातरावश्यकं विधाय ते सर्वेऽपि मुनयोऽतिमुक्तकसंयुक्ताः श्रीमाहावीरप्रभुपार्श्वे समाययुः, तत्र च प्रभुं प्रदक्षिणीकृत्य प्रण्य च सर्वे [९]विनयावनम्रास्तमतिमुक्तक्षुल्लकं पुरस्कृत्य प्रभुं विज्ञपयामासुः, 'भगवन् ! अयमतिमुक्तः शिशुत्वात् दीक्षायै अनर्हः सम्भाव्यते,' इत्युक्त्वा तैः ह्यस्त-नदिनदृष्टं तस्य बालचेष्टितं प्रभोरग्रे निवेदितं । तन्निशम्य केवलज्ञानज्ञात-सर्वचराचरस्वरूपेण भगवता प्रोक्तम्, 'भो मुनयः ! एतस्य बालस्यापि क्षुल्लकमुनेराशातनां यूयं मा कुरुत, अधुनैवायं केवलज्ञानमाप्स्यति । तत् श्रुत्वा ते गौतमाद्याः सर्वेऽपि मुनयः विस्मयं प्राप्ताः । इतः सोऽतिमुक्तक्षुल्लकमुनिरपि समवसरणे जगद्गुरोः पुरः शुभवासनया प्रायश्चित्तरूपामीर्यापथिकीं प्रतिक्रमन् "दगमट्टी" इति शब्दमुच्चरन् पृथ्वीकायाप्कायिकादिजीवान् क्षामयन् तदैव केवलज्ञानं समवाप । तदा गौतमादिमुनिसमुदायेष्वाश्चर्यं प्राप्तेषु देवास्तस्य क्षुल्लककेवलिनो महोत्सवं विदधुः । यतः-

**प्रणिहन्ति क्षणार्धेन, [१०]साम्यमालम्ब्य कर्म तत् ।**
**यन्न हन्यान्नरस्तीव्र-तपसा जन्मकोटिभिः ॥१॥**

**मन एव मनुष्याणाम्, कारणं बन्धमोक्षयोः ।**
**यथैवालिङ्ग्यते पत्नी, तथैवालिङ्ग्यते सुता ॥२॥**

अथ स केवलज्ञानालङ्कृतो नववार्षिकः क्षुल्लकोतिमुक्तमुनिः पृथ्व्यां विहरन् भव्यजीवांश्च प्रतिबोधयन् प्रतिदेशं, प्रतिनगरं, प्रतिग्रामं च जनगणान् विस्मापयामास, एवं विहरन् सोऽतिमुक्तकेवली एकदा सूर्यपुरस्य बहिरुद्याने समवसृतः । तत्र जितशत्रुनामा नृपतिरनेकनरनारीगणोपेतस्तं केवलिनं वन्दितुं

समायातः । केवलिनः प्रदक्षिणां विधाय तदीयधर्मदेशनां श्रोतुं च सोऽग्रे समुपाविशत् । सर्वे नरनारीगणा अपि यथास्थानं तत्र समुपविष्टाः । अतिमुक्तकेवलिनापि धर्मदेशना प्रारब्धा । तद्यथा-

**आयुर्वायुचलं सुरेश्वरधनुर्लोलं[१] बलं यौवनम्,**
**विद्युद्दण्डतुलं धनं गिरिनदीकल्लोलवच्चञ्चलम् ।**
**यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा,**
**तावद्धर्मफलाप्तये जनगणैः कार्यः प्रयत्नः शुभः ॥१॥**

**यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषो ।**
**यावद्रोगगणोऽपि नेह कुरुते स्वाङ्गं जना जर्जरम् ।**
**स्वीयश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्,**
**सन्दीप्ते भुवने तु कूपखननं प्रत्युद्यमः कीदृशः ? ॥२॥**

**जन्तूनामवनं[१२] जिनेशनमनं भक्त्यागमाकर्णनम्,**
**साधूनां नमनं मदापनयनं सम्यग्गुरोर्माननम् ।**
**मायाया हननं क्रुधश्च शमनं लोभद्रुमोन्मूलनम्,**
**चेतः शोधनमिन्द्रियार्थदमनं यत्तच्छिवोपायनम् ॥३॥**

एवंविधां केवलिनो धर्मदेशनां श्रुत्वा प्रतिबुद्धो जितशत्रुराजा सम्यक्त्वमूलद्वादशश्राद्धव्रतानि जग्राह । अन्येऽपि बहवो लोकाः भद्रकभाव युताः सम्यक्त्वं प्रापुः, एवं कियत्कालं विहृत्य सोऽतिमुक्तकेवली प्रान्ते मोक्षं ययौ ।

## : अभ्यास :

प्रश्नः १. श्रीगोतमस्वामिनं दृष्ट्वा अतिमुक्तः किं कथितवान् ?

२. अतिमुक्तः दीक्षां ग्रहणार्थं पितरौ किं कथयाञ्चकार ?

३. अतिमुक्तमुनिना वृद्धा श्राविका कया युक्त्या बोधिता ?

४. भगवता मुनिभ्यः किं कथितम् ?

५. कीदृशेन पश्चात्तापेन क्षुल्लकमुनिना केवलज्ञानं प्राप्तम् ?

॥ इति श्रीअतिमुक्तमुनिचरित्रं समाप्तं ॥

१. कृतानेकतमस्कः કરાયેલ અનેક પાપવાળો. ( कृतम् अनेकतमः येन सःकृतानेकतमस्कः ) ॥ २. सप्तानाम् क्षेत्राणाम् समाहारः सप्तक्षेत्री । ( द्विगु स. ) ३. बुध पुं. ડાહ્યો ॥ ४. समवयस्क पुं. मित्र ॥ ५. रथ्या स्त्री. - શેરી ॥ ६. उत्सूर पुं. સાયંકાળ (ઉતાવળે) ७. पल्वल નપું. - ખાબોચિયું ॥ ८. नागरिक वि. નગરનાં नगरे भवः नागरिकः तद्धित. ॥ ९. अवनम्र वि. અત્યંત નમનશીલ ॥ १०. साम्य નપું. સમભાવ ॥ ११. सुरेश्वरधनुष् નપું. ઇન્દ્ર ધનુષ્ય ॥ १२. अव. - १ गण पर. प. રક્ષણ કરવું ॥

• • •

# [ ५ ]

## ॥ श्रीसुभूमचक्रवर्त्तिचरित्रम् ॥

**जो घायइ सत्ताइं, अलियं जंपेइ परधनं हरइ ।**
**परदारं चिय वच्चइ, बहुपावपरिग्गहासत्तो ॥१॥**
**चंडो माणी कुद्धो, मायावी निट्ठुरो खरो पावो ।**
**पिसुणो संगहसीलो, साहूणं निंदओ अहमो ॥२॥**
**आलप्पालपयंपी, सुदुट्ठबुद्धी य जो कयग्घो य ।**
**बहुदुक्खसोगपउरो, मरिउं नरयंमि सो याइ ॥३॥**

व्याख्या – यो जीवः सत्त्वान् मारयति, पुनरसत्यवचनं वदति, पुनरदत्तं वस्तु यो गृह्णाति, पुनः परदारेषु गमनं करोति, पुनर्बहुं परिग्रहं मेलयति, पुनर्यश्चण्डो, भयङ्करो, मानी, अहङ्कारी, क्रुद्धो, मायावी, निष्ठुरः, खरः, कठोरचित्तः, पापी, पिशुनः, संग्रहशीलः, कुसङ्गकृत्, साधूनां निन्दकः, अधर्मी, [१]असम्बद्धवचनप्रजल्पकः, दुष्टबुद्धिः च पुनर्यः कृतघ्नो भवति स बहुदुःखप्रचुरोऽत्यन्तं दुःखी सन् मृत्वा नरकं याति, यथा अष्टमश्चक्रवर्त्ती सुभूमो महापापतः सप्तमं नरकं गतः । तस्य प्रबन्धमाह –

वसन्तपुरसमीपे एकं वनं वर्तते, तत्र वनाश्रमे जमदग्निस्तापसस्तपः करोति, स सर्वत्र जनपदेषु[२] प्रसिद्धोऽभूत् । इतो देवलोके द्वौ मित्रदेवौ स्तः, एको वैश्वानरनामा देवो महाश्राद्धधर्मो जिनभक्तिवचनरक्तः, द्वितीयश्च धन्वन्तरिनामा देवो महाशैवधर्मी तापसर्द्धिभक्तश्च, द्वावपि तावात्मीयं धर्मं प्रशंसतः, एकेनोक्तम् श्रीजैनसदृशः कोऽपि धर्मो नास्ति, द्वितीयेन चोक्तम् । शैवधर्मसदृशोऽन्यो धर्मो न, द्वावपि वादं कुर्वन्तौ स्वस्वधर्मपरीक्षार्थं मनुष्यलोके समागतौ । अथ जैनधर्मिणा वैश्वानरदेवेनोक्तम्, जिनधर्ममध्ये जघन्यो

नवदीक्षितो यः साधुस्तस्य परीक्षा कर्तव्या, शिवधर्ममध्ये च यः पुरातनस्तापसस्तस्य[3] परीक्षा कर्त्तव्या ।

इतो मिथिलानगर्याः राजा पद्मरथो राज्यं त्यक्त्वा चम्पानगर्यां श्री वासुपूज्यस्य द्वादशतीर्थकरस्य पार्श्वे दीक्षां गृहीतवान्, तं पद्मरथं नवीनं साधुं दृष्ट्वा उभावपि दैवौ तत्रागत्य तस्य परीक्षां कर्तुं प्रवृत्तौ । नानाप्रकाराणि मिष्टभक्तानि, शीतलानि पानीयानि च तस्मै ताभ्यां दर्शितानि, उक्तं च, 'भोः साधो ! गृहाणेमानि,' तानि दृष्ट्वा क्षुधातृषापीडितोऽपि साधुरग्राह्याणि ज्ञात्वा न गृहीतवान्, एवं साध्वाचाररक्षणार्थमेका परीक्षा जाता । अथ द्वितीयां परीक्षां कुरुतः, एकस्मिन् ग्राममार्गे ताभ्यां कण्टकाः [4]कर्कराश्च विकुर्विताः, द्वितीयमार्गे च मण्डुक्यो विकुर्विताः, स साधुर्महानुभावो जीवदयापालनार्थं तं मण्डुकीसत्कं मार्गं त्यक्त्वा सकण्टकमार्गे याति, तैः कण्टकैश्च तस्य महोपसर्गो जातः, पादाभ्यां रुधिरं स्थाने स्थाने निस्सरति, तथापि स स्वधर्मान्न परिभ्रष्टः, अथ तौ तस्य तृतीयां परीक्षां कुरुतः, ताभ्यां दिव्यमायया मनोहररूपलावण्योपेताः स्त्रियो विकुर्विताः । ताः स्त्रियस्तस्य साधोरग्रे नानाप्रकाराणि नृत्यादीनि हावभावान्, भोगप्रार्थनादीनि च कुर्वन्ति, तथापि तस्य साधोर्मनो मनागपि स्वधर्मान्न चलितं, पुनस्ताभ्यां नैमित्तिकरूपं विधाय तस्मै साधवे प्रोक्तम्, 'भोः साधो ! आवां ज्ञानिनौ नैमित्तिकौ स्वः, अधुनापि तवायुर्बहु वर्त्तते, अतो यौवनवयसि किमर्थं तपः करोषि ? नानाश्रृंङ्गाररसादियुतान् भोगान् भुङ्क्ष्व । अधुनैवैवंविधं काञ्चनसदृशं शरीरं तपसा त्वया कथं शोष्यते ? एतन्न युक्तम्, वृद्धत्वे त्वया चारित्रं ग्राह्यं,' तदा मुनिना प्रोक्तम्, 'यदि ममायुर्दीर्घमस्ति तदाहं बहुकालं चारित्रं पालयिष्यामि, धर्मं च करिष्यामि, शरीरं च मे तेन निर्मलं भविष्यति, किं च यौवनवयो विना धर्मोऽपि न भवति, वृद्धत्वे किं स्यात् ? शरीरे [5]जर्जरीभूते सति क्रियातप आदि किमपि न भवति । धन्यं मम भाग्यं येन मे चारित्रोदयो जातः,' एवं चतसृभिः परीक्षाभिः परीक्षितोऽप्यसौ यदा न चलितस्तदा तौ देवौ हृष्टौ श्रीजिनशासनस्य प्रशंसा चक्रतुः, इति ताभ्यां जैनधर्मिमुनिपरीक्षा कृता ।

अथ शिवशासने वृद्धतापसपरीक्षार्थं तौ देवौ चलितौ, इतः पूर्वोक्तो

जमदग्निनामा वृद्धस्तापसस्ताभ्यां दृष्टः, नगरलोका अपि तस्य पार्श्वे समागत्य तत्सेवां प्रत्यहं कुर्वन्ति। तस्य मस्तके महती जटा वर्त्तते, अथ तौ देवौ तस्य परीक्षार्थं चटकचटिकायुग्मरूपं विधाय तस्य [६]कूर्चमध्ये आलयं कृत्वा स्थितौ, एकदा चटकेन मनुष्यभाषया चटिकां प्रति कथितम्, 'हे प्रिय ! अहं हिमवन्त-पर्वते गत्वा द्रुतमेवागमिष्यामि,' तदा चटिकयोक्तम् 'चेत्तत्रैव त्वं कयापि चटिकया सहाऽऽसक्तः सन् तिष्ठेस्तदाहं किं कुर्वे ? अतो भवता न तत्र गन्तव्यम्,' तत् श्रुत्वा पुनश्चटकेनोक्तम्, 'चेदहं पश्चान्नागच्छामि तर्हि[७]स्त्रीहत्यागोहत्यादिपातकं मेऽस्तु। तथैव कृतघ्नविश्वासघातकपरनिन्दकानां या गतिर्भवेत् सा मे गतिरस्तु,' चटिकयोक्तमेतत्किञ्चिदप्यहं न मन्ये, परं त्वं मयोक्तमेकं शपथं[८] कुरु यथा मम प्रत्ययो[९] भवेत्, चटकेनोक्तं 'कथय,' तयोक्तं, 'चेत्त्वं पश्चान्नायासि तदाऽस्य महर्षेः पापं ते भवतु इति शपथं कृत्वा त्वं याहि,' तत् श्रुत्वा जमदग्निः क्रुद्धः सन् स्वकूर्चमध्यात्तच्चटकचटिकायुग्ममाकृष्य करे च धृत्वोवाच 'अरे चटिके ! मया किं पापं कृतम् ? तद्वद,' चटिकयोक्तम् 'हे ऋषे ! त्वमात्मनः शास्त्र विचारय, उक्तं च-

**अपुत्रस्य गतिर्नास्ति, स्वर्गो नैव च नैव च ।**
**तस्मात्पुत्रमुखं दृष्ट्वा पश्चाद्धर्मं समाचरेत् ॥१॥**

तेन अपुत्रस्य गृहं शून्यमित्यादि। अतः कारणात् भो मुने ! त्वं क्रोधं संवर, स्वगृहं च याहि,' ऋषिणापि तद्वचो मानितम्। अथ स जमदग्नितापसो गृहे गत्वा बहुपुत्रीपितुः कोष्टिकनगराधिपतेर्जितशत्रोर्नृपस्य पार्श्वे समागत्यैकां कन्यां ययाच। एवं तं तापसं चलचित्तं तपोव्रताच्च भ्रष्टं विज्ञाय स मिथ्यात्वी देवो जैनधर्मे दृढानुरागी जातः, अथ तापसयाचनानन्तरं राज्ञोक्तम्, 'मम पुत्रीशतं वर्त्तते, तन्मध्याद्या त्वां वाञ्छेत तां गृहाण'। तदा स ऋषिर्नृपस्यान्तःपुरे गतः, तत्र सकलाः कन्यास्तं तापसं जटिलं दुर्बलमसंस्कृतदेहं[१०] मलिनाङ्गोपाङ्गं च दृष्ट्वा तं प्रतिथूत्कृतं चक्रुः, तदाकुपितेनर्षिणा ताः सर्वा अपि कन्याः कुब्जीकृताः, पश्चाद्वलितेन तेनैका नृपकन्या नृपप्रासादाङ्गणे रममाणा दृष्टा, तस्यै निजरूपं सम्यक् प्रदर्श्य तेनोक्तम्, त्वं मां वाञ्छसि ? इत्युक्त्वा तस्या हस्ते

बीजपुरकफलं दत्त्वा तामुत्पाट्य स चलितः, शापभयभीतेन राज्ञा सहस्र-गोकुलदासदासीसहिता सा कन्या तस्मै दत्ता, पश्चात्तेनर्षिणा नृपविनयतुष्टेन तपसः प्रभावात्ताः सर्वा अपि कुब्जीभूताः कन्याः समीचीनाः कृताः, एवं तेन स्वकीयं सर्वमपि तपो निष्फलीकृतम्। अथ तेन सा कन्या निजाश्रमे स्थापिता, यौवनं, प्राप्ता च परिणीता, रेणुकेति तस्या अभिधानं जातम्, तया सह स विषयसुखानि भुनक्ति, अथैकदा ऋतुकालसमये तस्यै जमदग्निनोक्तम्, हे प्रियेऽद्याहं त्वां प्रत्येकं वस्तु साधयित्वा दास्यामि, येन तव पुत्रोत्पत्तिर्भविष्यति, तदा रेणुकयोक्तम् हे स्वामिन्! युष्माभिर्द्वे वस्तुनी साधयितव्ये। यथैकेन वस्तुना क्षत्रियः पुत्रो द्वितीयेन च ब्राह्मणः पुत्रो मे भवेत्। तापसेनापि तथा कृतम्, तद्वस्तुद्वयं च रेणुकाग्रे मुक्तम्। अथ रेणुकया तन्मध्यादेकमौषधं जग्धं तत्प्रभावतश्च तस्या महाशूरो महाप्रतापी च रामनामा पुत्रोऽभूत्। अपरं चौषधं हस्तिनागपुरे स्वभगिन्यै अनङ्गसेनायै प्रहितं, तया च तद्भक्षितं, तत्प्रभावेण च तस्या अपि कृतवीर्यनामा पुत्रो जातः, इतः कश्चिदेको विद्याधरोऽतीसार-रोगपीडितस्तस्मिन्नाश्रमे समागतः, रामेण तस्य परिचर्या कृता, ततो जात-समाधिना तेन विद्याधरेण रामाय परशुविद्या दत्ता, तेनापि सा साधिता, तत्प्रभावाच्च तस्याग्रे कोऽपि परश्वादिशस्त्रधारी[११] स्थातुं न शक्नोति।

अथैकदा स रेणुका निजभगिन्या अनङ्गसेनाया मिलनार्थं हस्तिनागपुरेऽनन्तवीर्यराज्ञो गृहे समागता, तां मनोज्ञरूपां दृष्ट्वाऽनन्तवीर्यः कामविह्वलो जातः, क्रमेण परस्परप्रीत्युद्भावनतोऽनन्तवीर्येण सा भुक्ता। ततश्च जातगर्भाया रेणुकायास्तत्रैवैकः पुत्रो जातः, अथान्यदा तत्पुत्रयुता रेणुका जमदग्निना स्वाश्रमे समानीता। एतदकार्यतो जातक्रोधेन रामेणानन्तवीर्यः परशुना हतः, तद् ज्ञात्वाऽनन्तवीर्यपुत्रकृतवीर्येण पितुर्वैरात्तदाश्रमे आगत्य जमदग्निर्हतः, तदा परशुरामेण कृतवीर्यं हत्वा हस्तिनागपुरस्य राज्यं गृहीतम्। इतः कृतवीर्यस्य सगर्भा वनिता भयभीता ततो निर्गत्य वने तापसानामास्रमे गता, तापसैरपि सा भूमिगृहे स्थापिता। तत्र तस्याश्चतुर्दशस्वप्नप्रसूचितः सुभूमनामा पुत्रो जातः, अथ परशुरामेण भ्रान्त्वा परशुप्रभावेण क्षत्रियान् मारयित्वा सप्तवारान्

निःक्षत्रिणी पृथ्वी कृता, तेषां दंष्ट्राभिश्च स्थाल एको भृत्वा स्थापितः, अथैकदा परशुरामेण नैमित्तिकः पृष्टो यन्मम मरणं कस्य हस्ताद्भविष्यतीति, तदा नैमित्तिकेनोक्तं यस्य दृष्ट्या दंष्ट्राः क्षैरेयीरूपा भविष्यन्ति, यश्च तां क्षैरेयीं भोक्ष्यते स पुरुषस्तव हन्ता भविष्यतीति । तदा परशुरामेण तं शत्रुं ज्ञातुमेका सत्रशाला स्थापिता । मुक्तश्च तत्र स क्षत्रियदंष्ट्राभृतः स्थालः सिंहासनोपरि । इतो वैताढ्यपर्वतवासीमेघनादनामविद्याधरेणैको नैमित्तिकः पृष्टो यन्मम पुत्र्याः को वरो भविष्यति ? नैमित्तिकेनोक्तम्, सुभूमनामा चक्री तव सुताया वरो भविष्यति, तदा तेन विद्याधरेण सुभूमस्य शुद्धिं कृत्वा तेन सह निजपुत्री परिणायिता, तया सह सुखानि भुञ्जानः स तत्रैव भूमिगृहे तिष्ठति । अथैकदा प्राप्तयौवनेन तेन निजमाता पृष्टा । हे मातः ! पृथ्वी किमेतावत्प्रमाणैव वर्त्तते ? तदा मात्रोक्तम्, हे पुत्र ! आवां तु शत्रुभयतोऽस्मिन् तापसाश्रमे भूमिगृहमध्ये एव तिष्ठावः, परशुरामेण तव पितरं हत्वा हस्तिनापुरराज्यं गृहीतमस्ति । इत्यादिवृत्तान्तं श्रुत्वा सुभूमः क्रुद्धः सन् भूमिगृहान्निःसृत्य निजश्वशुरं मेघनादं सार्थे गृहीत्वा हस्तिनागपुरे परशुरामकारितायां सत्रशालायां[११] समागतः, तत्र च तस्य दृष्टिपातात्तद्दंष्ट्राभृतः स्थालः क्षैरेयीभृतः सञ्जातः, सुभूमेन सा सर्वापि क्षैरेयी भक्षिता, तद् ज्ञात्वा परशुरामेण चिन्तितं नूनं मम हन्ताऽयमेव, ततः परशुरामस्याज्ञया तत्सेवकास्तं हन्तुं समागताः, परं मेघनादविद्याधरेण ते सर्वेऽपि पराजिताः, तद् वृत्तान्तं श्रुत्वा सक्रोधः परशुरामस्तत्र समागतः परं तत्र सुभूमं दृष्ट्वा स प्रतापरहितो जातः । इतः सुभूमेन तं स्थालमुत्पाट्य परशुरामं प्रति क्षिप्तः, तत्क्षणं चक्ररूपीभूतः स स्थालः परशुरामस्य मस्तकमलुनात्[१२], एवं सुभूमश्चक्री जातः, ततो वैरं स्मृत्वा तेनैकविंशतिवारान्निर्ब्राह्मणी पृथ्वी कृता । चक्रादिरत्नबलेन तेन षट्खण्डानि साधितानि, तथापि तस्य लोभोदधिः परां वृद्धिं प्राप । ततोऽसौ घातकीखण्डस्थभरतक्षेत्रसाधनार्थं लवणसमुद्रमध्ये सहस्रदेवाधिष्ठितचर्मरत्नोपर्यारुह्य ससैन्यः प्रस्थितः, इतः समुद्रमध्ये मार्गे चर्माधिष्ठायकानां मध्यादेकेन देवेन चिन्तितमहं श्रान्तोऽस्मि, अपरे च नवशतनवनतिदेवा विद्यन्ते, ततोऽहं क्षणमेतच्चर्मरत्नं त्यक्त्वा विश्रामं लभेय इति विचिन्त्य तेन तन्मुक्तम्, भाविवशाच्छेषाणां सर्वेषामपि देवानां मनस्सु स

एव विचारः प्रादुर्भूतः, ततस्ते सर्वेऽपि चर्मरत्नं त्यक्त्वा दूरीभूताः, तेन ससैन्यः सुभूमः समुद्रमध्ये पतित्वा मृतः, लोभार्त्तध्यानवशाच्च सप्तमं नरकं गतः ।

: अभ्यास :

प्रश्नः १. कीदृशो जीवो नरकङ्गच्छति ?

२. देवद्विकेन कृताभ्यः परीक्षाभ्यः कापि एका परीक्षा ज्ञाप्यताम् ?

३. केन कारणेन सुभूमचक्री सप्तमं नरकं गतः ?

॥ इति श्रीसुभूमचक्रवर्त्तिकथा ॥

१. न सम्बद्धम् असम्बद्धम् । ( नञ् तत्पु. ) असम्बद्धञ्च तद् वचनञ्च असम्बद्धवचनम् । ( वि. पू. क. ) असम्बद्धवचनस्य प्रजल्पः यस्य सः असम्बद्धवचनप्रजल्पकः । ( व्यधिः बहु. ) ખોટા વચન બોલનાર ॥ २. जनपद पुं. દેશ ॥ ३. पुरातन वि.-પ્રાચીન ॥ ४. कर्कर पुं. કાંકરો. ॥ ५. न जर्जरः अजर्जरः । ( नञ् तत्पु. ) अर्जजरः जर्जरः इव भूतःजर्जरीभूतः । ( च्वि. ) तस्मिन् जर्जरीभूते । જીર્ણ થયે છતે ॥ ६. कूर्च पुं. नपुं.વાળનો સમૂહ. (જટા) ॥ ७. स्त्रियाः हत्या स्त्रीहत्या । ( ष. तत्पु. ) गोः हत्या गोहत्या । ( ष. तत्पु. ) स्त्रीहत्या च गोहत्या च स्त्रीहत्यागोहत्ये । ( द्वन्द्व. ) स्त्रीहत्यागोहत्ये आदौ यस्य सः स्त्रीहत्यागोहत्यादिः । ( ब.व्री. ) स्त्रीहत्यागोहत्यादेः पातकम् स्त्रीहत्यागोहत्यादिपातकम् । ( व्यधि. बहु. ) સ્ત્રીહત્યા, ગોહત્યાદિનું પાપ ॥ ८. शपथ पुं.-સોગંદ ॥ ९. प्रत्यय पुं.-विश्वास ॥ १०. न संस्कृतम् असंस्कृतम् । ( नञ्. तत्पु. ) असंस्कृतम् देहं यस्य सःअसंस्कृतदेहः । ( स.ब. ) तम्-असंस्कृतदेहम् અસંસ્કારિત દેહવાળાને । ११. परशुःआदौ येषु तानि परश्वादीनि । ( ब. व्री. ) परश्वादीनि च तानि शस्त्राणि च परश्वादिशस्त्राणि । वि. उत्त. क. ) परश्वादिशस्त्राणि धारयति इत्येवंशीलः परश्वादिशस्त्रधारी । (ઉપપદ) પરશુ આદિ શસ્ત્રોને ધારણ કરનાર ॥ १२. सत्रशाला स्त्री.-દાનશાલા ॥ १३. लू - ग. ९ प. કાપવું ५ ॥

• • •

## [ ६ ]

# ॥ श्रीनागदत्तचरित्रम् ॥

**अदत्तं यो न गृह्णाति, परस्य दुःखितोऽपि सन् ।**
**नागदत्त इवाप्नोति, स मुक्तिकमलां[१] क्रमात् ॥१॥**

वाराणस्यां नगर्यां जितशत्रुनामा नृपो राज्यं करोति स्म । तत्र चैको दत्ताख्यः श्रेष्ठी न्यवसत् । तस्य च धनश्रीरित्यभिधा प्रियासीत् । जिनधर्मं सम्यगादरेण पालयतोस्तयोः क्रमादेकः पुत्रोऽभूत् । मातापितृभ्यां तस्य जन्मोत्सवं विधाय नागदत्त इति नाम विहितम् । क्रमेण बाल्यभावमुल्लङ्घ्य लेखशालायां प्रेषितोऽसौ नागकुमारः सकलकलाभ्यासं चकार । धर्मशालायां गतश्च मुनीनां पार्श्वे धर्मशास्त्रज्ञानमपि सम्पादयामास । अथैकदा पितरि पञ्चत्वं[२] प्राप्ते स नागदत्तो द्रव्योपार्जनार्थमेकं यानपात्रमारुह्य भूरिभिर्जनैर्युक्तः परद्वीपे गन्तुं जलधिमध्ये प्रयाणमकरोत् । इतो जलधिमध्ये गच्छत् [३]तत्प्रवहणम-कस्मान्नीचस्थानस्थितजले गर्तामध्ये निपतितं । ततस्तद्यानपात्रस्य तद्गर्ता-मध्याद्बहिर्निष्कासनाय नाविकैर्भूरियत्ने कृतेऽपि कथमपि तद्बहिर्न निस्ससार । व्याकुलीभूताः सर्वेऽपि यानपात्रस्थिता लोकाः [४]शान्तिकपौष्टिकादिकार्याणि कुर्वन्ति स्म । परं तानि सर्वाणि कार्याणि निष्फलानि जातानि । तदा नागदत्तस्तद्यानपात्रस्वामिनं धनदत्तश्रेष्ठिनं प्रति प्राह, 'भो धनदत्त ! इत आसन्ने शैले बहवो भारण्डपक्षिण उपविष्टा दृष्टन्ते, तेन यदि कोऽपि साहसिकः पुमांस्तत्र गत्वा तान् पक्षिणस्तत उड्डाययेत्, तदा तेषां पक्षेभ्यो बहुर्वायुरुत्पत्स्यते, तेन वायुना प्रेरितं चेदं यानपात्रं नूनमितो गर्तातो[५] बहिर्निस्सरिष्यति, एवं चैषां सर्वेषां जनानां प्राणरक्षणं भविष्यति, अन्यथात्रैव यानपात्रमध्ये वयं सर्वेषां जनानां प्राणरक्षणं भविष्यति, अन्यथात्रैव यानपात्रमध्ये वयं सर्वेऽपि प्राणरहिता भविष्यामः' । तत् श्रुत्वा तेन धनदत्तश्रेष्ठिना प्रोक्तम्, 'भो जना ! युष्मन्मध्यात् किं कोऽप्येवंविधः साहसिको जनो विद्यते ? यो नागदत्तोक्तं कार्यं कुर्यात्' ।

एवं श्रेष्ठिना कथितोऽपि कोऽप्येतत् कार्यं कर्तुमुत्साहं न करोति स्म। तदा तेन यानेशेन[६] धनदत्तश्रेष्ठिना प्रोक्तम्, 'यः कोऽपि तत्र गत्वा तान् भारण्डपक्षिण उड्डाययिष्यति तस्य नूनमहं दीनारशतं दास्ये'। तत् श्रुत्वा स साहसिको नागदत्तस्तत्र गत्वा गर्तामध्याद्यानपात्राऽऽकर्षणाय तान् भारण्डपक्षिण उड्डाययामास। तत्क्षणमेव तत्पक्षोत्पन्नेन प्रचण्डवायुना सकलमपि जलधिजलमुल्ललितम्[७]। द्रुतमेवोच्छलद्भिरुदधिजलोर्मिभिरुत्पाट्य तद्यानपात्रं गर्तातो बहिराकृष्टम्। ततः क्रमेणानुकूलवायुना प्रेरितं तत्प्रवहणं जनेप्सितस्थाने[८] सम्प्राप्तम्। अथ स नागदत्तस्तत्र शैले स्थितः क्षुत्पिपासया पीडितस्ततो निर्गमनोपायं चिन्तयति स्म, यद्यहं क्षुत्पीडयाऽत्रैव मरिष्यामि, तदार्त्तध्यानतो मे दुर्गतिर्भविष्यति, तदधुनैव परमेष्ठिनमस्कारध्यानपरो जलधिजले पतित्वात्मघातं करोमि। इति विचिन्त्य स धर्मध्यानपरो नमस्कारान् ध्यायन् झम्पां[९] दत्त्वा जलधौ निपतित एकस्य कस्यचिन्मत्स्यस्य मुखे प्रविष्टः। इतोऽसौ मत्स्योऽपि तरन् क्रमेण जलधितटे प्राप्तः, ततो यावत्तेन मत्स्येन निजं मुखं तत्र विकासितम् तावत् स नागदत्तोऽप्यवसरं लब्ध्वा द्रुतं तन्मुखादुच्छल्य बहिर्निस्ससार। ततः कस्मिंश्चिज्जलाशये गत्वा जलं पीत्वा स्वस्थीभूय[१०] स वनफलाद्याहारं चकार। एवं फलाहारादिभिः स्वनिर्वाहं कुर्वन् ग्रामाद्ग्रामं परिभ्रमन् स क्रमेण निजनगरे समायातः। ततस्तेन तत्र तस्य धनदत्तश्रेष्ठिनः (पार्श्वे पूर्वे प्रतिपन्नं दीनार[११] शतं याचितम्। परं स धृष्टो लोभाभिभूतः) श्रेष्ठी तं न किञ्चिदप्यर्पयति स्म, प्रत्युत कथयामास च। 'भो ! कस्त्वं केन दृष्टः ? अहं त्वां नोपलक्षयामि, नूनं त्वमलीक-मेव जल्पसि'। तत् श्रुत्वा मनसि दूनो नागदत्तस्तमवदत्, यदि प्रतिपन्नं दीनारशतं त्वं मे नार्पयिष्यसि, तदैतद्वृत्तान्तं राज्ञे निवेद्य त्वां दण्डयिष्यामि'। तत् श्रुत्वा तेन धृष्टेन धनदत्तेनोक्तम्, 'यदि तव शक्तिर्भवति, तदा सुखेन स्वं चिन्तितं कुरु ?' अथ धर्मध्यानपरायणः स नागदत्तः परधनपराङ्मुखः[१२] कस्यापि पतितं [१३]स्खलितं वा धनं न गृह्णाति। तेन जनमध्ये तस्य बह्वी प्रशंसा जाता। इतस्तत्रैव नगरे प्रियमित्राख्य एकः सार्थपतिर्वसति स्म, तस्यातीवरूपवती शीलादिगुणगणालङ्कृता नागवसुरित्यभिधाना तनया वर्तते क्रमाद्यौवनं प्राप्ता सर्वकलाकुशलीभूता[१४] सा

नागदत्तकीर्तिं निशम्य तमेव परिणयनार्थमुत्कण्ठिता बभूव। अथ तत्रैव नगरे वसुदेवाख्यो नगराधिपतिरक्षको वसति स्म, परं सोऽतीव धृष्टः कूटकार्यतत्परः[१५] पौराणामप्रीतिपात्रं बभूव। तेन वसुदेवेन तस्या नागवसु-कन्याया रूपं विलोक्य मोहितेन परिणयनार्थं तत्पित्रोर्याचनं कृतं, परं नागदत्तोपरि निजपुत्रीप्रेम विज्ञाय प्रियमित्रसार्थपतिना तस्मै निजकन्या न दत्ता। ततः शुभदिवसे सा नागवसुकन्या गाढप्रेमपुरस्सरं नागदत्तेन परिणीता। एनं वृत्तान्तं विज्ञायातीवमत्सराभिभूतः स वसुदेव आरक्षकस्तं नागदत्तं क्वाप्यनर्थे पातयितुं सर्वदा छलं विलोकयामास। अथैकदा तस्य नगरस्याधिपतिर्हयवाहनक्रीडार्थं नगराद्बहिरुद्याने जगाम। तत्र क्रीडां कृत्वा पश्चाद् व्यावर्तमानस्य[१५] तस्य नृपतेः कर्णतोऽनाभोगात्[१६] कुण्डलमेकंभूमण्डले निपतितम्। इतोऽदत्तादानपरिग्रहप्रत्याख्यानव्रतधारी स नागदत्तस्तस्मिन् मार्गे गच्छन्, तं कुण्डलं वीक्ष्य तं मार्गं विमच्य, मार्गान्तरेण[१७] गत्वाष्टमीदिने वनमध्ये कायोत्सर्गध्यानेन स्थितः। इतः कुण्डलगवेषणार्थं निःसृतः स वसुदेवस्तलारक्षस्तत्र[१८] मार्गे पतितं तं कुण्डलं दृष्ट्वा गृहीत्वा च विचारयामास, अहो! अद्यं तं मम वैरिणं नागदत्तं कष्टे निपातयितुं समीचीनो-ऽवसरो लब्धोऽस्ति। इति विचार्य स दुष्टस्तलारक्षस्तं कुण्डलं वस्त्रमध्ये वेष्टयित्वा[१९] यत्र स नागदत्तः कायोत्सर्गध्याने लीनः स्थितोऽस्ति, तत्र गत्वा तस्य पादाग्रे मुमोच। ततः स दुष्टस्तेन मार्गेण राजानं हयवाहनार्थं निनाय। तत्र कायोत्सर्गध्यानस्थितस्य तस्य नागदत्तस्य पादाग्रे पतितं कुण्डलोपेतं[२०] तद्वस्त्रमुत्पाट्य तन्मध्यस्थं तं रत्नकुण्डलं राज्ञे दर्शयित्वा स खसस्तलारक्षः प्राह, 'स्वामिन्! यदा राजमार्गेऽहमुपविष्टोऽभवं, तदानेन नागदत्तेन तत्र गच्छता नीचैर्विनम्य किमपि गृहीतमासीत्, अथैतद्विलोकनेन ज्ञायते यत्तेन नूनं तत्र पतितमिदं भवतां रत्नकुण्डलं गृहीतम् अथात्र मार्गेऽस्मान् आगच्छतो विलोक्य वस्त्रवेष्टितं च तं कुण्डलमत्र गुप्तीकृत्य[२१] स्वयं धूर्तीभूय[२२] धर्मध्यानच्छ-लेनास्मान् प्रतारयितुं[२३] मौनपरायणः स्थितोऽस्ति'। तलारक्षोक्तं तं वृत्तान्तं निशम्य, कुण्डलं चापि तत्रैव लब्ध्वा, तत्सर्वं सत्यं मन्यमानो भूपः क्रोधाभिभूतः सन् तं तलारक्षं प्राह। 'भो तलारक्ष! एवंविधं दम्भं कुर्वन् स ईदृशं चौर्यकर्म करोति, तस्य नूनं शूला[२४]रोपणमेव क्रियते, अतस्त्वमेनं

चौर्यकारिणं नागदत्तं शूलायामारोपयेः' इत्यादिश्य राजा स्वस्थाने ययौ। अथैवंविधं नृपादेशं निशम्य स्ववैरनिर्यातनार्थं[२५] लब्धावसरं[२६] स्वं मन्यमानः स तलारक्षो हृष्टो विडम्बनार्थं तं नागदत्तं खरोपरि आरोपयामास। ततस्तदादिष्टा राजसेवकास्तं शूलायामारोपयितुं वध्यभूमौ निन्युः। ततो वध्यवाजिन्त्रेषु वाद्यमानेषु तैर्यावत् स नागदत्तः शूलायामारोपितस्तावत्सा शूला सुवर्णसिंहासन-रूपा जाता, तैर्मुक्ताः प्रहाराश्चाप्याभूषणरूपा जाताः तद् दृष्ट्वाश्चर्यं प्राप्तास्ते सर्वेऽपि राजपुरुषा भयभीता जाताः। ततः क्रमेण तदाश्चर्यं विलोकयितुं बहवो नागरिकास्तत्र समायाताः। क्रमेणाकर्णितैतद्वृत्तान्तो राजापि तत्र सम्प्राप्तः, तदा नागदत्तपुण्याकृष्टया शासनदेवतया तत्रागत्य व्योमस्थितया[२७] नृपादीनां सर्वेषां नागरिकाणां समक्षं प्रोक्तम्, 'भो लोकाः! अयं नागदत्तो महाभाग्यवान् विद्यते, अयं च महान् पुरुषोत्तमोऽस्ति, यतोऽसौ प्राणात्ययेऽपि[२८] परकीयं वस्तु न गृह्णाति। पुरापि धनदत्तश्रेष्ठिनास्यार्पणाय स्वयं प्रतिपन्नं दीनारशतमपि नार्पितमस्ति,' इत्युक्त्वा शासनदेव्या तस्य नागदत्तस्य सर्वोऽपि वृत्तान्तो जनानामग्रे कथितः, एवं तेन दुष्टेन वसुदेवतलारक्षेण विहितमेनं सर्वमपि छलं प्रकटीकृत्य[२९] सा शासनदेवताऽदृश्यीभूता। एतं वृत्तान्तं निशम्य राजादयः सर्वेऽपि लोका आश्चर्यं प्राप्ताः। अथ राजापि क्षमायाचनपूर्वकं तं नागदत्तं सन्मान्य पट्टकुञ्जरारूढं विधाय महोत्सवपुरस्सरं स्वगृहे समानीय बहुद्रव्य-दानादिना सन्मानयामास, यतः-

**धम्मो मंगलमउलं, ओसहमउलं च सव्वदुक्खाण।**
**धम्मो बलं च विउलं, धम्मो ताणं च सरणं च ॥१॥**

**धम्मो मंगलमुक्किट्ठं अहिंसा संजमो तवो।**
**देवावि तं नमंसंति, जस्स धम्मे सया मणो ॥२॥**

ततो राजा तं धनदत्तं व्यवहारिणं निजपार्श्वे समाह्वयत्। तदा सोऽपि भयेन कम्पमानशरीरो नृपाग्रे समागत्य निजापराधक्षमायाचनपूर्वकं तस्मै नागदत्ताय दीनारशतं समर्पयामास। ततः क्रुद्धोऽसौ राजा तं दुर्जनं वसुदेवाभि-

धमारक्षकं स्वदेशान्निष्कासयामास । यतः-

**अधर्माल्लभते जन्तु-र्दुःखरोगादिसन्ततिम् ।**
**अल्पायुस्त्वम[३०]सन्मानं, दौर्भाग्यं निःस्वतां पुनः ॥१॥**

ततो नृपादि[३१] नागरजनैरतीवसन्मानितोऽसौ नागदत्तो जैनधर्माराधन-परस्तया नागवसुप्रियया सह भोगविलासान् भुङ्क्ते स्म । एवं चिरं जैनधर्म-माराध्य प्रान्ते च प्रव्रज्यां गृहीत्वा स तीव्रतपोऽसिना[३२] कर्मारीन् विदारयन् प्रान्ते केवलज्ञानमाप्तवान् । ततोऽसौ नागदत्तः केवली, चन्द्रमा इव भासुरो महीमण्डले भूरिभव्यजनकुमुदवनानि निजवचनकिरणैः प्रतिबोधयन् सर्वकर्म-क्षयान्मुक्तिं जगाम ॥

**: अभ्यास :**

प्रश्नः १. यानस्थितलोकाः कथं व्याकुलीभूताः?

२. द्रव्योपार्जनार्थं जलधिमध्ये गच्छन्तं नागदत्तं कानि दुःखानि आगतानि ?

३. वसुदेवस्य नागदत्तोपरि कथं वैरं जातम् ?

४. शूलायाम् आरोपितस्य नागदत्तस्य शूला सुवर्णसिंहासनरूपा कथं जाता ?

५. शासनदेवता नागरिकेभ्यः किं प्रोक्तवती ?

६. अस्याम् वार्तायाम् कस्य व्रतस्य महिमा वर्णितः ?

७. धर्मः कीदृग् ? तस्य कः प्रभावः ?

**इति अदत्ताऽग्रहणफलोपदर्शने श्रीनागदत्तकेवलिचरित्रं समाप्तम् ॥**

१. मुक्तिरेव कमलामुक्तिकमला । ( अवधारण पूर्व क. ) ताम् मुक्तिकमलाम् । મુક્તિરૂપી લક્ષ્મીને ॥ २. पञ्चत्व नपुं.-મરણ ॥ ३. प्रवहण नपुं.-જહાજ ॥ ४. शान्तिकञ्च पौष्टिकञ्च शान्तिकपौष्टिके । ( इ. द्वन्द्व. ) शान्तिकपौष्टिके आदौ येषाम् तानि शान्तिकपौष्टिकादीनि ( ब. व्री. ) शान्तिकपौष्टिकादीनि च तानि कार्याणि च शान्तिपौष्टिकादिकार्याणि । ( वि. पू. क. ) શાંતિ-પુષ્ટિ આદિ કરનારા

કાર્યો ॥ ५. गर्ता स्त्री.-ખાડો ॥ ६. यानेश पुं.-જહાજનો માલિક ॥ ७. उच्छलित वि. ઉછળ્યું ॥ ८. जनैः ईप्सितम् जनेप्सितम् । ( तृ तत्पु. ) जनेप्सितञ्च तद् स्थानञ्च जनेप्सितस्थानम् ( वि. पू. क. ) तस्मिन् जनेप्सितस्थाने । માણસો વડે ઇચ્છાયેલા સ્થાને ॥ ९. झम्पा स्त्री.-કુદકો ॥ १०. अस्वस्थः स्वस्थ भूत्या स्वस्थीभूय । ( च्वि. स. ) સ્વસ્થ થઈને ॥ ११. दीनार पुं. સોનામહોર ॥ १२. परस्य धनम्परधनम् । ( ष तत्पु. ) पराक् मुखम् यस्य सः पराङ्मुखः । ( बहु. ) परधने पराङ्मुखः परधनपराङ्मुखः । ( स. तत्पु. ) ॥ બીજાના ધનમાં નિઃસ્પૃહ १३. स्खलितं ભૂ.કૃ.-ભૂલાયેલું ॥ १४. अकुशला कुशला इव भूता कुशलीभूता । ( च्वि. स. ) કુશળ થયેલી ॥ १५. कूट वि. ખરાબ ॥ १५. व्यावर्तमान वि. પાછા વળતાં ॥ १६. अनाभोग पुं. અનુપયોગ ॥ १७. अन्यः मार्गः मार्गान्तरम् (મયૂર. વ્યંસક) तेन मार्गान्तरेण બીજા માર્ગે. १८. तलारक्ष पुं. કોટવાળ ॥ १९. वेष्टयित्वा સં.ભૂ. -લપેટીને ॥ २०. कुण्डलेन उपेतम् कुण्डलोपेतम् [ तृ. तत्पु. ] કુંડલથી યુક્ત ॥ २१. अगुप्तं गुप्तं कृत्वा-गुप्तीकृत्य । ( च्वि. व. ) ગુપ્ત કરીને ॥ २२. अधूर्त्तः धूर्त्तः भूत्वाधूर्त्तीभूय । [ च्वि ] ધૂર્ત થઈને । २३. प्रतारयितुम् हे.कृ. ॥ છેતરવા માટે ॥ २४. शूला स्त्री-શૂળી ॥ २५. निर्यातन નપું-બદલો. ॥ २६. लब्धः अवसरः येन सःलब्धावसरः । ( बहु ) तम्-लब्धावसरम् । પ્રાપ્ત કરાયો છે અવસાર જેના વડે એવા તેને ॥ २७. व्योम्नि स्थिता व्योमस्थिता ( स. तत्पु. ) तया-व्योमस्थितया । આકાશમાં રહેલી તેણી વડે. ॥ २८. अत्ययपुं. નાશ ॥ २९. अप्रकटं प्रकटं कृत्वा प्रकटीकृत्य । ( च्वि. ) પ્રગટ કરીને ॥ ३०. अल्पम् आयुः अल्पायुः । [ वि.पू.क. ]अल्पायुषः भावःअल्पायुस्त्वम् । ( तद्धित ) અલ્પાયુપણાને ॥ ३१. नगरे भवः नागरः ( तद्धित. ) નગરજન ३२. तीव्रम् च तत् तपश्चतीव्रतपः । ( वि. पू. क. ) तीव्रतपः एव असिःतीव्तपोऽसि । तेन तीव्रतपोऽसिना । [ अव. पू. क. ] તીવ્ર તપરૂપી તલવારથી.

• • •

## [ ७ ]

# ॥ श्रीवङ्कचूलचरित्रम् ॥

अत्रैव भारते वर्षे विमलो नाम राजाऽभूत्, तस्य सुमङ्गला नाम्नी प्रिया, तयोश्चापत्यद्वयं जातम्, तत्रैकः पुष्पचूलनामा पुत्रः, द्वितीया च पुष्पचूला नाम्नी कन्यका । यौवने च पित्रैका राजकन्या पुत्राय परिणायिता, पुत्री तु कस्मैचिद्राजपुत्राय दत्ता, परं दुष्कर्मोदयाद् बाल्ये एव पत्युर्मरणात्सा वैधव्यं प्राप्ता, भ्रातृस्नेहात् पितुर्गेहे एवास्थात् । अथ पुष्पचूलस्तु चौर्यादिव्यसनासक्तत्वेन[१] पौरजनानत्यन्तं[२] पीडयन् लोके वङ्कचूलाख्यां प्राप्तः तद्भगिन्यपि तत्समानबुद्धित्वेन वङ्कचूलेति प्रसिद्धाऽभवत् । ततो राज्ञा लोकतस्तस्योपालम्भं बहुतरमाकर्ण्य क्लिष्टेन सता स पुराद् बहिष्कृतः, तदा पत्नीभगिन्यावपि तत्स्नेहात् सार्थे निर्गते । ततो वङ्कचूलः पत्नीभगिनीभ्यां सह निर्भयः सन् कानिचिरदण्यानि भ्रमन् धनुर्धरैर्भिल्लैर्दृष्टः, तत्र चाऽऽकृत्यैव तं राजपुत्रं ज्ञात्वा, सादरं प्रणम्य, प्रश्नपूर्वकं तद्वृत्तान्तम् आकर्ण्य, बहुमानतः स्वपल्लीं समानीय, मूलपल्लीपतेर्मृतत्वात् तत्स्थाने तं ते स्थापितवन्तः । ततो वङ्कचूलो भिल्लैः सार्धं महीतलं लुण्टन् तत्र सुखेन तस्थौ ।

अथैकदा वर्षाप्रादुर्भावसमये[३] कियद्भिर्मुनिभिः परिवृताः श्रीचन्द्रयशः-सूरयः सार्थपरिभ्रष्टास्तत्र समेताः, तदा नव्योत्पन्नाङ्कुरसम्मर्दात्[४] सचित्तजलसङ्घट्टाच्च भीरव आचार्या विहाराऽयोग्यतां ज्ञात्वा तां पल्लीं प्रविष्टाः । वङ्कचूलोऽपि मुनीन् दृष्ट्वा कुलीनत्वात् प्रणमति स्म । तदा गुरवो धर्मलाभाशिषं[५] दत्त्वा तं प्रति वसतिं ययाचिरे, तेनाप्युक्तम्, हे स्वामिन् ! तुभ्यं वसतिं दास्यामि, परं मम सीमायां कदापि धर्मो न वाच्यः, यतो येषां हिंसाऽसत्यचौर्यादीनां त्यागेन धर्मः सम्पद्यते, तैरेवास्माकमाजीविका विद्यते इति, एवं तेनोक्ते सति गुरुभिस्तद्वचोऽङ्गीकृत्य तद्दर्शितनिरवद्यस्थानके[६] स्वाध्यायध्यानादिधर्मकृत्यं कुर्वद्भिश्चतुर्मासान् यावत्तस्थे । तत्र च

तेनाहारादिनिमन्त्रणायां कृतायां गुरुभिरुक्तम्, 'भवदीयगृहभिक्षाऽस्माकं न कल्पते, वयं तपश्चर्ययैवेह स्थिताः सुखेन कालं गमयिष्यामः, भवतो हि उपाश्रयदानेनैव महापुण्यसम्बन्धो जातः ।'

**उक्तञ्च- "जो देइ उवस्सयं मुणिवराण तवनियमजोगजुत्ताणं ।**
**तेणं दिन्ना वत्थन्नपाणसयणासणमविगप्पा ॥१॥**
**पावइ सुरनररिद्धी सुकुलुप्पत्ती य भोगसामग्गी ।**
**नित्थरइ भवमगारी सिज्जदाणेण साहूणं ॥२॥**

ततो वर्षाकालेऽतिक्रान्ते गुरुभिस्तं वङ्कचूलमापृच्छ्य विहारे क्रियमाणे सोऽपि तेषां सत्यप्रतिज्ञतादिगुणैर्हृष्टः[7] सन् भक्त्या तान् गुरूनन्वगात्। तत्र कियत्यपि मार्गे गते सति स चिरस्थितमुनिवियोगविह्वलः सन्, गुरून् नत्वा व्यजिज्ञपत् 'स्वामिन्नितः परं परेषां सीमा विद्यते, अतोऽहं वलिष्ये, पुनर्मम भवद्दर्शनं सद्यो भवतात्,' एवं तेनोक्ते सति गुरवो मधुराक्षरैस्तं प्रोचुः, 'हे सौम्य ! भवत्साहाय्याद्वयमियत्कालं सुखं स्थिताः, अथ यदि तुभ्यं रोचते तर्हि प्रत्युपकर्त्तुं किञ्चिद्ब्रूमः,' तेनोक्तं 'यादृग्मया सुखेन पालयितुं शक्यते, तादृशेनैव वचसा मयि प्रसादो विधीयताम्,' तदा गुरुभिरुक्तं

"यस्याभिधानं केनापि न ज्ञायते तत्फलं त्वया न भक्षणीयम् १ तथा कर्हिचित्परं[8] प्रहर्त्तुमिच्छता सप्ताष्टौ पदानि अपसर्त्तव्यम् २ तथा राज्ञः पट्टदेवी मातृवद् गणनीया ३ अथ वायसामिषं[9] कदापि न भक्षणीयम् ४ एते चत्वारोऽप्यभिग्रहास्त्वयैकचित्तेन पालनीयाः, एतत्पालने तवोत्तरोत्तरं महालाभो भावी' । ततः सोऽपि गुरुवचसा नम्रीभूतः[10] सन् महाप्रसाद इत्युक्त्वा आत्मोपकारिणस्तान् चतुरोऽपि नियमान् गृहीत्वा स्वस्थानमायातः, गुरवोऽपि विहारं कृत्वाऽन्यत्र गताः ।

अथैकदा ग्रीष्मर्तौ स पल्लीपतिर्भिल्लसेनापरिवृतः सन् कञ्चिद् ग्रामं हन्तुमचलत्, परं कुतोऽपि तद्वृत्तान्तमवगम्य स ग्रामः पूर्वमेव पलाय्य गतः । तदा वङ्कचूलः सपरिच्छदो[11] व्यर्थीभूतपरिश्रमः क्षुधातृषाभिभूतश्च सन् मध्याह्ने

ततो व्यावृत्त्याटव्यां कस्यापि तरोरधस्तान्निषण्णः, तत्र च क्षुधापीडितैः कियद्भिर्भिल्लैरिस्ततो भ्रमद्भिः क्वापि निकुञ्जे[१२] सुरभिगन्धसद्वर्णपरिपक्व-फलैर्नम्रीभूतं किम्पाकतरुं वीक्ष्य सद्यस्तत्फलानि समादाय वङ्कचूलाग्रे ढौकितानि, तेन च स्वनियमं स्मृत्वा तन्नाम पृष्टम्, तैरुक्तं स्वामिन्नेषां नाम तु केनापि न ज्ञायते। परं स्वादुत्वमधिकं विद्यते, अतो भक्षणीयानि। तेनोक्तमज्ञातं फलमहं नाश्नामि, ममायं नियमोऽस्ति।' ततः पुनस्ते साग्रहं प्रोचिरे 'स्वामिन्! सौस्थ्ये[१३] नियमाग्रहः क्रियते, साम्प्रतं प्राणसन्देहे कोऽयं नियमाग्रहः ? तस्मादेतानि भक्षय' इति तद्वचः श्रुत्वा क्षुत्पीडितोऽपि सन् सधैर्यं प्राह, 'भो! इदं वचो न वक्तव्यम्, यदि, प्राणा यान्ति, तर्हि अधुनैव यान्तु, परं स्ववाचा गुरुसमक्षं स्वीकृतो नियमः स्थिरीभवतु'। ततस्ते सर्वेऽपि भिल्लास्तानि फलानि स्वैरं भक्षयित्वा तृप्ताः सन्तस्तरुच्छायासु स्वपन्ति स्म। परमेकः सेवको वङ्कचूलस्यानुरोधेन[१४] तानि न भुक्तवान्।

अथ स्वयं शयित्वोत्थितः पल्लीशः स्वपार्श्वे सुप्तं भृत्यमुत्थाप्येति प्रोचिरे, 'भो! सर्वान् शीघ्रं जागरय, यथा स्वस्थानं गच्छामः'। तेनापि शब्देन करस्पर्शेन च सर्वेऽप्युत्थापिताः, परं कथमपि नोत्तिष्ठन्ति स्म। तदा तान् सर्वानपि गतप्राणान्[१५] मत्वा पल्लीशाय तत्स्वरूपं निवेदितम्, सोऽपि श्रुत्वा विस्मितः सन् स्वनियमं सफलीभूतममंस्त। ततोऽहो गुरूवाण्या माहात्म्यं, यत्स्वल्पयाऽपि तयाऽधुनाहं जीवन् रक्षितो। मया निर्भाग्येन प्राक्सर्वेष्ट-सिद्धिविधायकः कल्पतरुरिवाकस्मादुपस्थितः श्रीगुरूणां वाक्प्रसरो[१६] वृथैव वर्जित इत्यादि चित्ते विभावयन्, स पल्लीशो हर्षविषादाभ्यां सह रात्रौ स्वपल्लीं सम्प्राप्तः। तत्र च स्वगृहचरितं द्रष्टुं प्रच्छन्नवृत्त्या गृहमध्ये प्रविश्य दीपक-प्रकाशात्पुरुषवेषया स्वभगिन्या सह सुप्तां स्वभार्यां दृष्ट्वा चिन्तयामास, एषा मे स्त्री दुराचारिणी,[१७] अयं च कोऽपि दुराचारः पुमान् विद्यते एतौ दुष्टौ आशु[१८] मारयामीति विचिन्त्यैकप्रहारेण तौ हन्तुं यावत्खड्गमुत्पाटितवान् तावदस्य द्वितीयो नियमः स्मृतिमागतः, तदा पदसप्तकमपसरतस्तस्य क्रोधाकुलस्य खड्गो द्वारदेशे स्खलितः,खड्गखाट्कारेण च सद्यो जाग्रता वङ्कचूला, 'हे भ्रातश्चिरं जीव' इत्यजल्पत्, ततो भगिनीं विज्ञायातिलज्जितः, स खड्गं संवृण्वन्

तां पुंवेषरचनाकारणं[१९] पप्रच्छ। साऽप्यूचे, 'हे भ्रातरद्य सायंकाले त्वां द्रष्टुं नटवेषधरास्तव शत्रूणां चराः[२०] समाजग्मुः, तदा मया चिन्तितम्, भ्राता तु सपरिच्छदः[२१] क्वापि गतोऽस्ति, यद्येतेऽपीदं ज्ञास्यन्ति तर्हीयमनाथा पल्ली शत्रुभिः पराभविष्यति, तस्मात् कोऽप्युपायः कार्य इति विचिन्त्याहं कैतवात्त्व-द्वेषधारिणीभूया सभायामुपविश्य तान् नृत्यं कारयित्वा क्षणाद्यथार्हदानतो [२२]विसर्ज्यालस्यादपरित्यक्तपुंवेषैव भ्रातृजायया समं सुप्ता,' एतद्वृत्तान्तं श्रुत्वा वङ्कचूलो गुरुप्रसादादात्मानं भगिन्यादिहत्यापापादलिप्तं विभावयन् विशेषतो गुरुवाण्याः प्रशंसां चकार।

अथैकदा स चौर्यार्थमुज्जयिनीं पुरीं ययौ, तत्र चार्धनिशायां कस्यापि धनिनो व्यवाहिरणो गृहे प्रविष्टः, परं कपर्दिद्व्ययभ्रान्त्या पुत्रेण सह विवदमानं[२३] गृहपतिं विलोक्य धिगेतादृशां धनमिति विचिन्तयन् ततो निर्गतः, ततः स्तोकं स्तोकं जनाद्याचयित्वा सम्प्राप्तसम्पत्तिलवानां[२४] द्विजानां धनेनाप्यलमिति विचिन्त्य तद्गृहाण्यपि मुक्तवान्, तदनन्तरं या ईषद्धनलिप्सया रमणीयं स्वशरीरमनपेक्ष्य कुष्ठिनमपि सेवन्ते तासां वेश्यानां धनेनापि मे न कार्यमिति विचारयन् तद्गृहाण्यपि विमुच्य नृपगृहसमीपमागत्य चिन्तयति स्म-

**"चौर्यमाचर्यते चेत्तल्लुण्ट्यते खलु भूपतिः।**
**फलते धनमक्षीण-मन्यथापि चिरं यशः" ॥१॥**

इति विचिन्त्य वनाद् गोधामादाय[२५] तत्पुच्छलग्नः[२६] सन् राज्ञः सौधाग्रमारुह्यावासभुवने[२७] प्रविष्टः, तत्र चाद्भुतरूपधारिणी राज्ञः पट्टदेवी दृग्गोचरमायाता तया च कथितम्, 'कस्त्वं, किमर्थमत्रायातोऽसीति' प्रोक्तः सन्स प्रोचे 'अहं तस्करोऽस्मि, बहुतरं मणिरत्नादिद्रव्यं वाञ्छन् इहागतोऽस्मि,' ततस्तद्रूपलुब्धया राज्ञ्या मृदुवाण्या प्रोक्तम् 'हे सौम्य ! द्रव्यस्य का वार्त्ता, एतत्सर्वं तवैवास्ति, अथ किं कम्पसे, सुस्थो[२८] भव, तव कुलदेवता तुष्टा, यदहं राज्ञः पट्टदेवी तव वश्या जाताऽस्मि, मयाऽद्य सौभाग्यगर्वेण राजाऽपि रोषितोऽस्ति, तादृश्या मया सह त्वमात्मानं सफलय, मयि तुष्टायां प्राणि-नामर्थकामौ सुलभौ स्तः, मयि रुष्टायां तु सद्यो वधबन्धावेव स्याताम्,' इत्थं

कामग्रहग्रस्तया तया लोभितः क्षोभितश्चापि वङ्कचूलः स्वकृतं तृतीयं नियमं स्मरन् तां नत्वा जगाद, 'हे मातः ! त्वं मम पूज्याऽसि, मयि वन्ये तत्सकरे राजवल्लभायास्तव का स्पृहा ?' सा प्रोचे, 'अरे वाचाल बाल ! मयि कामुक्यां[२९] मातृसम्बन्धं योजयन् त्वं किं न लज्जसे ? अथ चेन्मद्वाक्यं न मन्यसे तर्हि अद्य त्वदुपरि यमो रुष्टः,' इत्थं तया विविधवचोयुक्त्या भापितोऽपि स यावन्न चुक्षोभ तावत्क्रोधाकुला सा नखैर्निजदेहं विदार्योच्चैः पूच्चकार। अयं च सर्वोऽपि वृत्तान्ते गृहद्वारं सम्प्राप्तेन राज्ञा कपाटविवरे[३०] कर्णं संस्थाप्य स्वयं शुश्रुवे, तावत्कलकलारावे जाते सति जाग्रतो द्वारपालकाः शस्त्राणि गृहीत्वा धाविताः, तदा राज्ञा मन्दस्वरेण तेभ्यः प्रोक्तं, 'भो ! निरपराधोऽयं[३१] तस्करः, साम्प्रतमीषद् बद्ध्वा यत्नेन रक्षणीयः, प्रातःकाले च सभायां ममाग्रे आनेतव्यः,' तैरपि तथेति प्रतिपन्नम्, ततो राज्ञा सन्तप्तचेतसा तादृशं स्वमहिषीवृत्तान्तं चिन्तयता कथञ्चित् सा रात्रिरतिक्रान्ता, अथ प्रातःसमये आरक्षकैः स श्लथबन्धनैर्बद्ध्वा नृपाग्रे आनीतः, नृपेण च साक्षेपं पृष्टः सन् स स्पष्टतया सर्वमपि यथावस्थितं वृत्तान्तं राज्या मधुरवाण्याऽहं जल्पित इत्येतत्पर्यन्तमुक्त्वा मौनमभजत्। ततो विज्ञातपरमार्थो राजा तुष्टमानसः सन् एनं सत्कृत्य भूरि मुदा चालिङ्ग्य प्रोवाच। 'हे सत्पुरुष ! तव साहसेनाहं तुष्टोऽस्मि। तत एषाऽग्रमहिषी मया तुभ्यं प्रासादिता। त्वमेनां गृहाण'। स प्रोचे, 'राजन् ! या ते पट्टराज्ञी सा मे ध्रुवं माता, तस्मादेतद्वचः पुनर्न वाच्यम्,' ततो राज्ञा शूलारोपणाद्युपदेशेन बहुधा क्षोभितोऽप्यसौ यदा नियमान्न चलितः, तदाऽस्य धीरत्वेनातिसन्तुष्टो राजा एनं पुत्रपदे स्थापितवान्, तां स्त्रियं च हन्तुमिच्छन्नपि अस्य वचसा जीवन्तीममुञ्चत्, ततो वङ्कचूलः स्वस्य भगिनीं पत्नीं च तत्रानाय्य ताभ्यां सहितः सुखेनास्थात्, तथा धर्मे सञ्जातप्रत्ययः सन् विशेषतस्तत्रैव चित्तवृत्तिं बबन्ध, तान् नियमदातारं गुरुंश्च नित्यं सस्मार। एकदाऽस्य भाग्योदयात्त एवाचार्यास्तत्र समेताः, अयं च महताऽऽम्बरेण गुरुवन्दनार्थं गतः, तत्र शुद्धं धर्मस्वरूपं श्रुत्वा तत्त्वरुचिरूपं सम्यक्त्वं सः प्रपन्नवान्। तदा चोज्जयिनीपार्श्ववर्त्तिशालिग्रामनिवासी जिनदासाख्यः श्रावकस्तस्य परम-मित्रमभूत्।

एकदा राज्ञा कामरूपदेशाधीशं सुदुर्जयं[३२] मत्वा तज्जयार्थं वङ्कचूलः समादिष्टः, तदा सोऽपि नृपादेशात् तत्र गत्वा युद्धं कृत्वा कामरूपेशं विजित्य स्वयं च वैरिकृतशस्त्रप्रहारैर्जर्जरः[३३] सन् उज्जयिनीं पुरीं समाजगाम। तत्र च राज्ञैतत्पीडया पीडितेन बहून् वैद्यानाकार्य तैरस्य चिकित्सा कारिता। परं कथमपि प्रहारा न संहिताः[३४], तदा राज्ञा सरोषं पृष्टैर्वैद्यैर्नृपाग्रे काकमांसमौषधं प्रोक्तम्, तत् श्रुत्वा राजा वङ्कचूलं गाढमालिङ्ग्य साश्रुलोचनः सन् इत्थं प्रोवाच – 'हे वत्स ! त्वदापदं छेत्तुं ये ये प्रतीकाराः कृतास्ते सर्वेऽपि ममाभाग्याद् वृथा जाताः। अथैकं वायसामिषं भेषजं विद्यते तद् गृहाण, येन ते शरीरे सौस्थ्यं स्यात्,' स प्रोचे, 'हे नाथ ! अहं सर्वथा मांसभक्षणान्निवृत्तोऽस्मि, ततो मे वायसामिषान्न कार्यम्,' राज्ञोक्तं 'वत्स ! जीवतो जन्तोर्नियमा बहुशो उपाय भवेयुः, परं मृते सति सर्वे यान्ति तस्मादिदं भक्षय,' तदा स नृपोक्तं वचो निशम्य प्रोचे, 'हे नाथ ! मम जीविते स्वल्पाऽपि तृष्णा नास्ति, एकदाऽवश्यं मृत्युर्भावी, तस्माज्जीवितं याति चेत् अधुनैव यातु, परमेतदकृत्यमहं न कुर्वे, ततो राजा वङ्कचूलस्य मित्रं शालिग्रामवर्त्तिनं जिनदासश्रावकमाह्वातुं निजं नरं प्रैषीत्, सोऽपि मित्रस्नेहात् सद्यस्ततश्चलितो मार्गे च रोदनोद्यतं[३५] दिव्यं स्त्रीद्वयं विलोक्य के युवां ? किं वा रुदिथः ?' इति पप्रच्छ, ताभ्यामुक्तमावां सौधर्मकल्पवासिन्यौ देव्यौ भर्तुश्च्यवनाद् विरहविह्वले सत्यौ वङ्कचूलाख्यं क्षत्रियं भर्त्तारं प्रार्थयावहे, सोऽद्य त्वद्वचसा चेन्नियमं भङ्क्षयति, तर्हि आशु दुर्गतिं गन्ता, तेन सम्प्रति रुदिवः' । ततो जिनदासेनोक्तम्–'मा रोदिष्टं यद् भवत्योरिष्टं तदेव करिष्यामि' इत्युक्त्वा ते आश्वास्य स श्राद्ध उज्जयिनीं समाजगाम। तत्र च तेन नृपादेशान्मित्र-मन्दिरमागत्य कुशलप्रश्नपूर्वकमौषधादिप्रवृत्तिं कुर्वता तस्य नियमेऽतिस्थिरत्वं विज्ञाय शरीरं च जर्जरीभूतं विलोक्य [३६]राजादिसर्वलोकसमक्षं प्रोक्तम्, अस्य धर्म एवौषधं युक्तम्, अतोऽपरा काऽप्यौषधादिप्रवृत्तिर्न कार्या, वङ्कचूलेनापि प्रोक्तम्, हे मित्र ! यदि त्वं मयि स्नेहं दधासि तर्हि आलस्यं विहाय मे प्रान्तकालस्य शम्बलं देहि, ततस्तेनापि सम्यग् रीत्याऽऽराधना कारिता, तदा वङ्कचूलश्चतुर्विधाहारप्रत्याख्यानं कृत्वा चतुःशरणानि स्वीकृत्य पञ्चपरमेष्ठि-नमस्कारं स्मरन्, सर्वजीवेषु निर्वैरतां दधत्, प्राकृतं दुष्कृतं निन्दन्, सुकृतं

चानुमोदयन्, समाधिना कालं कृत्वा द्वादशे देवलोके देवत्वं सम्प्राप्तः । ततो जिनदासस्तस्यौर्ध्वदेहिकं[३७] कृत्वा गृहे व्रजन् मार्गे ते द्वेऽपि देव्यौ पूर्ववद्रुदत्यौ वीक्ष्य पृष्टवान्, 'हे भद्रे ! अद्यापि युवाभ्यां किमर्थमत्रैवं विलप्यते । सोऽखण्डितव्रतः सन् इतो मृत्वा भवत्योर्वल्लभः किं न जातः ?' तदा ते देव्यौ निःश्वस्योचतुः, हे स्वच्छाशय ! किं पृच्छसि, स ते सुहृत्प्रान्ते परिणाम-विशुद्ध्याऽस्मान् व्यतीत्य द्वादशं स्वर्गं जगाम, एतत् श्रुत्वा परमानन्दं सम्प्राप्तो जिनदासः सुहृदं ध्यायन् श्रीजिनधर्मं चानुमोदयन् स्वगृहं ययौ ।

**: अभ्यास :**

प्रश्नः १. केन कारणेन पुष्पचूलस्य अभिधानं वङ्कचूलो जातम् ?

२. वङ्कचूलः कस्य सकाशात् कान् चतुरः नियमान् जग्राह ?

३. चातुर्मासादौ आगताचार्यभगवद्भ्यः वङ्कचूलेन किं कथितम् ?

४. केन नियमेन वङ्कचूलः नृपस्य पुत्रः अभवत् ?

५. जिनदासश्रावककारिता वङ्कचूलस्यान्तिमाराधना ज्ञाप्यताम् ?

६. द्वे द्वेव्यौ केन कारणेन अरुदताम् ?

**॥ इति नियमपालेन वङ्कचूलवृत्तान्तः सम्पूर्णः ॥**

१. चोरस्य भावः चौर्यम् । ( तद्धित. ) चौर्यम् आदौ यस्मिन् तद्चौर्यादि । ( ब. व्री. ) चौर्यादिनः व्यसन् चौर्यादिव्यसनम् । ( ष. तत्पु. आसक्तस्य भावः आसक्तत्वम् ।( तद्धित. ) चौर्यादिव्यसने आसक्तत्वम् चौर्यादिव्यसनासक्तत्वम् ।( सप्त. तत्पु. ) तेन चौर्यादिव्यसनासक्तत्वेन । ચૌરી આદિ વ્યસનમાં આસક્તપણાથી. ॥ २. पुरे भवाःपौराः ।( तद्धित. ) पौराश्चामी जनाश्च पौरजनाः ।( वि. पू. क ) तान् पौरजनान् ॥ ३. प्रादुर्भावपुं. પ્રગટ ॥ ४. नवस्य भावानिनव्यानि । ( तद्धित. ) नव्यानि उत्पन्नानि नव्योत्पन्नानि ।( वि. उभ. क. ) नव्योत्पन्नानि च तानि अङ्कुराणि च नव्योत्पन्नाङ्कुराणि । ( वि. पू. क. ) नव्योत्पन्नाङ्कुराणां सम्मर्दः नव्योत्पन्नाङ्कुरसम्मर्दः । ( ष. तत्पु. ) तस्मात् नव्योत्पन्नाङ्कुरसम्मर्दात् । નવા ઉત્પન્ન થયેલા અંકુરાઓના દબાવાથી । ५. धर्मस्य लाभः धर्मलाभः । ( ष. तत्पु. ) धर्मलाभस्य-आशीःधर्मलाभाशीः । ( ष. तत्पु. ) ताम् धर्मलाभाशिषम् ॥ ६. तेन दर्शितम्तद्दर्शितम् । ( तृ. तत्पु. ) निर्गतम् अवद्यम् यस्मात् तद्निरवद्यम् ।( प्रादि. बहु. ) निरवद्यश्च तद् स्थानकञ्चनिरवद्यस्थानकम् ।( वि.पू. कर्म. ) तद्दर्शितञ्च तद् निरवद्यस्थानकञ्च तद्द र्शितनिरवद्यस्थानकम् । ( वि. पू. क. ) तस्मिन्

तद्दर्शितनिरवद्यस्थानके । તેના વડે બતાવાયેલ નિરવદ્ય સ્થાનમાં । ७. सत्या प्रतिज्ञा यस्य ससत्यप्रतिज्ञः (બ.વ્રી.) तस्य भावःसत्यप्रतिज्ञता. सत्यप्रतिज्ञता अदौ येषां तेसत्यप्रतिज्ञतादयः (બ.વ્રી.) सत्यप्रतिज्ञतादयश्चामी गुणाश्च सत्यप्रतिज्ञतादिगुणाः तैः ८. कर्हिचित्अव्य. ક્યારે પણ ९. वायसपुं. કાગડો । १०. नमति इत्येवंशीलःनम्रः । न नम्रःअनम्रः । ( नञ् तत्पु. ) अनम्रः नम्रः इव भूतःनम्रीभूतः । ( च्वि. ) નમ્ર થયેલો । ११. परिच्छद पुं. - પરિવાર । १२. निकुञ्ज पुं. - લતા-મંડપ । १३. सुस्थस्य भावः सौथ्यम् । ( तद्धित. ) तस्मिन्सौस्थ्ये સ્વસ્થતામાં । १४. अनुरोधपु. - આગ્રહ । १५. गताः प्राणाः येषान्ते गतप्राणाः तान् - गतप्राणान् । ( समा. बहु. ) મૃત્યુ પામેલાઓને । १६. प्रसर पुं. વિસ્તાર । १७. दुष्टश्चासौ आचारश्चदुराचारः । ( वि. पू. कर्म ) दुराचारः अस्ति यस्याः सादुराचारिणी । ( तद्धित. ) १८. आशुअव्य જલ્દી । १९. पुंसः वेषः पुंवेषः । ( ष. तत्पु. ) पुंवेषस्य रचनापुंवेषरचना ( ष. त. ) पुंवेषरचनायाः कारणम् पुंवेषरचनाकारणम् । ( ष. त. ) तद् । પુરુષ વેષની રચનાનું કારણ । २०. चरपुं.- ચરપુરુષ । २१. परिच्छद पु.- પરિવાર । २२. न परित्यक्तःअपरित्यक्तः ( नञ्. तत्पु. ) अपरित्यक्तः पुंवेषः यया साअपरित्यक्तपुंवेषा । ( समा. बहु. ) નથી ત્યાગ કરાયો પુરુષવેષ જેણી વડે એવી ॥ २३. विवदमान व. कृदन्त. - ઝઘડા કરતો ।. २४. सम्यक् प्राप्तासम्प्राता । ( प्रादि. क. ) सम्प्राप्ता च सा सम्पत्तिश्च सम्प्राप्तसम्पत्तिः ( वि. पू. क. ) सम्प्राप्तसम्पत्तेः लवः येषान्तेसम्प्राप्तसम्पत्तिलवाः । ( व्यधि. बहु ) तेषाम् सम्प्राप्तसम्पत्तिलवानाम् । સારી રીતે પ્રાપ્ત કર્યા છે સંપત્તિના અંશો જેણે એવા (તે બ્રાહ્મણો) ॥ २५. गोधास्त्री ઘો ॥ २६. तस्याः पुच्छम्तत्पुच्छम् ( ष. तत्पु. ) तत्पुच्छे लग्नः तत्पुच्छलग्नः । ( स. तत्पु. ) ॥ २७. सौध મહેલ ॥ २८. सुस्थवि. - સ્વસ્થ ॥ २९. कामुक वि. કામથી વિહ્વળ બનેલ ॥ ३०. विवर पुं. છિદ્ર ॥ ३१. निर्गतः अपराधः यस्मात् सःनिश्पराधः । ( प्रादि ब.व्री. ) ॥ ३२. दुःखेन जीयतेदुर्जयः उपपद । सुतराम् दुर्जयःसुदुर्जयः । ( उपपद. ) तम् सुदुर्जयम् । અતિ દુઃખે જીતાય એવા તેને । ३३. वैरिणा कृताःवैरिकृताः । ( तृ. तत्पु. ) शस्त्राणां प्रहाराः शस्त्रप्रहाराः । [ ष. त. पु. ] वैरिकृताश्चामी शस्त्रप्रहाराश्च वैरिकृतशस्त्रप्रहाराः । ( वि. पू. क. ) तैः वैरिकृतशस्त्रप्रहारैः । વૈરીઓ વડે કરાયેલા શસ્ત્રપ્રહારો વડે ॥ ३४. संहित वि. - સંધાઈ જવું, રુઝાઈ જવું ॥ ३५. रोदने उद्यतम् रोदनोद्यतम् । ( स. तत्पु. ) ३६. राजा आदौ येषान्तेराजादयः । ( ब. व्री. ) सर्वे च ते लोकाश्चसर्वलोकाः ( वि. पू. क. ) राजादयश्चामी सर्वलोकाश्चराजादिसर्वलोकाः । ( वि. पू. क. ) अक्ष्णोः समीपम्-समक्षम् ( अव्ययीभावः ) राजादिसर्वलोकानां समक्षम्राजादिसर्वलोकसमक्षम् । ( ष. तत्पु. ) રાજાદિ સર્વ લોકોની સમક્ષ ॥ ३७. और्ध्वदेहिकनपुं. - મરણોત્તર ક્રિયા ॥

[ ८ ]

# ॥ श्रीइलातीपुत्रचरित्रम् ॥

**अनित्यत्वादिकां शुद्धां, भावनां स्मरता हृदि ।**
**इलातीतनयस्येव पुंसा मुक्तिरवाप्यते ॥१॥**

इहैव जम्बूद्वीपे भारते क्षेत्रे इलाभूषणा[१] इलावर्धनाख्या[२] पुरी बभूव । तत्र नराधिपशतसेव्यो न्यायाध्वना राज्यं पालयन् जितशत्रुनामा राजाभूत् । तत्रैको व्यापारिशिरोमणिरिभ्यनामा[३] श्रेष्ठी वसति स्म । तस्य च शीलादिगुणगणधारिणी धारिण्यभिधा भार्यासीत्, संसारसुखानि भुञ्जानयोरपि तयोः किञ्चिदपत्यं[४] नाभूत्, तेन च तौ दम्पती निजमनसोर्दुःखं मन्यमानावास्ताम्, अथान्येद्युस्ताभ्यां श्रीजिनाधिष्ठायिकाया इलादेव्याः पुत्रप्राप्त्यर्थमाराधनं कृतम्, प्रोक्तं च यद्यावयोः पुत्रो भविष्यति तदा भवत्या नामाङ्कितं तस्य पुत्रस्याभिधानं करिष्यावः, अथैवं धर्मध्यानपरयोस्तयोः क्रमात् पुत्रो जातः, तदा तस्य महताडम्बरेण जन्मोत्सवं विधाय प्रतिपन्नवचनानुसारेण ताभ्यां तस्य सुतस्य "इलातिपुत्र" इति नाम विहितम् । अथैवं धात्रीभिर्लाल्यमानोऽसौ क्रमेण वृद्धिं प्राप्नुवन्नष्टवार्षिको[५] जातः ततोऽसौ पितृभ्यां कलाभ्यासार्थं पाठशालाया-माचार्यसन्निधौ मुक्तः, तत्रासौ प्रयासं विनैव सकलकलाभ्यासपूर्वकं विषमाण्यपि शास्त्राणि सूत्रार्थैः सहाभ्यस्तवान्, अथ स यौवनं प्राप्तोऽपि कलसविषयेभ्यः पराङ्मुखीभूय[६] विशेषतस्तरुणीभ्यो मनागपि[७] निजमनो न दत्ते स्म । किन्तु साधुजनानां सङ्गं कुर्वन् सदा निजमनसि वैराग्यमेव भावया-मास, यथा-

**सन्तोषस्त्रिषु कर्तव्यः, स्वदारे भोजने धने ।**
**त्रिषु चैव न कर्तव्यो, दाने चाध्ययने जपे ॥१॥**

**पण्डितेषु गुणाः सर्वे, मूर्खे दोषास्तु केवलम् ।**
**तस्मान्मूर्खसहस्रेषु, प्राज्ञ एको न लभ्यते ॥२॥**

**धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी[८],**
**सत्यं सूनुरयं दया च भगिनी भ्राता मनःसंयमः ।**
**शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजन-**
**मेते यस्य कुटुम्बिनो वद सखे ! कस्माद् भयं योगिनः ॥१॥**

इत्यादि वैराग्यमेव भावयन् स्त्रीसङ्गं केवलं नरकप्रदमेव[९] स मन्यते स्म। अथैवं वैराग्यपरं निजपुत्रं त्रिवर्गशून्यमेव[१०] मन्यमानस्तस्य जडबुद्धिः पिता तं विषयकुशलं विधातुमिच्छति स्म । अथासौ नगरमध्यात्कांश्चन दुर्ललितान् सप्तव्यसनोपेतान् वेश्यागमनप्रवीणान् यूनो निजपार्श्वे समाहूय कथयामास, 'भोः पुरुषाः ! यूयमेनमिलातीपुत्रं मम तनयं युष्मत्सार्थे गृहीत्वा स्त्रीविषयादिषु प्रवीणं कुरुध्वम्, तत्र च यद्द्रव्यादि युज्यते, तत्सर्वं ममाग्रतो ग्राह्यम्,' एवं तदुक्तानि वचनानि श्रुत्वा प्राप्तदुग्धा[११] बिडाला इव प्रहृष्ट-मानसास्ते दुर्ललिताः कथयामासुः । 'भोः श्रेष्ठिन् ! एतत्त्वस्माकं कार्यमेव, स्तोकेनैव कालेन वयमिममिलातीपुत्रं सर्वविषयेषु कुशलं करिष्यामः,' अथ श्रेष्ठ्यपि तं निजपुत्रमिलातीपुत्रं समाहूय कथयामास, 'भोः पुत्र ! अद्यप्रभृति एते सज्जनास्तव मैत्रीं कर्तुं वाञ्छन्ति, अतस्त्वमप्येभिः सह गत्वा सकल-व्यवहारकुशलो भव, एते सर्वप्रकारैस्तव मानसमानन्दयिष्यन्ति' । एवं निजताताऽऽदिष्टः स इलातीपुत्रोऽपि तैः सह चलितः ।

अथ ते दुर्ललिता वसन्तोत्सवे जाति-केतकी-चम्पका-ऽशोक-चूतादीनां[१२] प्रफुल्लकुसुमादिभिः सुरभीभूते उद्याने तमिलातीपुत्रं निन्युः, इतस्तत्र लङ्खिकाख्यनटस्यैका कन्यका तत्र नृत्यन्ती तेन इभ्यपुत्रेण दृष्टा । सा च यौवनवती रम्भेव रूपलावण्यादिसम्पन्नाभूत् । तां च दृष्ट्वा दैवयोगात्पूर्वभव-स्नेहेन स भृशं कामातुरो बभूव । तां च परिणेतुकामः स तत्र तां पुनः पुनर्विलोकयन् निश्चेष्टः[१३] कीलित[१४] इवाजनि । अथेङ्गिताकारज्ञानकुशलास्ते[१५] दुर्ललितास्तां तथाविधं कामदशाविह्वलं विज्ञाय निजप्रयासं च सफलं मन्यमानाः, श्रेष्ठितश्च भूरिद्रव्यपारितोषिकलाभं ध्यायन्तस्तत्र स्तम्भितं तमिलातीपुत्रं कथयामासुः, भो मित्र ! अथेतो निजगृहे गम्यते, यतस्तव पिता

त्वां विनाऽधृतिं करिष्यति, इति पुनः पुनस्तैरुक्तः स विमनस्कः कथञ्चित्तैस्तद्गृहे नीतः, तत्र शयने सुप्तोऽप्यसौ क्षणमपि समाधिं न लभते स्म । अथ तथावस्थमसमाधिगतं निजतनयं वीक्ष्य श्रेष्ठी तं पप्रच्छ, 'भो वत्स ! अद्य त्वमेवं दुर्मनायितः[१६] कथं दृश्यसे ?' किं केनापि तवापराधः कृतोऽस्ति ? किंवा केनापि किञ्चित्तवापमानं कृतमस्ति ? एवं श्रेष्ठिना मुहुर्मुहः पृष्टोऽपि मुनिरिव मौनामाश्रितोऽसौ किञ्चिदपि न जल्पति, केवलमुष्णनिःश्वासानेव मुञ्चति स्म । ततः श्रेष्ठी तान् दुर्ललितान् तद्वयस्यान् समाहूय निजपुत्रस्य दुर्मनःकारणं पप्रच्छ । तदा ते प्रोचुः, 'हे श्रेष्ठिन् ! अद्योद्यानेऽस्माभिः सहागतेनानेन कुमारेण लङ्खिकाख्यनटस्य मनोहरा कन्या नृत्यन्ती दृष्टास्ति । ततः प्रभृति मदनबाणैर्हतोऽयं तां परिणेतुकामो जातोऽस्ति' । इत्युक्त्वा लब्धपारितोषिकास्ते तु ततश्चलिता निजस्थाने ययुः ततः श्रेष्ठी पश्चात्तापं कुर्वन् निजपुत्रं प्रति जगाद, 'भोः पुत्र ! त्वं कुलीनः वणिक्पुत्रोऽसि, इमां चाकुलीनां नटकन्यां परिणेतुं कथमीहसे ? अहं ते रूपलावण्यादिगुणगणोपेता भूरिशो वणिक्कन्याः परिणाययिष्ये' । एवंविधानि पितुर्वचनानि श्रुत्वा स इलातीपुत्रोऽभाषत, 'हे तात ! अहमेतत् सर्वमपि जानामि, यन्नटकन्यापरिणयनं मे वणिंक्श्रेष्ठिपुत्रस्य केवलमयोग्यमेवास्ति, परं किं करोमि ? मदीयं मनस्तस्यामेव नटकन्यायामासक्तीभूतं वर्तते' । यतः-

**यत्र यस्य मनः सक्तं, शर्म तत्र स मन्यते ।**
**मृद्वीकां[१७] [१८]करभस्त्यक्त्वा, [१९]स्नुहीमेवात्ति भावतः ॥१॥**

एवंविधं निजपुत्रवचो निशम्य पश्चात्तापपरः स श्रेष्ठी दध्यौ, अरे रे ! मया स्वयमेवाविचारितं कार्यं कृतम्, यदस्य तेषां दुर्ललितानां[२०] कुसङ्गतिः कारिता, तस्याश्च कुसङ्गत्या एवंविधं कटुफलं प्रादुर्भूतम् । अथायं केनाप्युपायेनास्मात् दुराग्रहान्निवारयितुमशक्योऽस्ति । निषिधश्च स तदासक्तचित्तः चेदात्महत्यां करिष्यति, तदा मे का गतिर्भाविनी ? इतो व्याघ्र इतस्तटी इति न्यायो मम समापतितोऽस्ति । इत्यादि ध्यात्वा विषण्णीभूतः[२१] स श्रेष्ठी तं लङ्खिकं[२२] नटपेटकस्वामिनमाकार्य कथयामास, 'भोः लङ्खिक ! त्वं मदीयपुत्राय[२३] त्वदीयां[२४] कन्यां देहि ?' तत् श्रुत्वा स लङ्खिकः स्पष्टमभाषिष्ट, 'भो श्रेष्ठिन् ! चेत्त्वदीयपुत्रस्य

मदीयामिमां पुत्रीं परिणेतुमिच्छा वर्तते, तदायमस्मदीयपेटके समायातु, अस्माभिः सह भोदनादि कुर्वन्, नटकलाभ्यासं च कुर्वन्, स सुखेन निजकालं गमयतु। अहमपि च तं नटकलाकुशलतया धनमर्जयन्तं विज्ञा सुखेनैवैनां मदीयां कन्यां तस्मै दास्यामि'। अथ तत् श्रुत्वा खिन्नोऽपि स श्रेष्ठी निजतनयात्मघातभीतः सन् नटोक्तं सर्वमपि स्वीचकार[२५] अथ तं नटं विसर्ज्य स श्रेष्ठी पुनरपि निजसुतपार्श्वे गत्वा तं प्रतिबोधयामास। परं तस्यां नटतनयायामासक्तेनेलातीपुत्रेण निजाग्रहो न परित्यक्तः। एवं जनकोपदेशमवमन्य स विषयाभिलाया द्रुतं तत्र लङ्खिकनटपेटके गतः। तदा तेन नटेनापि तस्मै प्रोक्तम्, 'भो इलातीपुत्र! यदि त्वमस्मदीयां नृत्यकलां शिक्ष्यसे, तदा तुभ्यमेनां कन्यां दास्यामः, एवं लङ्खिकादिष्टोऽसौ कामार्थी परमानन्देन नृत्यकलाभ्यासं कर्तुं लग्नः।

**यतः-कामाशुगैः[२६] स्वान्त-कुम्भे जर्जरिते सति।**
**स्तोकमप्युपदेशाम्भः, क्षिप्तं सन्तिष्ठते कथम् ॥१॥**

**अपसर सखे दूरादस्मात् कटाक्ष-विषाननात्,**
**प्रकृतिविषमाद्योषित्सर्पाद्विलासफणाभृतः।**
**इतरफणिना दष्टः शक्यश्चिकित्सितुमौषधै-**
**श्चटुलवनिताभोगैर्ग्रस्तं[२७] त्यजन्ति हि मन्त्रिणः ॥२॥**

**नपुंसकमिति ज्ञात्वा, स्त्रीं प्रति प्रेषितं मनः।**
**तत्तु तत्रैव रमते, हताः पाणिनिना[२८] वयं ॥३॥**

**प्राणानपि विमुञ्चन्ते, स्त्रीशस्त्रीदीर्णवक्षसः[२९]।**
**पुरुषा मदनासक्ता, मत्स्या वा, गललोलुपाः ॥४॥**

अथ प्रज्ञाप्रकर्षत्वात् स इलातीपुत्रः स्तोकेनैव कालेन नृत्यकलासु कुशलो बभूव। अथ स लङ्खिकस्तं [३१]नृत्यकलाकुशलं विज्ञाय कथयामास। 'भो वत्स! अथ त्वं तूर्णं स्वनृत्यकलादर्शनतो द्रुतं द्रव्यमर्जयस्व, येन महोत्सवपूर्वकं तुभ्यमेषा मनोहरा कन्या दीयते। ततः स इलातीपुत्रस्तन्नटकन्या-

परिणयनोत्सुको द्रव्योपार्जनार्थं लङ्खिकादिपेटकयुतो बेन्नातटाख्ये[३२] पुरे समेत्य तत्रत्यमहीपालं विज्ञपयामास, 'हे राजन् ! वयं तवास्मदीयनृत्यकलां दर्शयितुं वाञ्छमः,' तत् श्रुत्वा भूपेनोक्तं 'सुखेन युष्मदीयां नृत्यकलां मे दर्शयध्वम्, तद् दृष्ट्वा हृष्टोऽहं युष्मभ्यं भूरिदानं दास्ये' । अथैवं नृपादिष्ट इलातीपुत्रो भूरिधन-लाभलोलुपो नानाऽभिनयबन्धुरं तथाविधं मनोहरं प्रेक्षणं चकार, यथा सर्वेऽपि लोका निजहृदयेषु चमत्कारं प्राप्ताः । तदानीं च तालानुसारेण पटहं वादयन्तीं तां रूपतिरस्कृतदेवाङ्गनां लङ्खिकपुत्रीं दृष्ट्वा मदनबाणविद्धो राजा हर्तुकामोऽभूत् । ततश्चेलातीपुत्रमरणं वाञ्छन् स तं जगौ, 'भो इलातीपुत्र ! त्वं वंशोपरिविलग्नो नृत्यं कुरु,' एवं नृपादिष्टः स वंशोपरिस्थितस्तथा नृत्यं चकार, यथा राजादयः सर्वेऽपि लोका निजहृदयेषु भृशमाश्चर्यं प्राप्ताः, पुनस्तेन क्रूरहृदयेन[३३] राज्ञा प्रोक्तं त्वमथाकाशे निराधारो भूत्वा नृत्यं कुरु,' तत् श्रुत्वा तेनेलातिपुत्रेणापि तथैवं विहितम् । अथैवं नृत्यं कुर्वतोऽपि तस्येलातीपुत्रस्य मरणमजातं विलोक्य नृपो निजकुटिलाशयेन तस्य पार्श्वे वारत्रयमेवमेव निराधारं नृत्यं कारयामास । अथ चतुर्थवारके नृपादेशेन वंशोपरि चटित इलातीपुत्रस्तं नृपं निजप्रियायाम-सक्तमानसं निजमारणाभिलाषं च कुर्वन्तं स्वबुद्ध्या विज्ञाय चिन्तयामास, अहो ! विषयवैषम्यं[३४] धिक् ! अयं राजापि मदनबाणविद्धो नीचकुलोत्पन्नाया-मप्यस्यां नट्यामासक्तो जातोऽस्ति, ततश्च मां मारयितुं पुनः पुनर्नृत्यंकारयति । अरे रे ! स्वर्गीयदेवाङ्गनोपमे सत्यपि निजान्तःपुरे कामविह्वलोऽयं नृप एतस्यामेवासक्तो जातः, धिगस्तु कामविकारम् । यतः-

**स्वाधीनेऽपि कलत्रे, नीचः परदारलम्पटो भवति ।**
**सम्पूर्णेऽपि तटाके, काकः कुम्भोदकं पिबति ॥१॥**

अरे रे ! मया मातापित्रोर्वचनमुल्लङ्घ्यैवंविधमकार्यं[३५] कृतम्, निर्मलेऽपि कुले केवलं विषयसुखवाञ्छया कलङ्को दत्तः, अतो मां धिगस्तु । एवंविधा विषयासक्तिर्मयात्रैव दुःखपरिणामरूपाऽनुभूता । यतः-

**ते धत्तूरतरुं[३६] वपन्ति भुवने प्रोन्मूल्य कल्पद्रुमम्,**
**गृह्णन्ति खलु कर्करं निजकरे प्रक्षिप्य चिन्तामणिम् ।**

**विक्रीय द्विरदं[३७] गिरीन्द्रसदृशं क्रीणन्ति ते रासभम्,**
**ये लब्धं परिहृत्य धर्ममधमा धावन्ति भोगाशयाः ॥१॥**

एवं वैराग्यवासितहृदयो यावत् स इलातीपुत्रो वंशाग्रस्थितो ध्यायति, तावत्स कस्यचिन्महेभ्यस्य[३८] गृहे भिक्षार्थं प्रविष्टान् कांश्चिन्मुनीन् ददर्श, तदैव निजरूपनिर्जितरम्भा, दिव्यवस्त्रालङ्कारधारिणी, चन्द्रानना तस्य धनपतेर्वधूस्तेभ्यो मुनिभ्यो भिक्षादानार्थं हस्तधृतमनोहरमोदकस्थाला[३९] तदग्रे समागत्य स्थिता। परं ते मुनयस्तां ललनां निजदृष्ट्यापि न विलोकयामासुः। ततो गृहीतभिक्षास्ते[४०] साधवस्ततो मह्यामेव न्यस्तदृष्टयो निवृत्ताः। एवंविधान्निगृहीतेन्द्रियांस्तान् मुनीन् दृष्ट्वा स इलातीपुत्रो निजहृदि दध्यौ, धन्या एते मुनयस्त एव वन्दनीयाः। यतः-

**ते कह न वंदणिज्जा, रूवं दट्ठूण परकलत्ताणं।**
**धाराहयव्व वसहा, वच्चंति महीं पलोअंता ॥१॥**
**अलसा होइ अकज्जे, पाणीवहे पंगुला सया होइ।**
**परतत्तीसु[४१] य बहिरा, जच्चंधा परकलत्तेसु ॥२॥**

अहं त्वस्यां नीचकुलोत्पन्नायामपि नटकन्यायां विषयसेवनवाञ्छया लुब्धो जातोऽस्मि, अतो मां धिगस्तु। एवमात्मनिन्दातत्परस्य शुभभावदृढ-चित्तस्य, शुभध्यानाधिरूढस्य च तस्येलातीपुत्रस्य तत्रैव वंशोपरिस्थितस्य केवलज्ञानं समुत्पन्नम्। तदैव [४२]शासनदेवतादत्तमुनिलिङ्गोऽसौ कनककमल-स्थितो भूपादीनामाश्चर्यं[४३] जनयन् धर्मोपदेशं दत्तवान्। यथा

**भो भव्या इह संसारे, मानुष्यमतिदुर्लभम्।**
**लब्ध्वा पाथोनिधेर्मध्ये,[४४] चिन्तारत्नमिवामलम् ॥१॥**
**दानशीलतपोभाव-मये धर्मे चतुर्विधे।**
**यतनीयं भवद्भिश्च, स्वर्गमोक्षसुखार्थिभिः ॥२॥ युग्मम्।**

इत्यादिधर्मोपदेशमाकर्ण्य राज्ञा तस्येलातीपुत्रस्य केवलिनो मुनेः पृष्टं, 'भो मुनिराज! भवतोऽस्यां नटकन्यायां रागः कथमभवत्?' तत् श्रुत्वा स केवली जगौ, 'पूर्वं वसंतपुराख्ये नगरे भूपपुरोहितो मदननामा द्विजोऽभूत्। तस्य

द्विजस्य[४५] मोहिन्यभिधा वल्लभा प्राणेभ्योप्यतिप्रियतमा बभूव । अथान्येद्युस्तौ दम्पती[४६] सुगुरोः पार्श्वे धर्मोपदेशं श्रुत्वा प्रतिबुद्धौ दीक्षां जगृहतुः । एवं दीक्षितयोरपि तयोः परस्परं प्रीतिरतीवरागतन्तुभिः स्यूतेव सर्वथा नात्रुटत् । इतोऽन्यदा केनचित् पृष्टा सा मोहिनी साध्वी जातिमदेन मूढात्मतया निजमुखेन स्वकीयं द्विजजातिसम्भवमुत्तमं कुलं प्रशंसयामास । एवंविधं जातिमदसम्भवं निजदुष्कर्म गुरूणामग्रेऽनालोच्यैव मृता स्वर्गे गता । स द्विजोऽपि निजायुः-क्षयेण मृतो देवलोके गतः । ततः स देव आयुःक्षये ततो देवलोकाच्च्युत इलावर्धने पुरेऽहं श्रेष्ठिपुत्रो जातः । स मोहिनीजीवोऽपि स्वर्गाच्च्युत्वा पूर्वभवे जातिमदकरणान्नटकुले पुत्रीत्वेन समुत्पन्नो । अथ पूर्वभवसम्बन्धेनास्मिन् भवेऽपि मम तस्यां भूरितरः स्नेहो जातः । तत् श्रुत्वा वैराग्यवासितहृदयास्ते नृपनटात्मजादयः[४७] सर्वेऽपि जैनधर्मं प्रतिपेदिरे । क्रमेण ते सर्वेऽपि दीक्षां गृहीत्वा तीव्रतपोऽग्निना कर्मेन्धनानि प्रज्वाल्य सम्प्राप्तकेवलज्ञाना मुक्तिं ययुः ।

**: अभ्यास :**

प्रश्नः १. इभ्यस्य पुत्रप्राप्तिः कथञ्जाता ?

२. सन्तोषः कुत्र कर्तव्यः, कुत्र च न कर्तव्यः ?

३. योगिनः के कुटुम्बिनः ?

४. इलातीपुत्रं विषयकुशलं कर्तुं जनकेन किं कृतम् ?

५. नटकन्यां त्यक्तुं श्रेष्ठिना स्वसुनवे किं कथितम् ?

६. इलातीपुत्रस्य पूर्वभवस्य पत्नी इहभवे कथं नटी जाता ? ततः प्राणिना किं वर्जनीयम् ?

**॥ इति श्रीइलातीपुत्रचरित्रं समाप्तम् ॥**

१. इलायाः भूषणाइलाभूषणा ।( ष. तत्पु. ) પૃથ્વીના આભૂષણ સમાન ॥ २. इलावर्धनमाख्या यस्याः साइलावर्धनाख्या ।( व्यधि. बहु. ) ३. व्यापारिषु शिरोमणिःव्यापारि शिरोमणिः ।( सप्त. तत्पु. ) વ્યાપારીઓમાં શિરોમણિ ॥ ४. अपत्य नपुं સંતાન. ५. अष्टसु वर्षेषु भवःअष्टवार्षिकः ।( तद्धित. ) ६. अपराङ्मुखः पराङ्मुखः भूत्वापराङ्मुखी भूय । ( च्वि. ) અવળા મુખવાળો થઈને ॥ ७. मनाक् अव्य.-થોડું ॥ ८. गेहिनीस्त्री.- પત્ની ॥ ९. नरकं प्रददाति इतिनरकप्रदः ।( उपपद ) तम्नरकप्रदम् । નરકને આપનાર ॥ १०.

त्रयाणाम् वर्गाणाम् समाहारः त्रिवर्गम् ।( समाहार. ) तेन शून्यः त्रिवर्गशून्यः ।( तृ. तत्पु. ) तम्-त्रिवर्गशून्यम् । ११. प्राप्तं दुग्धं यैः तेप्राप्तदुग्धाः ।( बहु. ) પ્રાપ્ત થયું છે દૂધ જેને એવા ॥ १२. चूतनपु- આંબો. १३. निर्गता चेष्टा यस्मात् सः निश्चेष्टः ।( प्रादि. बहु. ) નીકળી ગઈ છે ચેષ્ટા જેમાંથી એવો તે । १४. कीलितवि. - ખુંપેલો. । १५. इङ्गितपुं. ઇશારો । १६. दुर्मनायित वि. દુઃખી મનવાળો (ઉદાસ) । १७. मृद्वीकास्त्री-દ્રાક્ષ ॥ १८. करभ पुं. ઊંટ ॥ १९. स्नुहीस्त्री. થોરનું ઝાડ. ॥ २०. दुर्ललितः वि. વિલાસી २१. अविषण्णः विषण्णः इव भूतः विषण्णीभूतः ।( च्वि ) ખેદ પામેલ ॥ २२. पेटकपुं. नपुं સમુદાય ॥ २३. मम अयम् मदीयः ( तद्धित ) मदीयश्चासौ पुत्रश्चमदीयपुत्रः ।( वि.पु.क. ) तस्मैमदीयपुत्राय । મારા પુત્ર માટે. २४. तव इयम् त्वदीया । તારી. २५. अस्वं स्वमिव चकारस्वीचकार ।( च्वि ) સ્વીકાર્યું २६. आशुगनपुं.- બાણ २७. भोगपुं. ફણા. २८. पाणिनि - તે નામના વ્યાકરણકાર. २९. स्त्री एव शस्त्रीशीशस्त्री ।( अव. कर्म ) तया दीर्णम्स्त्रीशस्त्रीदीर्ण ।( तृ. तत्पु. स्त्री शस्त्रीदीर्ण वक्षः येषाम् तेस्त्रीशस्त्रीदीर्णवक्षसः ।( बहु. ) સ્ત્રીરૂપી છરીથી ભેદાયેલી છાતીવાળા ॥ ३०. अत्र वा इव अर्थे ३१. नृत्यस्य कलानृत्यकला ।( ष. तत्पु. ) तस्यां कुशलः नृत्य कलाकुशलः ।( स. तत्पु. ) तम्-नृत्यकला कुशलम् । નૃત્યકલામાં કુશળ એવા તેને ॥ ३२. बेनातट इति आख्या यस्य तद् बेनातटाख्यम् ।( ब. व्री. ) तस्मिन् - बेनातटाख्ये બેનાતટ નામના નગરમાં ॥ ३३. क्रूरं हृदयं यस्य सः क्रूरहृदयः ( बहु. ) तेन-क्रूरहृदयेन ક્રૂરહૃદયવાળા રાજાવડે ॥ ३४. विषमस्य भावः वैषम्यम् ।( तद्धित ) विषयस्य वैषम्यम्विषय वैषम्यम् ।( ष. तत्पु. ) तद् વિષયના વિષમપણાને ॥ ३५. माता च पिता च मातापितरौ ।( द्वन्द्व ) तयोः मातापित्रोः માતા-પિતાના ॥ ३६. धत्तूरपूं. ધતુરો ॥ ३७. द्विरदपुं. હાથી. ( द्वौ रदौ ( दांत ) यस्य सः द्विरदः ( बहु. ) ३८. महेभ्यपुं. મોટા શ્રેષ્ઠી ॥३९. हस्ते धृतम्-हस्तधृतम् ( स.तत्पु. ) मनांसि हरन्ति मनोहराः ( उपपद ) । मनोहराश्चामी मोदकाश्चमनोहर-मोदकाः ( वि.पू.क. ) ।तेषां स्थालम् मनोहरमोदकस्थालम् ( ष.तत्पु. ) ।हस्तधृतं मनोहरमोदकस्थालं यया साहस्तधृत मनोहरमोदकस्थाला ( बहु. ) હાથમાં ધારણ કરાયો છે મનોહર લાડુનો થાળ જેણી વડે એવી તે ॥ ४०. गृहीता भिक्षा यैस्तेगृहीतभिक्षाः ।( बहु. ) ગ્રહણ કરાયેલી ભિક્ષાવાળા ॥ ४१. परतप्ति-स्त्री નિંદા ॥ ४२. शासनदेवतया दत्तम्शासनदेवतादत्तम् ( तृ. तत्पु. ) मुनेः लिङ्गम्मुनिलिङ्गम् ।( ष. तत्पु. ) शासदेवतादत्तं मुनिलिङ्गं यस्मै सःशासनदेवतादत्तमुनिलिङ्गः ।( समा. बहु. ) શાસનદેવતા વડે અપાયું છે મુનિનું લિંગ જેને એવા તે ॥ ४३. भुवं पाति इतिभूपः ( उपपद ) भूपः आदौ येषां तेभूपादयः ( ब.व्री. ) तेषाम्भूपादीनाम् રાજા આદિઓનું, ४४. पाथसां निधिः पाथोनिधिः ।( ष. तत्पु. ) तस्य पाथोनिधेः । સમુદ્રની ४५. द्विः जातःद्विजः ( उपपद ) तस्य-द्विजस्यબ્રાહ્મણની ४६. जाया च पतिश्चदम्पती ( द्वन्द्व ) પતિ-પત્ની. ४७. आत्मजा स्त्री-પુત્રી.

# [ १ ]

# ॥ श्रीदामनकचरित्रम् ॥

**मारेइ जो न जीवे, दयावरो अभयदाणसंतुट्ठो ।**
**दीहाऊ सो पुरिसो, गोयम ! भणिओ न संदेहो ॥१॥**

यो जीवान्न मारयति यश्च दयावान् भवति पुनर्योऽभयदानं दत्त्वा सन्तुष्टो भवति स जीवो मृत्वा परभवे सम्पूर्णायुर्भवेत् । हे गौतम ! तद्विषये त्वं सन्देहं मा कृथाः ॥१॥

एवंविधः पुरुषो दामनकवद्दीर्घायुर्भवति, तद्यथा-

राजगृहनगरे जितशत्रुनामा राजा राजते, तस्य जयश्रीनाम्नी राज्ञी विद्यते, तत्र मणिकारः, श्रेष्ठी, तस्य च सुयशानाम्नी पत्नी, तयोः पुत्रो दामनकाख्योऽभूत् । स यदाष्टवार्षिको जातस्तदा तस्य पितरौ मृतौ, दारिद्र्यभावात्स दामनको नगरमध्ये धनिनां गृहेषु भिक्षावृत्तिं[१] करोति, अथैकदा द्वौ मुनी सागरपोताख्य-वृद्धश्रेष्ठिनो गृहे आहारार्थं प्रविष्टौ । आहारं च गृहीत्वा यदा तौ बहिः समागतौ तदा ताभ्यां स भिक्षाचरो बालकस्तस्य द्वारि स्थितो दृष्टः,तं दृष्ट्वैकेन मुनिनोक्तं द्वितीयं मुनिं प्रति, 'भो मुने ! नूनमयं बालोऽस्य गृहस्य स्वामी भविष्यति' । अथ गवाक्षस्थितेन[२] गृहस्वामिना श्रेष्ठिना तत्सर्वमाकर्णितं, तेन च स वज्राहत इव सञ्जातः, चिन्तितं च तेन अहो ! मयाऽनेकैः कष्टैर्मायावीभूयाऽयं[३] विभव उपार्जितोऽस्ति, तस्य विभवस्य चायं रङ्कः स्वामी भविष्यति, गुरुवचन-मप्यन्यथा नैव भवेत्, अत एनं शिशुं केनाप्युपायेनाहं मारयामि तदा वरम्, इति विचार्य स सागरपोतः श्रेष्ठी तं मुग्धं बालकं मोदकादिभिः प्रलोभ्य चाण्डाल-पाटके[४] पिङ्गलाख्यचाण्डालस्य गृहे मुक्तवान् । पश्चात्स स्वयमपि तस्य चाण्डालस्य गृहे गतः, तत्र गत्वा तेन तं चाण्डालं प्रत्युक्तमहं तुभ्यं मुद्रापञ्चकं दास्ये । त्वमेनं शिशुं शीघ्रं हत्वा मां दर्शयेः, इत्युक्त्वा स निजगृहं गतः, अथ स मातङ्गस्तं बालकं सुरूपं वीक्ष्य करुणापरोऽभूत् । ततोऽसौ चिन्तयामास यदनेन

शिशुनापि सागरपोतस्य कोऽपराधः कृतो भविष्यति ? द्रव्यलोभतो मयापीदृक्कर्म नोचितं कर्तुम्, अतो मयाऽस्मै बालाय जीवितदानमेव देयम्, इति विचार्य स चाण्डालः कर्त्रिकया[५] तस्य शिशोः कनिष्ठाङ्गुलीं छित्त्वा तं प्रत्युवाच भो बाल ! अथ त्वमितो द्रुतं पलायस्व यदि जीवितं वाञ्छसि, अन्यथा त्वामनया कर्त्रिकयाऽहं व्यापादयिष्यामि[६] तत् श्रुत्वा वाताहतद्रुम इव कम्पमानाङ्गः स ततः पलाय्य यस्मिन् ग्रामे सागरपोतस्य गोकुलमभूत्तत्र गतः, तत्र नन्दाभिधानेनाऽपुत्रकेन गोकुलस्वामिना स पुत्रतया स्थापितः,अथ स चाण्डालस्तस्य कनिष्ठाङ्गुलीं गृहीत्वा सागरपोतस्य पार्श्वे समागत्यं तं तदभिज्ञानं[७] दर्शितवान्, तद्दृष्ट्वा सागरोऽपि स्वमनसि सहर्षो जातः । चिन्तितवांश्च मया मुनेर्वाक्यं विफलीकृतम्, एवं स सागरपोतः सुखेन तिष्ठति ।

अथान्यदा स निजगोकुले गतः, तत्र नन्दगृहे छिन्नाङ्गुलिकं तं दामनकं यौवनस्थं दृष्ट्वा स विषण्णो जातः, नन्दं च पप्रच्छ, अयं तव पुत्रः कदा जातः ? कुतो वा त्वया समुपलब्धः ? सत्यं ब्रूहि ? तदा नन्देन कथितमस्य बालकस्य कनिष्ठाङ्गुली[८] केनचित्कारणेन चाण्डालेन छेदिता, तद्भयात्पलाय्य सोऽत्र मदीये गृहे समागतोऽस्ति, मया च स पुत्रत्वेन रक्षितोऽस्ति । तत् श्रुत्वा सागरपोतेन विचारितं, नूनं मुनेर्वचः सत्यं जातम् । इति विचार्य चिन्तातुरः श्रेष्ठी स्वपुरं प्रति चलितुं प्रवृत्तः, तदा नन्देन कथितं 'भोः, श्रेष्ठिन्नधुनैव भवतामत्रा-गमनं जातम्, ततः शीघ्रं पश्चात्कथं प्रस्थानं क्रियते ? किं किञ्चिद् गृहकार्यं त्वया विस्मृतमस्ति ?' तदा श्रेष्ठिनोक्तं 'ममैकं महद् गृहकार्यं स्मृतिपथमागतम्, ततोऽहं शीघ्रं गच्छामि' । तदा नन्दो जगाद, चेद्भवतां किञ्चिन्महत् शीघ्रं च करणीयं कार्यं भवेत्, तर्हि लेखं लिखित्वा ममास्य पुत्रस्य समर्पय, स शीघ्रमेवेतो गत्वा तं लेखं भवत्पुत्राय तत्र समर्पयिष्यति । श्रेष्ठिनेऽपि तद्रुचितम् । अतोऽसौ लेखमेकं लिखित्वा दामनकाय ददौ, सोऽपि तं लेखं गृहीत्वा द्रुतं राजगृहनगरसमीपे समागतः । अथ तस्मिन् लेखे तेन दुष्टेन पापिष्ठेन[९] श्रेष्ठिना स्वपुत्रं प्रतीति लिखितमासीत्, यदस्य लेखस्य समर्पयितारं प्रति त्वया निः-ऽङ्कमनसा विषं देयं, तस्मिन् कार्ये ममाज्ञास्ति । अथ दामनकस्तं लेखं गृहीत्वा

नगरसमीपे समागत्य विश्रामहेतोरुद्यानस्थस्मरदेवकुले[१०] स्थितः, मार्गश्रमतश्च तस्य तत्र निद्रा समागता। इतस्तस्य सागरपोतश्रेष्ठिनो विषाभिधाना पुत्री वरार्थिनी स्मरदेवं पूजयितुं तत्र समागता, स्मरदेवं च प्रपूज्य यौवनावस्थाप्रादुर्भावतः सा देवं प्रति वरं ययाचे। इतस्तया तत्र निद्रितदामनकस्य पार्श्वे निजपितृमुद्राङ्कितो[११] लेखो दृष्टः, हस्तलाघवात्तया च स गृहीतः, तत्र लिखितं चोदन्तं विज्ञाय तया चिन्तितम्, अहो! मनोज्ञरूपो युवायं वर्त्तते, ममापि मानसमस्योपर्येव मोदते, अतोऽस्य यूनो विषदानतो मारमयोग्यमेव। इति विचार्य तया कज्जलशलाकया विषशब्दोपरिस्थं बिन्दुं विलुप्य तस्य स्थाने "विषा" इत्यकरोत्। पुनस्तं लेखं मुद्रयित्वा दामनकस्य पटाञ्चले सा बबन्ध, ततः स्वयं च निजगृहे समागता, इतो घटिकानन्तरं दामनकः प्रबुद्धः[१२] शीघ्रं नगरमध्ये समागत्य तं लेखं श्रेष्ठिपुत्राय समुद्रदत्ताय दत्तवान्। समुद्रदत्तेन लेखं वाचयित्वा विचारितम्, यत्पित्रा लिखितमस्ति अस्मै "विषा" प्रदीयताम्, तस्मिन् विषये कोऽपि सन्देहो न कार्यः, अतो मयापि तदाज्ञानुसारेणैव कर्त्तव्यम्।

इति विचार्य तेन तयोः शीघ्रमेव विवाहोत्सवो विहितः, अथ विवाहाद्दिनद्वयानन्तरं सागरपोतकर्णपथे सा वार्त्ता गोकुलमध्ये एव जनमुखात् समागता, तेन सोऽतीव विषण्णः सन् ततो नगरं प्रति प्रस्थितः, मार्गे स मनसि चिन्तयति, मया यत्किञ्चिद्विधीयते तत्सर्वं विधिस्त्वन्यथा करोति, नूनमयं मद्गृहजामाता जातः, तथाप्यहं पुनरेनं व्यापादयामीति चिन्तयन्, स दुष्टात्मा पिङ्गलनाम्नस्तस्य मातङ्गस्य गृहे समागत्य तं प्रत्युवाच, अरे चाण्डाल! स त्वया कथं न मारितः? सत्यं वद? चाण्डालेनोक्तं 'भोः श्रेष्ठिन्! तदा दयापरिणामवशतो मया स न व्यापादितः, अथ पुनस्तं बालं मम दर्शय, यथा तं मारयित्वा तव मनोरथं सफलीकरोमि'। अथ श्रेष्ठिनोक्तं 'भोः पिङ्गल! अद्याहं तं दामनकं सन्ध्याकाले मम गोत्रदेव्या आयतने[१३] प्रेषयिष्ये, तदा त्वया तत्र स हन्तव्यः,' अथ सन्ध्यासमये श्रेष्ठी गृहं समागत्य तौ वधूवरकौ प्रतीदमब्रवीत्, 'अरे! युवाभ्यामद्यापि किं कुलदेव्याः पूजनं न कृतम्? यत्प्रसादादयं भवतोः सङ्गमो

जातोऽस्ति,' इत्युक्त्वा [१४]पुष्पादिभृतभाजनयुतौ तौ दम्पती सन्ध्यासमये पूजार्थं गोत्रदेव्या आयतने स मुमोच । एवं तौ सन्ध्याकाले पूजार्थं गोत्रदेवीमन्दिरे गच्छन्तौ दृष्ट्वा हट्टस्थितश्रेष्ठिपुत्रः समुद्रदत्त उत्थाय तौ प्रत्युक्तवान्, 'अत्र सन्ध्यासमये पूजावसरो नास्ति,' इत्युक्त्वा तावेकान्ते तत्र चतुष्पथे संस्थाप्य स्वयं च तत्पुष्पादि गृहीत्वा देवालये प्राविशत् । तदा सङ्केततस्तत्रागतेन पिङ्गलचाण्डालेन ज्ञातं यत्स एव पुरुषः समागतः, इति विचार्य तेन स श्रेष्ठिपुत्रः समुद्रदत्तः खड्गेन व्यापादितः, चिन्तितं चाद्य मया श्रेष्ठिनो मनोवाञ्छितं कार्यं विहितम् । अथ क्रमेण तत्र हाहारवो जातः, सागरपोतो निजपुत्रमरणं विज्ञाय वक्षःस्फोटनेन पुत्रवियोगदुःखितो मृत्युमाप । अथ कुटुम्बिभिर्मिलित्वा स दामनकस्तस्य श्रेष्ठिनो गृहादिसर्वधनस्य[१५] प्रभुश्चक्रे, अथ स दामनको यौवनेऽपि धर्मं चकार परं विषयेषु वाञ्छां न व्यधात्, एकदा तेन कस्यचित्-साधोरग्रे धर्मदेशना श्रुता, देशनाश्रवणानन्तरं दामनकेन पृष्टं, 'हे भगवन् ! कृपां विधाय यूयं मम पूर्वभवं कथयत, मुनिनोक्तं भो दामनक ! शृणु ।

अस्मिन्नेव भरतक्षेत्रे गजपुरनगरे सुनन्दाख्य एकः कुलपुत्रोऽभूत्, तस्य जिनदासाख्यः सुहृद् बभूव, एकदा तौ उद्याने गतौ, तत्रस्थं कञ्चनाचार्यं निरीक्ष्य सुनन्दो मित्रसहितस्तदन्तिके समागत्य स्थितः, आचार्येण देशना दत्ता, देशनामध्ये आचार्येण कथितम्, 'यो मनुष्यो मांसं भक्षयति स बहुदुःख-भाग्नरकगामी च भवति,' इति श्रुत्वा स जातसंवेगो मांसभक्षणस्य शपथं जग्राह, जीवरक्षायां च तत्परोऽभूत्, तदादितः[१६] स कदापि जीवहिंसां नाऽकरोत् । अथ कियत्काला-नन्तरं तत्र कल्पान्तकालोपमो[१७] दुष्कालः पतित, सर्वे जनाश्च मांसभक्षणतत्परा जाताः, तदा सुनन्दस्य भार्या तं प्रति कथयति 'हे स्वामिन् ! त्वमपि नद्यास्तीरे याहि, तत्र च नदीमध्ये जालं विस्तार्य मत्स्यान् गृहीत्वाऽऽनय, येनास्मत् कुटुम्बस्य पोषणं भवेत्' । इति तयोक्तोऽसावुवाच 'हे प्रिय ! इदं कार्यं कदाप्यहं न करोमि, अस्मिन् कार्ये महाहिंसा भवति,' तदा तद्भार्ययोक्तं 'त्वं कैश्चिन्मुण्डकैर्वञ्चितोऽसि, अतस्त्वं दूरे याहि,' एवं भार्यया बहुशो निर्भर्त्सनात्सुनन्दो द्रहे मत्स्यान् निष्कासयितुं गतः । तत्रागाधे जले च

जालं चिक्षेप । तत्र जालमध्ये पतितान् मीनान् दुःखाकुलान् वीक्ष्यनुकम्पया स तान् पुनर्जलमध्येऽमुञ्चत् । दिनद्वयावधि तेनैवमेव कृतं, तृतीयदीनेऽप्येवं करणत एकस्य मीनस्य पक्षिका त्रुटिता, तद् दृष्ट्वा सुनन्दोऽतीवशोकार्त्तो जातः, स्वगृहे समागत्य च स्वजनान् प्रति जगाद, अहं कदाचिदपि नरकनिबन्धनरूपां जीवहिंसां न करिष्यामि, एवमुक्त्वा स गृहान्निर्गतः, एवं कियत्कालं यावत्तन्नियमं प्रपाल्य ततो मृत्वाऽयं त्वं दामनको जातः, मत्स्यपक्षत्रोटन-कर्मोदयत इह भवे तवैकाङ्गुलिका त्रुटिता, एवं गुरुभ्यो निजपूर्वभवं श्रुत्वा दामनकः संवेगतोऽनशनं विधाय समाधिना च स्वायुः प्रपाल्य मृत्वा सुरो बभूव, ततश्च्युत्वा मर्त्यभवं प्राप्य जैनीं दीक्षां च प्रपद्य क्रमात्स मोक्षं यास्यति ।

## : अभ्यास :

प्रश्नः १. को जीवः सम्पूर्णायुर्भवेत्

२. केन कारणेन दामनकः श्रेष्ठिना चाण्डालस्य गृहे प्रेषितः ?

३. दामनकाय विषस्थाने विषा केन प्रकारेण दत्ता ?

४. दामनकेन पूर्वभवे किं कृतं येन दामनकभवे स्वस्याङ्गुली छिन्ना ?

५. दामनकेन केन कारणेन दीर्घायुः प्राप्तम् ?

## ॥ इति जीवदयाविषये दामनककथा सम्पूर्णा ॥

१. भिक्षावृत्ति स्त्री-ભીખ માગવાની ક્રિયા. २. गवाक्ष पुं. ઝરૂખો ॥ ३. न मायावी अमायावी ( नञ्. तत्पु. ) अमायावी मायावी इव भूत्वा मायावीभुय । ( च्वि ) ४. पाटक पुं.- પાડો શેરી, ગામનો વિભાગ ५. कर्त्रिका स्त्री કરવત, છરી ६. वि + आ + पद् મારી નાંખવું ॥ ७. अभिज्ञान नपुं. નિશાની ॥ ८. कनिष्ठा चासौ अङ्गुली च कनिष्ठाङ्गुली । ( वि. पू. क. ) નાની આંગળી ॥ ९. एषां मध्ये प्रकृष्टः पापः सः पापिष्ठः । तेन पापिष्ठेन ( तद्धित ) । १०. उद्याने तिष्ठति उद्यानस्थः ( उपपद ) । उद्यानस्थश्चासौ स्मरश्च उद्यानस्थस्मरः ( वि. पू. क. ) उद्यानस्थस्मरस्य देवकुलम् उद्यानस्थस्मरदेवकुलम् । ( ष. तत्पु. ) तस्मिन् उद्यानस्थस्मरदेवकुले । ઉદ્યાનમાં રહેલા કામદેવના મંદિરમાં ॥ ११. निजस्य पिता निजपिता ( ष. तत्पु ) । निजपितुः मुद्रा

निजपितृमुद्रा ( ष. तत्पु. ) । निजपितृमुद्रया अङ्क्ति: निजपितृमुद्राङ्क्तिः ( तृ. तत्पु. ) પોતાના પિતાના ચિહ્નથી અંકિત. ॥ १२. प्रबुद्ध वि. જાગ્યો ॥ १३. आयतन नपुं. - સ્થાન । १४. पुष्पम् आदौ येषान्ते पुष्पादयः ( ब. व्री. ) पुष्पादिभिः भृतम् पुष्पादिभृतम् ( तृ. तत्पु. ) पुष्पादिभृतञ्च तद् भाजनञ्च पुष्पादिभृतभाजनम् ( वि.पू.क. ) पुष्पादिभृतभाजनेन युतौ पुष्पादिभृतभाजनयुतौ ( व्यधि. बहु. ) પુષ્પાદિથી ભરેલા પાત્રથી યુક્ત એવા તે બે ॥ वक्षसः स्फोटनं वक्षसःस्फोटनं હાર્ટએટેક. १५. गृहम् आदौ यस्य तद् गृहादि ( ब. व्री ) सर्वञ्च तद् धनञ्च सर्वधनम् ( वि.पू.क. ) गृहादि च तद् सर्वधनञ्च गृहादिसर्वधनम् ( वि.पू.क. ) तस्य गृहादिसर्वधनस्य ઘર આદિ સર્વ ધનનો । १६. तदादितः ત્યારથી આરંભીને ॥ १७. कल्पस्य अन्तः कल्पान्तः ( ष. तत्पु. ) कल्पान्तश्चासौ कालश्च कल्पान्तकालः । ( वि. पू. क. ) कल्पान्तकालस्य उपमा यस्य सः कल्पान्तकालोपमः । ( व्यधि. बहु. ) કલ્પાંત કાળની ઉપમાવાળો ॥

• • •

## [ १० ]

# ॥ धर्मप्रभावे सिद्धदत्तकथा ॥

**प्राप्तव्यमर्थं लभते मनुष्यो,**
**दैवो न तल्लङ्घयितुं समर्थः ।**
**तस्मान्न शोको न हि विस्मयो मे,**
**यदस्मदीयं[१] नहि तत्परेषाम् ॥१॥**

चन्द्रप्रभायां नगर्यामरिमर्दनो राजा राज्यं करोति । तत्र धनपतिः श्रेष्ठी, धनवती प्रिया, तयोः पुत्रः सिद्धदत्तः । एकदाऽभाग्ययोगेन तस्य गृहे मारिरुत्पन्ना । ततः [२]प्रातिवेशिमकैरचिन्ति एतस्य गृहान्मारिर्बहिर्निःसरिष्यति, अस्माकं च लगिष्यतीति धनपतेर्गृहस्य द्वाराणि निर्दयत्वेन पिहितानि । ततः कियत्स्वपि दिनेषु रोगपीडितं सकलमपि कुटुम्बं विपन्नम् । ततः सिद्धदत्तो भाग्यान्नीरोगो[३] लघुत्वेन रिङ्खन्[४] गृहखालेन बहिर्निःसृतो नगरे भ्रमति । लोकास्तस्मै अनुकम्पया भोजनाच्छादनादि ददति । एवं सिद्धदत्तो वर्द्धते । एकदा नगरे भ्रमन् स कस्यापि व्यवहारिणो हट्टे[५] गतः । तत्र चैकां पुस्तिकां दृष्ट्वा पृष्टम् - "कैषा पुस्तिका, कथमायातेति ?" ततस्तेन व्यवहारिणोक्तम्- "शृणु, अस्मिन्नेव नगरे कश्चनाऽपि द्यूतकारो द्यूतेन हारितसर्वस्वः प्रतिदिन-माशापूरीक्षेत्रदेवीगृहे दीपतैलेनाऽपूपान्[६] भक्षयति । एकदा क्रुद्धया देव्या तस्य भापनाय[७] जिह्वा कर्षिता । ततस्तेन निःशूकत्वेन[८] जिह्वायां थूत्कृतम् । देवता तथैव स्थिता । प्रातरागतैर्लोकैर्दृष्ट्वाऽरिष्टमिति कृत्वा शान्तिकपूजादिकं कर्तुमारब्धम् । तथापि जिह्वाया असंवरणे द्यूतकृदाह - यदि मे दीनारशतं[९] ददत पूजायै, तदाऽहं प्रपूज्य शान्तिं कुर्वे । पश्चाद् वस्त्रादि च मे देयम् । ततो लोकैर्दीनारशतं दत्तम् । रात्रौ तेन देवीभवने गत्वा स्तुति-पूजादिकं किञ्चित् किञ्चित् कृतम् । तथापि जिह्वां न गोपयति । तदा तेनोक्तम्-"गोपय जिह्वां चेन्न गोपयसि तदा पुरा थूत्कृतमेवाऽस्ति[१०], अधुना विष्टां क्षेप्स्यामि" । इत्युक्त्वा

यावता विष्ठायै चलति तावता देव्या भीतया गोपिता जिह्वा । प्रातर्लोकाः समागताः । जिह्वां गोपितां दृष्ट्वा हृष्टाः, "मङ्गलं जातम्" ।

"एवं काले याति अन्यदा द्यूतकृता[११] रमता[१२] बहुहारणे देव्याः पूजादिकं कृतम् । परं सा किमपि न ददाति । ततो द्यूतकारः लोष्टमुत्पाट्योत्थितः 'चेन्न दत्से तर्हि भङ्क्ष्यामि भवतीम्' इति वदन् । ततो भीतया देव्या तस्यैषा पुस्तिकाऽर्पिता । दीनारपञ्चशत्या विक्रेयेति चोक्तम् । ततः स पुस्तिकां गृहीत्वा नगरान्तर्गो[१३] विक्रीणानो लोकैर्मूल्यं पृष्टः आह (५००) 'पञ्चशतानि दीनाराणाम्' । ततो लोकैर्हसितः स मम हट्टे आगतः । मयाऽनुकम्पया किञ्चिदर्पयित्वा गृहीता सैषा पुस्तिकेति" ।

ततः सिद्धदत्तेन सा पुस्तिका च्छोटयित्वाऽवाचि । 'प्राप्तव्यमर्थं[१४] लभते मनुष्यः' इति पदं तस्य रुचितम् । ततो निरन्तरमेतत्पदं पठन् नगरे नित्यं भ्रमति । ततो लोकैस्तस्य 'प्राप्तव्यमर्थिक' इति नाम दत्तम् । एवं नगरे प्रसिद्धो जातः ।

इतश्च नगरेऽरिमर्दनराज्ञः पुत्री त्रैलोक्यसुन्दरी बहुच्छात्रमध्यगता[१५] उपाध्यायस्य पार्श्वेऽधीते । सा चाऽधीतसकलकला प्राप्तयौवना वरार्थिनी[१६] चिन्तयामास तातो महर्द्धिकं[१७] महाराजपुत्रं वरं मे दास्यति । मम तु कलावानेवाऽभिरुचितः, किं महर्द्धिकत्वेन ! यतः-

**विद्वत्त्वं च नृपत्वं च, नैव तुल्यं कदाचन ।**
**स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ॥१॥**

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,**
**विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।**
**विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं,**
**विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥२॥**

इति विचिन्त्य सा त्रैलोक्यसुन्दरी तन्नगरवासिमतिसागरप्रधान-

सुतवीरसेनस्य स्वेन सार्द्धमेकोपाध्यायपार्श्वेऽधीयानस्य रूप-सौभाग्य-कलाकौशल-विद्यादि दृष्ट्वा तस्मिन्नध्युपपन्ना[१८] सती एकदा रहसि तमुवाच यत्त्वया मम पाणिग्रहणं कार्यमिति । ततस्तेन कुमारेणोक्तम् – 'आवयोः क्व योगः ! यतो भवती राज्ञः पुत्री, अहं तु तस्य सेवकः, इत्येषा वार्ता न वाच्येति' । ततस्तयोक्तम्–'चेन्मदीयं वचः करिष्यसि तदा तवापि भव्यं भविष्यति, नो चेन्न' । ततस्तेन कुमारेण भीतेन प्रतिपन्नम् । तया सङ्केतश्चक्रे, यत् शुक्ल-त्रयोदशीरात्रौ[१९] अहं गवाक्षे मञ्चिकां रज्जौ बद्धां मोक्ष्ये, तस्यामुपविश्य भवता मदीयावासोपरिभूमावागन्तव्यमिति । इति सङ्केतं कृत्वा स्वावासे गता । सङ्केतदिने चागते सा प्रच्छन्नं सर्वां विवाहसामग्रीं मेलयित्वा रात्रौ स्वावासो-परिभूमौ मञ्चिकां सज्जीकृत्य[२०] स्थिता । ततो वीरसेनेन चिन्तितम् – 'को नाम बलात्कारपाणिगृहीतस्त्रियः पाशे पतिष्यति' ? इति विचिन्त्य स सङ्केते नागतः ।

अत्रान्तरे नगरे भ्रमन् प्राप्तव्यमर्थिकस्तस्य गवाक्षस्याध[२१] आगतः । तेन मञ्चिका[२२] दृष्टा । स कौतुकी तस्यां कन्यामुक्तमञ्चिकायामुपविष्टः । ततस्तया ज्ञातमागतोऽसौ वीरसेनः । ततः सखीभिर्मञ्चिकामाकृष्य गृहीत उपरिभूमौ । स मौनं कृत्वा स्थितः । रात्रावन्धकारे परिणीतः सन् वादितः, स्वामिन्नुत्सूरे[२३] कुतः समागतः ? ततस्तेनोक्तं – 'प्राप्तव्यमर्थं लभते मनुष्य' इति । तत उद्द्योतं कृत्वोपलक्षिते सा शुशोच, 'आः ! किं कृतं मया पापिन्या, ! जगत्यपि विदितो मूर्खो यया परिणीतः' । ततः सखीभिरुक्तम् – 'मा विषादं कुरु, अद्याप्यावाभ्यामेव ज्ञातमस्ति । अन्यैः कैश्चिदपि ज्ञातं नास्ति । अत एष भापयित्वा मञ्चिकायां क्षिप्त्वाऽधो मुच्यते । ततो मुक्तो मञ्चिकायां क्षिप्त्वा तत उत्तीर्य स नगरे भ्रमन् [२४]प्रतोल्यासन्ने शून्यं [२५]तलारपल्यङ्कं दृष्ट्वा तत्र सुष्वाप । ततो नगरे भ्रान्त्वाऽऽगतेन तलारेण वादित, उवाच 'प्राप्तव्यमर्थं लभते मनुष्य' इति । ततस्तेनोपलक्ष्योत्थाप्या[२६]–सन्नदेवगृहे प्रेषितः । स उत्थाय देवगृहे गतः ।

अत्रान्तरे तन्नगरनिवासिधनसारश्रेष्ठिनः पुत्री रूपवतीनाम्नी कन्या प्राप्तयौवना निजानुगुणं वरमिच्छन्ती तन्नगरवासिन एव कस्यापि श्रेष्ठिनः सुतं प्रार्थयामास गुणसुन्दरनामानम् । तां च प्रार्थयन्तीं प्रति तेनोक्तम् – 'अहमेवं

प्रच्छन्नं तव पाणिग्रहणं[२७] विधायाऽस्मिन्नगरे स्थातुं न शक्नोमि। ततो न वाच्यं मामेतद्विषये' इति। तयोक्तम् – 'एवं चेत्तदाऽऽवां पाणिग्रहणं विधाय देशान्तरे यास्याव:'। इत्युक्त्वा बह्वाग्रहेण तया सह पाणिग्रहणं मानितो बलात्कारेण। ततस्तस्यामेव त्रयोदश्यां तस्मिन् देवकुले तेन सह सङ्केतं चकार। तत आगतायां तस्याम्[२८] सा सर्वां पाणिग्रहणसामग्रीं कृत्वा सङ्केतदेवकुले आगात्। ततो गुणसुन्दरश्चिन्तयामास–'एवंविधमकृत्यं क: करिष्यति' ? इति विचिन्त्य नागत: सङ्केतस्थानम्। यावद् रूपवती सङ्केतस्थानं गता तस्य मार्गं विलोकयति तावता प्राप्तव्यमर्थिक: प्राप्त: 'स[२९] एवागत' इति विचिन्त्य तयाऽनुपलक्ष्यैव सहसा तमसि तस्य पाणिग्रहणं चक्रे। कृत्वा हृष्टया तया वादित: – स्वामिन्! कस्मादुत्सूरश्चक्रे! ततो यावता स न वक्ति तत: सा पुन:पुन: पृच्छति, ततस्तेनोक्तम् 'प्राप्तव्यमर्थं लभते मनुष्य' इति। तत उपलक्षिते सा दूना चिन्तयामास–"आ:! किं कृतं मयाऽभागिन्या ? त्रैलोक्येऽपि यो मूर्खो विदित: स वृत:। हा! पापदैव! किं कृतम्" ?

**"अन्यथा चिन्तितं कार्यं दैवेन कृतमन्यथा।**
**राजकन्याप्रमादेन भिक्षुको व्याघ्रभक्षित:"** ॥१॥ इति।

ततस्तयाऽचिन्ति–'अस्तु! किं शोकेन ? यतो मां विना केनाऽप्यद्यापि मम कृत्यं ज्ञातं[३०] नास्ति। अनेनाऽप्युपलक्षिता नाऽस्मि। ततो यामि स्वस्थानं नष्ट्वा'। इति चिन्तयित्वा सर्वां विवाहसामग्रीं गोपयित्वा सा जगाम निजगृहम्। पुन: प्राप्यव्यमर्थिक एकाक्येव जात:। ततस्तेनाऽचिन्ति–अद्याऽपि रजनी बह्वी। ततो नगरे भ्रमामि, पुन: कौतुकं विलोकयामि। इति विचिन्त्य निस्ससार देवकुलात्। नगरे भ्रमन् प्राप्तश्चतुष्पथे[३१], पश्यति स्म तन्नगरवासिन एव वस्तुपतिव्यवहारिण: सुतं वसुदत्तनामानं जिनदत्तनाम्नो व्यवहारिण: सुतां वसुमतीं परिणेतुं गच्छन्तम्। प्राप्तव्यमर्थिकोऽपि कौतुकार्थी बहुलोकेन सार्द्धं प्रचचाल तत्पृष्ठौ। एवं वाद्यनिनादाऽभिरामं[३२] नगरान्तव्रर्जन् तस्मिन् जिनदत्त-गृहे पाणिग्रहणस्थाने यावता वरो जगाम चत्वरिकायास्तावता[३३] तन्नगरराज्ञो

हस्तिशालायाः कश्चनाऽपि हस्ती तद्वाद्यध्वनिश्रवणान्मदोन्मत्तो जात आलानस्तम्भमुन्मूल्य[३४] निर्जगाम । स हस्ती राजमन्दिरान्नगरे भ्रमन् हट्टश्रेणिं पातयन् वृक्षमालामुन्मूलयन् निनादाभिमुखमागच्छन् लोकलक्षांस्त्रासयन्[३५] चत्वरिकायामेवागतः । तद्दर्शनाल्लोकाः सर्वे दिशोदिशं नेसुः । वसुदत्तोऽपि वधूं त्यक्त्वा भयभ्रान्तो नष्टः । गजो मण्डप-चत्वरिकादि पातयन् वध्वासन्न[३६] एव गतः । अत्रान्तरे तन्नासन्नस्थेन प्राप्यव्यमर्थिकेनाऽचिन्ति-'आः ! कष्टमनर्थो भावी । एतस्याः कन्याया विनाशो भावी । ततः करोमि रक्षामेतस्याः' । इति विचिन्त्य स साहसनिधिः काष्ठमेकमुत्पाट्योत्थाय हस्तिनः कुम्भस्थले जघान । एवं लब्धलक्ष्यत्वेन भ्रमयित्वा विलक्षीकृत्य[३७] वशीकृतस्तेन[३८] गजः । बद्ध्वाऽर्पित आरक्षकाणाम् । तैश्च हस्तिशालायां बद्धः । ततः सर्वं स्वस्थं जातम् । पुनः सर्वे वरपक्षजा[३९] वधूपक्षजाश्च मिलिताः । तेषां सर्वेषा शृण्वतां वध्वाऽभाणि- "अहं येन हस्तिनः पार्श्वात् त्राता स एव मम वरः । तं विनाऽन्यं प्राणान्तेऽपि नेच्छामीति" । इति कन्यावचः श्रुत्वा वरपक्षजा जगुः - "अस्माकं वरो मण्डपे चत्वरिकायामागतो विवाहं कृत्वैव यास्यति कन्याऽपि यस्मै दत्ता तस्यैव नान्यस्य भवति" इति । ततो वधूपक्षजैरूचे[४०]-वरः स एव यं कन्या वाञ्छति । वरः कोऽपि अन्यो न भवति इति । एवमुभयेषां कलहो जातः । तं कलहं श्रुत्वा राज्ञा कश्चिज्जनः पृष्टः किमिति । तेनोचे कलहस्वरूपम् । ततः सर्वे कलहायन्तो नृपसमीपे आगताः । प्राप्तव्यमर्थिकोऽपि सार्धमागतः । ते राजमन्दिरे आगता विवदमाना राज्ञा पृष्टाः - 'कस्माद् यूयं विवदथ' ? वरपक्षजैरूये - 'स्वामिन् ! अनेन जिनदत्तेन पूर्वं स्वसुताऽस्मद्वराय दत्ता । अधुना तु वरो मण्डपे आगतस्तदैतत्पुत्री कथयति 'नाहं वरं करिष्य' इति । ततो राज्ञा पृष्टो जिनदत्त उवाच - 'राजन् ! अहं न जाने, एषा मम पुत्र्येव जानाति' । ततो नृपेण सा पृष्टा - 'त्वं कस्मादेनं त्यक्त्वा एनमज्ञातकुलगोत्रं[४१] भिक्षाचरं प्राप्तव्यमर्थिकं वरयसे' ? इति । ततः सोचे - "स्वामिन् ! श्रूयताम् । यदाऽसौ मां पाणिग्रहीतुं मण्डपे समागतस्तदा युष्माकं गजो वाद्यध्वनित्रस्तस्तत्राऽगात् ।

तद्भिया सर्वे लोकास्त्रस्ताः। तदा एषोऽपिमामेकाकिनीं गजेन्द्रमुख एव त्यक्त्वा नष्टः। ततः सत्पुरुषेण कृपावताऽनेन[४२] प्राप्तव्यमर्थिकेनाऽहं तस्मान्मरणान्त-कष्टात् त्राता। ततो मयाऽचिन्ति यो मां चत्वरिकान्तरे चैवंविधे कष्टे गते[४३] त्यक्त्वा गतस्तस्याऽग्रे ममोपरि कः स्नेहो भावी? ममाऽप्यनेनैवंविधेन का रक्षा भाविनी? इत्यसौ त्यक्तः। येन चाहमधुनाऽप्येतस्मात् कष्टात् त्राता स मम पश्चादपि त्राता, तेन च सह पश्चादप्यभङ्गा प्रीतिर्भाविनी। एतस्य कुल-गोत्रादिकमपि तादृगद्भुतशौर्यधैर्यगाम्भीर्यादिगुणैरेव मया ज्ञातम्। अतो मयाऽयं गुणवान् परिणीत एव। ततस्तस्याश्चातुर्येण प्राप्तव्यमर्थिकधैर्येण च विस्मितो नृपः प्राप्तव्यमर्थिकपार्श्वे स्वकुलगोत्रादिकं प्रश्नयामास। ततस्तेन गाढ-स्वरेणोचे-'प्राप्तव्यमर्थं लभते मनुष्य' इति। अत्रान्तरे तत्रासन्नोपविष्टया त्रैलोक्यसुन्दर्या एष सर्वोऽपि वृत्तान्तोऽश्रावि। 'अहो! मयाऽभागिन्या एष सत्त्ववान् पाणिगृहीतोऽपि त्यक्तः। एकैषाऽप्यस्ति या पूर्ववृतं महाकुल-सम्भूतमपि[४४] वरमेनं त्यक्त्वा गुणैरेव ज्ञातकुलगोत्रं भाग्यवती वरयत इति। ततो ममाऽप्येष एव वरोऽस्तु'। इति निश्चित्य त्रैलोक्यसुन्दर्याभाणि-'दैवो न तल्लङ्घयितुं समर्थः'। इत्युक्ते राज्ञा पृष्टम्-'किं कथयसे वत्से'? ततस्तयोचे - "तात! श्रूयताम् - यदा युष्माभिर्मां यौवनवयप्राप्तां ज्ञात्वा वरायोपक्रान्तम्[४५], तदा मयाऽचिन्ति तातो महाकुलोद्भवं महर्द्धिकं वरं विलोकयिष्यति। मम तु कलावानभिरुचित इति। ततो मया वीरसेनेन सह सङ्केतः कृतोऽभूत्। परं स कस्मादपि (कारणात्) नागतः, कथमपि एष एवागतः, अन्धकारेऽनुपलक्षितः पाणिगृहीतः, पश्चादुपलक्षितः, पुनर्मयाऽभागिन्या त्यक्त" इति। ततो धनसार-श्रेष्ठिपुत्री रूपवती उवाच - "तस्मान्न शोको न हि विस्मयो मे" इति ततो राज्ञा पृष्टा साऽप्युवाच सर्वं निजवृत्तान्तम्। ततो वसुमती दृढीकरणाय श्लोकपूरणाय चाकथथयत् - "यदस्मदीयं न हि तत्परेषाम्" इति। एवं प्राप्तव्यमर्थिकस्य कन्यात्रयपाणिग्रहणं कारयित्वाऽर्द्धराज्यं दत्तम्, - युवराजपदे स्थापितः, पञ्चशतग्रामा दत्ता। एवं वधूत्रययुतः[४६] सिद्धदत्तः सुखलीलया कालं गमयति।

**प्राप्तव्यमर्थं[४७] लभते मनुष्यः,**
**दैवो न तल्लंघयितुं समर्थः ।**
**तस्मान्न शोको न हि विस्मयो मे,**
**यदस्मदीयं न हि तत्परेषाम् ॥१॥**

एकदा प्रस्तावे तन्नगरोद्याने श्रीधर्मघोषसूरयः समवसृताः । तान् वन्दितुं राजा सिद्धदत्तयुवराजादिपरिवारपरिवृतो जगाम । धर्मदेशनान्ते राज्ञा पृष्टम् – 'भगवन् ! केन कर्मणा सिद्धदत्तस्यैतावती ऋद्धिप्राप्तिः ? गुरुभिरुक्तम्- विशालापुर्यां मातृदत्तवसुदत्तौ वणिजौ । आद्यः साधुपार्श्वे गृहीतस्थूलपर-द्रव्यग्रहणनियमः, नेतरः । शुद्धाऽशुद्धव्यवहारपरौ दरिद्रौ । अन्यदा द्रव्याऽर्जनाय पुण्डपुरे गतौ । तत्र निर्लोभताविषये मातृदत्तस्य प्रसिद्धिर्जाता । तत्रत्य-सुतेजनृपेण[४८] निर्लोभतापरीक्षायै वनमार्गे रत्नकुण्डलं क्षिप्त्वा प्रच्छन्नं नराः स्थापिताः ते च तद्ग्राहिनरान्[४९] दण्डयन्ति । कदाचित्तौ समायातौ । अग्रे गच्छन् मातृदत्तस्तत्कुण्डलं लोष्टवत् त्यक्त्वा जगाम । पश्चादागच्छन् वसुदत्तस्तज्जग्राह । ग्रहणे मातृदत्तेन निवारितोऽपि यावन्न तिष्ठति तावदासन्नस्थै राजपुरुषैर्धृतः । मातृदत्तेन पुनर्मोचितः । राज्ञा मातृदत्तस्य निर्लोभतां ज्ञात्वा सत्कृत्य भाण्डा-गारित्वं दत्तम् । राज्ञो बहुमतः सुखितोऽखण्डधर्ममाराध्य मृत्वा चन्द्रप्रभायां पुर्यां धनपतिधनवत्योः पुत्रः सिद्धदत्तानामा दृढधर्मप्रभावाज्जातः । वसुदत्तोऽपि कूटस्वभावो मृत्वा द्यूतकारो विप्रसुतो जातो दारिद्र्यवान् दुःखी । इत्येवं तयोः पूर्वभवं श्रुत्वा विशेषतो धर्मपरायणो जातो राजा वैराग्याद्राज्यं सिद्धदत्ताय दत्त्वा गुरूणां पार्श्वे दीक्षां जगृहे । सिद्धदत्तोऽपि बहूनि वर्षाणि राज्यं प्रपाल्याऽन्ते स्वपुत्राय राज्यं दत्त्वा वैराग्यात् प्रव्रज्य सिद्धः ।

**॥ इति श्रीधर्मप्रभावे सिद्धदत्तकथा ॥**

**: अभ्यास :**

प्रश्नः १. द्यूतकारः देवीसमीपे कथं गतः ? तत्र गत्वा तेन किं कृतम् ?

२. सिद्धदत्तेन सा पुस्तिका कुतः लब्धा ?

तस्याः तेन किं पठितम् ? पश्चात् किं भूतम् ?

३. त्रैलोक्यसुन्दर्या किम् अचिन्ति ? कथम् ?

४. वीरसेनः कथं न आगतः ?

५. हस्ती कथं उन्मत्तः सञ्जातः ? केन कया रीत्या वशीकृतः ?

६. वसुमती कथं आद्यवरं न परिणीतवती ?

७. सिद्धदत्तस्य विवाहः काभिः कन्याभिः सह भूतः ?

८. प्राप्तव्यमर्थमिति श्लोकस्य किं किं पदम् केन केन पूरितम् ?

१. अस्माकम् इदम् अस्मदीयम् ( तद्धित ) ॥ २. प्रातिवेश्मिक त्रि. પાડોશી ॥ ३. रोगात् निर्गतः नीरोगः ( प्रादि. वि. तत्पु. ) ॥ ४. रिङ्खन् ઘસડાતો ॥ ५. हट्ट-पुं. દુકાન, હાટ ॥ ६. अपूप पुं.- પુડલા ॥ ७. भापन नपुं. ડરાવવું ॥ ८. निःशूक, वि - નિર્લજ્જ ॥ ९. दीनाराणाम्-शतम्-दीनारशतम-तद् ( ष. तत्पु. ) ॥ १०. स्मे च वर्तमाना ॥ सिद्ध. ५/२/१६ ॥ इत्यनेन पुरायोगे भूतकालेऽर्थे वर्तमाना ॥ ११. द्यूतं करोति इति द्यूतकृत् तेन ( उपपद तत्पु. ) ॥ १२. रममाणेन ॥ १३. नगरस्य अन्तः नगरान्तः ( ष.त.पु. ) नगरान्तः गच्छति नगरान्तर्गः ( उप. तत्पु. ) નગરની અંદર જનાર ॥ १४. મેળવવા યોગ્ય અર્થને મનુષ્ય મેળવે છે ॥ १५. बह्वश्चामी छात्राश्च बहुच्छात्राः ( कर्म ) तेषाम् मध्यः बहुच्छात्रमध्यः ( ष. तत्पु. ) तं गता बहुच्छात्रमध्यगता ( द्वि. तत्पु. ) ઘણાં વિદ્યાર્થીઓની વચ્ચે રહેલી ॥ १६. वरम् अर्थयते इति वरार्थिनी ( उप. तत्पु. ) ॥ આસક્ત ॥ १७. महती ऋद्धिः यस्य सः महर्द्धिकः तम् । ( स बहु ) ॥ १८. अध्युपपन्न वि. ॥ १९. शुक्ला चासौ त्रयोदशी च शुक्लत्रयोदशी ( वि. पू. कर्म. ) शुक्लत्रयोदश्याः रात्रिः शुक्लतर्योदशीरात्रिः ( ष. तत्पु. ) तस्या शुक्लत्रयोदशीरात्रौ ॥ २०. असज्जां सज्जां इव कृत्वा सज्जीकृत्य ( च्वि ) ॥ २१. गवाक्ष पुं. ઝરૂખો ॥ २२. मक्षिका स्त्री. માંખડો ॥ २३. उत्सूर नपुं.- વિલંબ, મોડું ॥ २४. प्रतोली स्त्री. કિલ્લો ॥ २५. तलार पुं. કોટવાળ ॥ २६. उत्थाप्य उद्+स्था. - प्रेरक सं. भू. कृ. - ઉઠાડી ને (उद् ઉપસર્ગ પછી સ્થા ધાતુના स् નો લેપ થાય) ॥ २७. पाणिग्रहण नपुं. વિવાહ, લગ્ન ॥ २८. त्रयोदशीदिवसे ॥ २९. गुणसुन्दरः ॥ ३०. ज्ञात वि.- જણાયેલ ॥ ३१. चतुष्पथ पु. ચૌટો ॥ ३२. वाद्यस्य निनादः वाद्यनिनादः ( ष. तत्पु. ) तेन अभिरामम् विद्यनिनादाभिरामम् ( तृ. तत्पु. ) વાજિંત્રના અવાજથી સુંદર (ક્રિયા વિશેષણ) ॥ ३३. चत्वारिका स्त्री. -ચોરી

(લગ્નમંડપની પાસે) ॥ ३४. आलानस्तम्भ-पुं. હાથીને બાંધવાનો થાંભલો. ખીલો ॥ ३५. लोकानाम् लक्षाःलोकलक्षाः तान् ( ष. तत्पु. ) લાખો લોકોને ॥ ३६. वध्वाः आसन्नः वध्वासन्नः ( ष. तत्पु. ) ॥ ३७. अविलक्षं विलक्षं इव कृत्वा विलक्षीकृत्य ( च्वि. ) ॥ ३८. अवशः वशः इव कृतः वशीकृतः( च्वि. ) ३९. वरस्य पक्षः वरपक्षः ( ष. त.पु. ) तस्मिन् जाताः वरपक्षजाः ( उपपद त. ) ४०. વર તે જ છે કે જેને કન્યા ઈચ્છે પણ કોઈ પણ વ્યક્તિ બલાત્કારે કન્યાનો વર ન બની શકે. ४१. कुलञ्च गोत्रञ्च कुलगोत्रे ( द्वन्द्व ) अज्ञाते-कुलगोत्रे यस्य सः अज्ञातकुलगोत्रः ( समा. बहु. ) तम् ॥ ४२. कृपा अस्ति यस्य सः कृपावान् तेन कृपावता ॥ ४३. गत प्राप्त ॥ ४४. महच्च तत् कुलञ्च महाकुलम् ( कर्म. ) तस्मिन् सम्भूतः महाकुलम्भूतः ( सप्त. त. ) तम् ॥ ४५. उप + क्रम् १. गण प. પ્રયત્ન કરવો ॥ ४६. वधूनाम् त्रयम् वधूत्रयम् ( ष. त. ) तेन युतः वधूत्रययुतः ( तृ. त. ) ॥ ४७. મેળવવા યોગ્ય અર્થને મનુષ્ય મેળવે છે, ભાગ્ય પણ તેને ઓળંગવા માટે સમર્થ નથી. તેથી મને શોક કે આશ્ચર્ય નથી, જે અમારું છે તે ખરેખર બીજાનું નથી. ४८. तत्र भवः तत्रत्यः- ત્યાં રહેલ ( तद्धित. ) ॥ ४९. तद् गृह्णन्ति तद्ग्राहिणः ( उप. त. ) तद्ग्राहिणश्चामी नराश्च तद्ग्राहिनराः तान् ( कर्म ) તેને ગ્રહણ કરનારા માણસોને.

• • •

# ॥ श्रीआर्द्रकुमारचरित्रम् ॥

**श्रीवीतरागबिम्बस्य, वीक्ष[१]णाद्देहिनामिह ।**
**बोधिलाभो भवेदार्द्र-कुमारस्येव तत्क्षणात् ॥१॥**

तथाहि - अस्मिन्नेव पयोधिमध्ये आर्द्रकनामाऽनार्यदेशोऽस्ति, स च देशो बहुधनधान्यप्रभृतिवर्यवस्तुभरालङ्कृतोऽस्ति । तत्रार्द्रकनामा नृपो न्यायाध्वना[२] पृथ्वीं शशास । तस्यार्द्रकाभिधाना शीलादिबहुगुणगणविभूषिता राज्ञी बभूव । तयोर्दम्पत्योः परस्परं हार्दिकी[३] भूरिप्रीतिर्बभूव । यतः-

**प्रीतिर्जन्मनिवासतो १ ऽप्युपकृतेः २ सम्बन्धतो ३ लिप्सया ४।**
**विन्ध्ये हस्तिव १ दम्बुजे[४] मधुपवत्[५] २ चन्द्रे पयोराशिवत् ३ ॥**
**अब्दे चातकवद्धवेदसुमतां सर्व नैमित्तिकी ।**
**या निष्कारणबन्धुरा [६]शिखिवदम्भोदे[७] क्वचित् सा पुनः ॥१॥**

अथान्यदा मगधविषयाधिपः[८] श्रेणिको भूपतिर्निजमन्त्रिण आर्द्रकद्वीपे आर्द्रकभूपप्रीतीसम्पादनार्थं[९] भूरिवर्यप्राभृतसहितप्रीतिलेखयुतान् प्रेषयामास । एवं सप्रीतिलेखं भूरिवर्यप्राभृतं स्वीकृत्यार्द्रकराजापि परमं सन्तोषं प्राप्य तान् मन्त्रिणः पप्रच्छ । 'भो मन्त्रिणः ! तस्य मद्बन्धोर्मगधेशितुः किं कुशल-मस्ति' ? ततस्तैर्मन्त्रिभिरपि श्रेणिकभूपकुशलतोदन्ते[१०] निवेदिते नृपपार्श्वे स्थितस्तत्पुत्र आर्द्रकुमारः कृताञ्जलिर्निजजनकमपृच्छत्, 'भो तात ! कोऽयं मगधाधिपस्ते सुहृत् विद्यते ? तदा राजाऽवदत्, वत्स ! स श्रेणिकाभिधो मगधदेशभूपतिरस्ति, तेन समं ममातीव प्रीतिवर्तते, पूराप्यात्मीयकुलभूपतिभिः समं तत्रत्यभूपानां प्रीतिरासीत्, एवं कुलक्रमागताद्यापि सा प्रीतिरविच्छिन्नैव परिवर्तते' । एवं निजजनकवचांसि श्रुत्वाऽतीव हृष्टः स आर्द्रकुमारस्तान् श्रेणिकनृपमन्त्रिणो निजावासे समाकार्य रहोवृत्त्या[११] पप्रच्छ, 'भो मन्त्रिणः !

युष्माकं तस्य श्रेणिकस्य राज्ञः किं कोऽपि सुतोऽस्ति ?' तदा मुख्यमन्त्रिणा प्रोक्तम्, 'भोः कुमारेन्द्र ! तस्य श्रेणिकभूपस्य धियां पात्रं पञ्चशतामात्याधिपतिरभयकुमाराभिधस्तनयोऽस्ति' । तत् श्रुत्वा दाक्ष्यदाक्षिण्यनैपुण्यकलाकुशलः स आर्द्रकुमारोऽवदत्, 'तेनाभयकुमारेण सहाहमपि मैत्रीं कर्तुमिच्छामि । अतो यदा यूयं पश्चाद् गच्छथ तदा मामापृच्छ्यैव व्रजथ, यदहमपि तस्मै राजकुमाराय किमपि प्राभृतं प्रेषयितुमुत्सुकोऽस्मि' । [१२]ओमित्युक्तत्वा ते मन्त्रिणोऽपि निजस्थानं ययुः । अथ स आर्द्रकराजा मनोहरभोजनपानादिभिस्तेषां[१३] श्रेणिकमन्त्रिणां सर्वदा भूरिसत्कारं करोति स्म । अथान्यदा स आर्द्रकराजा श्रेणिकभूपप्रेषणयोग्यमणिमुक्ताफलादिवर्यवस्तूनि स्वमन्त्रिणे समर्प्य कथयामास, 'भो मन्त्रिण ! त्वं मगधदेशे राजगृहे नगरे मदीयपरममित्रश्रेणिकनृपपार्श्वे गच्छ, तस्यैतानि वस्तूनि च मदीयप्रणामपूर्वकं त्वया प्राभृतीकरणीयानि । अथैवं नृपादिष्टः स मन्त्री यदा राजगृहं प्रति गन्तुं प्रयाणमकरोत्, तदा ते श्रेणिकमन्त्रिणोऽपि तेनार्द्रकनृपेण सन्मानपुरस्सरं विसृष्टाः सन्त आर्द्रकुमारपार्श्वे गत्वा निजप्रयाणस्वरूपं निवेदयामासुः । तदा प्रमुदितः स आर्द्रकुमारोऽपि कोटिमूल्यमणिमाणिक्यमुक्ताफलपट्टकुलादिवर्यवस्तूनि तेभ्यः समर्प्य प्राह, 'भो मन्त्रिणः ! एतानि सर्ववस्तूनि युष्माभिर्मदीयाभिधानपूर्वकं तस्मै अभयकुमाराय समर्पणीयानि, मत्प्रणामपूर्वकं च तस्मै वाच्यं यदार्द्रकुमारो भवद्भिः सह मैत्रीं कर्तुं वाञ्छति' । अथ तत्सर्वं प्रतिपद्य ते मन्त्रिण आर्द्रभूपमन्त्रियुताः शुभे मुहूर्ते राजगृहं प्रति यानारूढाः[१४] प्रयाणमकुर्वन् । प्रयाणं कुर्वन्तस्ते सर्वेऽपि क्रमेण राजगृहं प्रापुः तत्र स आर्द्रभूपमन्त्री सर्वाण्यार्द्रभूपदत्तानि वस्तूनि लेखयुतानि श्रेणिकनृपाय समर्पयामास । तानि वस्तूनि दृष्ट्वा श्रेणिकभूपोऽत्यन्तं हृष्टस्तं मन्त्रिणमधिकतरं सन्मानयामास । अथ ते श्रेणिकमन्त्रिणोऽप्यार्द्रकुमारप्रेषितवस्तून्यभयकुमाराय लेखयुतानि समर्प्य तन्मैत्रीकरणार्थं तस्य सन्देशं निवेदयामासुः । तत्सर्वं गृहीत्वा हृष्टोऽभयकुमारो दध्यौ, नूनं पूर्वभवे किञ्चिद्व्रतविराधनयायमार्द्रकुमारोऽनार्यदेशे समुत्पन्नः सम्भाव्यते, परं मन्मैत्रीमिच्छन् ध्रुवं स आसन्नभव्यो[१५] मुक्तिगाम्यस्ति । ततः केनापि प्रपञ्चरचनादिना तथा करोमि, यथायं परमार्हतो भवेत् नूनं तस्यार्द्रकुमारस्य तीर्थंकरप्रतिमादर्शनतो जाति-

स्मरणज्ञानं समुत्पत्स्यते, अतोऽहं तत्र तस्य प्राभृतमिषेणार्हत्प्रतिमां[१६] प्रेषयामि। इति ध्यात्वा सोऽभयकुमारः श्रीऋषभदेवप्रतिमां पेटामध्यस्थां[१७] विधाय तन्मध्ये च कुङ्कुमधूपचन्दनादिपूजायोग्यवस्तूनि मुक्त्वा तां तालकेन[१८] मुद्रयामास। अथ श्रेणिकार्पितप्राभृतयुत आर्द्रभूपमन्त्री यदा प्रयाणार्थं प्रगुणो[१९] बभूव, तदा अभयकुमारस्तं समाहूय तीर्थकरप्रतिमायुतां[२०] तां पेटां तस्मै समर्प्योवाच, 'भो मन्त्रिन्! त्वयैषा पेटा तस्मै आर्द्रकुमाराय मदीयाभिधान-कथनपूर्वकं समर्पणीया, कथनीयं चाभयकुमारस्त्वां परमसौहार्देन समभिलषति, पेटा चेयं त्वयैवैकान्ते समुद्घाट्य तन्मध्यस्थवस्तु विलोकनीयम्। इत्युक्त्वा तां पेटां तस्मै समर्प्यैको लेखोऽपि तेन तस्यार्द्रकुमारस्यार्पयितुं दत्तः, तल्लेखमध्ये चेयं गाथा लिखितासीत् -

**चित्तं तुम्ह विलग्गं, तुह गुणसवणेण सवणपरितोसो।**
**नयणे मे चवलं, तुह दंसणमहिलसइ ॥१॥**

अथ सोऽमात्योऽपि ततश्चलितः क्रमेण निजनगरे समायातः, श्रेणिका-र्पितप्राभृतवस्तूनि च निजभपाय समार्पयत्। तानि वस्तूनि विलोक्यार्द्रभूपालो-ऽप्यत्यन्तं हृष्टः। ततः स मन्त्री आर्द्रकुमारपार्श्वे गत्वाऽभयकुमारदत्तां पेटां लेखयुतां समर्प्योवाच, 'भोः कुमारेन्द्र! इयं पेटा त्वयैवैकान्ते समुद्घाट-नीयेत्यभयकुमारेण भूरिस्नेहपूर्वकं कथितमस्ति'। ततोऽसावार्द्रकुमारोऽपि रहसि स्वयमेव तां पेटां कुञ्चिकया[२१] समुद्घाट्य तन्मध्यस्थां रत्नाद्याभूषणैर्भूषितां[२२] पूजादिसामग्रीयुतां श्रीयुगादीशजिनप्रतिमां विलोकयामास। तां विलोक्य सोऽचिन्तयत्, अहो! तेन मम परमसुहृदाभयकुमारेण किमिदमपूर्वं वस्तु प्रेषितमस्ति? अद्ययावन्मया कुत्राप्येवंविधं वस्तु न दृष्टम्। किमिदं किञ्चिन्नवीनमाभूषणं विद्यते? एवं चिन्तयन्नसौ तां प्रतिमां निजकण्ठे, मूर्ध्नि, हृदये च स्थापयामास, परं तेन निजदेहस्य कापि शोभा न दृश्यते। ततोऽग्रे तत्सालङ्कारं श्रीयुगादीशबिम्बं सिंहासनारूढं विधाय तत्सन्मुखं स्थित्वा स दध्यौ, किमीदृशं रूपं पूर्वं मया क्वापि दृष्टं? इत्यादि भूयो भूयो भावयन् स आर्द्रकुमारो मूर्च्छामवाप्य जातिस्मरणमाप्तवान्। एवं लब्धजातिस्मरणो-

ऽसाविति[२३] निजपूर्वजन्मास्मरत् , इतो भवात्तृतीयभवेऽहं वसन्तपुरे मगधदेशे सायकाख्यः कौटुम्बिकोऽभवम्, भार्या च मे बन्धुमत्यभिधा बभूव । अन्यदाहं तया मम भार्यया युक्तः श्रीसुस्थिताचार्यपार्श्वे धर्मं श्रोतुमगच्छं, गुरुभिश्चेत्थं धर्मोपदेशो दत्तः, यथा-

**त्रैकाल्यं जिनपूजनं प्रतिदिनं सङ्घस्य सन्माननम् ।**
**स्वाध्यायो गुरुसेवनं च विधिना दानं तथावश्यकम् ॥**
**शक्त्या च व्रतपालनं वरतपो ज्ञानस्य पाठस्तथा ।**
**सैष श्रावकपुङ्गवस्य[२४] कथितो धर्मो जिनेन्द्रागमे ॥१॥**

इत्यादि धर्मोपदेशेन प्रतिबुद्धेन मया भार्यायुतेन श्राद्धद्वादशव्रतानि स्वीकृतानि, कियत्कालं च तानि सर्वाण्यपि व्रतानि मया शुद्धभावेनाखण्डं पालितानि । तत एकदा मूढभावेन प्रमादतस्तानि मया खण्डितानि । अथ कियता कालेनाङ्गीकृतानशना सा मम भार्या बन्धुमती पञ्चत्वं प्राप्ता । तदा तदीयमोहमुग्धेन[२५] मया ध्यातमरेरे ! तया मे प्राणप्रियया विनाऽथ जीवितेन किम् ? इति शोकपरः कृतानशनो मृत्वाहं दिवि देवोऽभवं[२६] ततश्च च्युत्वाहं धर्मवर्जितेऽनार्यदेशे व्रतखण्डनप्रभावतोऽधुना जातोऽस्मि । अथ योऽयमभयकुमारो जिनबिम्बप्रेषणेन मां प्रतिबोधयति, स नूनं ममोपकारी परमबन्धवो गुरुश्चास्ति । अथाहं पितरमनुज्ञाप्य तत्रार्यदेशे गत्वा तस्याभयकुमारस्य मेलिष्यामि, जिनधर्माराधनतश्चेदं जन्म सफलं विधास्ये, एवं मनोरथान् कुर्वन् स तां श्रीयुगादिजिनप्रतिमां विधिना पूजयित्वाऽभयकुमारपार्श्वे गन्तुकामो निजजनकसन्निधौ गत्वा जगाद, 'भोः तात ! अहं भवदीयपरममित्रश्रेणिकनृपतनयाभयकुमारस्य मिलनार्थं तत्र राजगृहनगरं गन्तुमिच्छामि' । तदा स आर्द्रकनृपोऽवदत्, 'भो वत्स ! त्वया तत्र गमनेच्छा न कर्तव्या, यतो विदेशगमनं नूनं विषमं विद्यते । स्वस्थानस्थितस्यैव[२७] पुंसः शोभा भवति । किञ्चास्माकमपि तेन श्रेणिकनृपेण सह दूरस्थितानामेव मैत्री वर्तते, न च वयं कदापि तत्र यामः, न च सोऽप्यत्रायाति' । एवं पित्रा निषिद्धः स आर्द्रकुमारस्तत्र गन्तु-

मुत्सुकोऽपि वारिबद्धो द्विप इव स्थितः ।

**आसने शयने याने, भोजने च क्रियासु च ।**
**अभयालङ्कृतामाशां-प्रति दत्तमना अभूत् ॥१॥**

ततः स तत्रागतपथिकान् सर्वदा पृच्छति, स मगधदेशः कीदृशोऽस्ति ? कीदृक् च सोऽभयकुमारोऽस्ति ? एवं निजतनयमार्द्रकुमारं चलचित्तं विज्ञाय तद्गमनशङ्कया राजा गुप्तं पञ्चशतसुभटानाहूयेत्यादिशत्, 'भोः सुभटाः ! अयमार्द्रकुमारो राजगृहे पुरेऽभयकुमारान्तिकं यियासुरस्ति,[२८] ततः स यथा तत्र गन्तुं न शक्नोति तथा युष्माभिरेतस्य दूरस्थितैरेव रक्षणं कार्यं, परमयं सङ्केतो भवद्भिस्तस्य कदापि नैव वाच्यः,' ओमित्युक्त्वा ते सेवार्थं समागत्य कुमाराय जगुः । 'भोः कुमारेन्द्र ! राज्ञा वयं तव सेवार्थं नियुक्ताः स्मः, आदिष्टमस्ति च यत्किञ्चिदपि तव सेवार्थं विलोक्यते, तत्सर्वं वस्तु कोशाद् ग्रहीतव्यमिति ततो जनकप्रदत्तैस्तैः[२९] सेवकैः परिवृत्तः कुमारो निजस्थानके समायातः, अथ यदा यदा स क्रीडार्थं बहिर्गच्छति, तदा तदा ते सर्वेऽपि सेवकास्तदीयदेहच्छायेव तं कदापि न मुञ्चन्ति । तदा स आर्द्रकुमारो बन्दिनमिव धृतं स्वं मन्यमानो दध्यौ, अथ किं क्रियते ? स्वर्णनिगडानीवैते सेवका मम पदबन्धनकारिणो जाताः, कथं च ममाभयकुमारमीलनं भविष्यति ? एवं चिन्तापरोऽसौ तेषां विश्वासोत्पादनार्थमेवमुपायमकरोत्, प्रत्यहं स तैः सह जात्यतुरङ्गमारूढः पुराद् बहिरुद्याने गच्छति, क्रमाद् दूरं दूरतरं दूरतमं च गत्वा स पश्चाद् व्याघुट्य सर्वदा पुनः समायाति । तदा ते सर्वेऽपि सेवकाश्चिन्तयितुं लग्नाः यदयं कुमारोऽधुना सर्वथाऽभयकुमारपार्श्वे विदेशं गन्तुं नैवेच्छति । एवं जातविश्वासास्ते[३०] निजहृत्सु मनागपि तत्पलायनचिन्तां न कुर्वन्ति । कुमारोऽपि सर्वदा मनोज्ञाशनपानदानदिभिस्तेषां[३१] सन्तोषमुत्पादयति स्म । अथ स आर्द्रकुमारः प्रच्छन्नं समुद्रतीरे निजविश्वस्तपुरुषैरेकं यानपात्रं सज्जयामास । अन्यदासौ जात्यश्वरत्नमारुह्य वेगेन तान् सर्वानपि सेवकान् पश्चाद्विमुच्य तया श्रीयुगादिजिनप्रतिमया युतो महामूल्यरत्नभृतपेटसहितः समुद्रतीरे समागत्य पूर्वं प्रगुणीकृते[३२] तस्मिन् प्रवहणे समारुह्य समुद्रमार्गे चचाल ।

एवं यानपात्रेण प्रयाणं कुर्वन् स कियद्दिनैः समुद्रापरतीरस्थे लक्ष्मीपुरनगरे समुत्तीर्णः इतस्तत्रैव श्रीपुण्यनन्दनाभिधा जैनाचार्याः समाययुः । आर्द्रकुमारोऽपि स्वं धन्यं मन्यमानो धर्मश्रवणार्थं तेषां समीपे समागात् । गुरुभिरपि तं योग्यं विज्ञायेति तस्मै धर्मोपदेशो दत्तः, यथा -

**नृपत्वचक्रित्वहरित्ववैभवम्, धर्मः प्रदत्तेऽनुभवं नवं नवम् ।**
**विधेहितद्धर्मविधानधन्यताम्, पिधेहिनित्यंविषयानुषङ्गिताम् ॥१॥**

**लज्जातो भयतो वितर्कविधितो मात्सर्यतः स्नेहतो,**
**लोभाच्चैव हठाभिमानविनयशृङ्गारकीर्त्यादितः ।**
**दुःखात् कौतुकविस्मयव्यवहृतेर्भावात्कुलाचारतो,**
**वैराग्याच्च भजन्ति धर्मममलं तेषाममेयं फलम् ॥२॥**

**इयं मायारात्रिर्बहलतिमिरा[३३] मोहललितैः,**
**कृतज्ञानालोकास्तदिह निपुणं जाग्रत जनाः ।**
**अलक्ष्यः संहर्तुं ननु तनुभृतां जीवितधना-**
**न्ययं कालश्चौरो भ्रमति भुवनान्तः प्रतिगृहम् ॥३॥**

इत्यादिधर्मोपदेशमाकर्ण्य स आर्द्रकुमारो वैराग्यवासितहृदयो[३४] बभूव । ततोऽसौ सहानीतं सर्वमपि द्रव्यं सप्तक्षेत्र्यामुप्त्वा यतिलिङ्गमुपादातुं सर्वविरत्यर्थं यावत्सामायिकमुच्चरितुमुत्सुकोऽभूत्, तावदाकाशस्थितया शासनदेवतया प्रोक्तम्, 'भो महाभाग ! यद्यपि त्वं महासत्त्वशाल्यसि,[३५] तथापि साम्प्रतं तव दीक्षाग्रहणं न युक्तम्, यदद्यापि ते बहुलं भोगकर्मफलं विद्यते, तद्भोगकर्मफलं भुक्त्वा कियत्कालानन्तरं त्वं चारित्रमाददीथाः, यतः कृतं कर्म भोगफलं विना न त्रुटित, यतः-

**कत्थइ जीवो बलीओ, कत्थइ कम्माइं हुंति बलिआइं ।**
**जीवस्य य कम्मस्स य, पुव्वनिबद्धाइं वइराइं ॥१॥**

**कृतकर्मक्षयो नास्ति, कल्पकोटिशतैरपि[३६] ।**
**अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभम् ॥२॥**

एवं शासनदेवतया निवारितोऽपि स आर्द्रकुमार: सत्त्वत: प्रबलीभूय[३७] यतिरभूत् । एवं स निरतिचारं चारित्रं पालयन्नेकदा विहरन् वसन्तपुरे समायात: तत्र च बाह्यदेवकुले कायोत्सर्गेण तस्थौ ।

अथ तत्र वसन्तपुरे नगरे धनदत्ताख्य एक: श्रेष्ठी वसति, तस्य च श्रीमतीनाम्नी पुत्री बभूव । क्रमाद्वर्धमाना सा बाल्यावस्थामुल्लङ्घ्य धर्मकर्म-सर्वकलाकुशलाऽजनि । अन्यदा समानवयस्काभिर्भूरिभिरिभ्यपुत्रीभि:[३८] परिवृता सा वरवरणक्रीडां[३९] कर्तुं आर्द्रकुमारर्षिसमलङ्कृते[४०] तत्रैव देवकुले समायाता । तदा सर्वा: कन्या बालक्रीडया जगु:, एते सर्वे स्तम्भा वरतुल्या वर्त्तन्ते, वयं सर्वा अपि कन्या: स्म:, यस्यै यो यो वर एषु रोचते, स स तया तया स्वहस्ताऽऽलिङ्गनेनाङ्गीकर्तव्य: । ततस्ता: सर्वा: स्वं स्वमेकैकं स्तम्भं निजवर-बुद्ध्याऽङ्गीचक्रु: । श्रीमती तु स्तम्भमलभमाना तं कायोत्सर्गस्थमार्द्रकुमार-मुनिमेवाङ्गीकृत्येत्युवाच, 'मया त्वयं भट्टारक[४१] एव वृत्त:' । तदाऽकस्मादा-काशे "साधु वृतं" इति जल्पन्ती शासनदेवता तत्र गर्जितादिपुरस्सरं रत्नवृष्टिं चकार । यत:-

**राज्यं सुसम्पदो भोगा:, कुले जन्म सुरूपता ।**
**पाण्डित्यमायुरारोग्यम्, धर्मस्यैतत्फलं विदु: ॥१॥**

ततस्तस्यार्द्रकुमारमुने: पादयोर्लगित्वा सा श्रीमती प्राह, 'भो मुने ! अस्मिन् भवे त्वमेव मम पतिरसि । अहो ! अनुकूलमुपसर्गोऽयं जात:, मदीयव्रतभङ्गश्च भविष्यति, इति ध्यायन् सोऽनगारशिरोमणिस्ततोऽन्यत्र[४२] विजहार । तदा तस्योपरि देवतया रत्नवृष्टिर्कृता, तां देवताकृतरत्नवृष्टिमादित्सू[४३] राजा तयैव शासनदेव्या निषिद्ध: तत एतद्धनमस्यां कन्यायां परिणीतायां तस्या एव भविष्यतीति प्रोच्य राज्ञा तत्सर्वं श्रीमतीपितुरेव समर्पितम् । ततो नृपादय: सर्वेऽपि जना निजं निजं स्थानं ययु: अथ विवाहार्थं तां कन्यां मार्गयितुं बहवो

वरा: समायान्ति, तदा श्रीमती जल्पति स्म, 'यो मुनिर्मया पूर्वं वृतः, स एव मम स्वामी भवतु, अन्याग्निरेव मम शरणं भविष्यति, कुमारिका कन्या त्वेकवारमेव परिणयति, यतः-

**सकृज्जल्पन्ति[४४] राजानः, सकृज्जल्पन्ति साधवः ।**
**सकृत्कन्याः प्रदीयन्ते, त्रीण्येतानि सकृत् सकृत् ॥१॥**

तदा श्रेष्ठी निजपुत्रीं प्राह, 'भो पुत्रि ! परं स महर्षिः कथं प्राप्यः, यत एवंविधा महर्षयः क्षणमप्येकत्र नैव तिष्ठन्ति, ते तु अलय इव स्थानात्स्थानं भ्रमन्ति, ततः सोऽत्र कथमायास्यति ? आगतो वा कथमुपलक्षिष्यते कथं च तस्य नाम ज्ञायते ? किमप्यभिज्ञानं नास्ति, एवंविधा बहवो भिक्षवोऽत्रायान्ति यान्ति च, अतः स सम्यग् नैव ज्ञास्यते, तेन त्वं कदाग्रहं मा कुरु ।' यतः-

**वज्रलेपस्य मूर्खस्य, नारीणां मर्कटस्य च ।**
**एकाग्रहस्तु मीनानाम्, नीलिमद्यपयोस्तथा ॥१॥**

तत् श्रुत्वा श्रीमती प्राह, 'भोः पितः ! यदाहं तस्य मुनेः पादयोर्लग्ना, तदा मया विद्युदुद्योतेन गजाकृतिरूद्ध्वरेखा तस्य पादे दृष्टास्ति, तादृक-चिह्नयुतं[४५] तं मुनिं नूनमहमुपायेन शोधयिष्यामि' । तत् श्रुत्वा पित्रा प्रोक्तम्, 'भोः पुत्रि ! यः कोऽप्युपायस्ते रोचते तं सुखेन कुरु' । एवं जनकेन प्रोक्तया तया श्रीमत्येत्यभिग्रहः कृतः, यथा मया नित्यं चतसृभ्यो दिग्भ्योऽत्र समागतानां मुनीनां शुद्धान्न-पानादिभिः प्रतिलाभ्यैव तच्चरणवन्दनपूर्वकं भोजनं कार्यम् । इत्यभिग्रहपरैषा नित्यं मुनिभ्यः शुद्धान्नपानादि दत्त्वा तेषां चरणवन्दनं करोति । एवं कुर्वन्त्यास्तस्या द्वादश वत्सरा[४६] निर्गताः । अथैकदा देवीविहितदिग्मोहः[४७] स एवार्द्रकुमारमुनिर्विहारं कुर्वन्स्तत्रैव नगरे समायातः । तं मुनिं प्रतिलाभयन्ती श्रीमती तत्पादयोर्वन्दमाना सम्यगुपलक्ष्य जगौ, 'भो मुने ! तदा देवकुले क्रीडन्त्या मया त्वं वृतोऽसि, अतस्त्वमेव मम वरोऽसि । तदा मां विप्रतार्य त्वं पलायितः, अधुना मदीयहस्तागतस्त्वं कथं यास्यसि ? अथ यदि त्वं मामवगणयिष्यसि, तदा तुभ्यमात्महत्यां दास्यामि, एवं स्त्रीहत्यापातकं च ते

श्वभ्रपदं[४८] भविष्यति,' इत्युक्त्वा सा श्रीमती तस्य मुनेर्हस्तं निजहस्तेन दृढं गृहीत्वैवास्थात् । इतस्तमुदन्तं विज्ञाय राजादयो बहवो लोकास्तत्र मिलिताः । राजा तमार्द्रकुमारमुनिं प्रति जगौ, 'भो मुने ! अथ यदि त्वमिमां कन्यामङ्गीकरिष्यसि, तदैव सा जीविष्यति, अन्यथेयं नूनं तवात्महत्यां दास्यति' । तत् श्रुत्वा स आर्द्रकुमारमुनिरपि तां शासनदेवतावार्णीं सस्मार, दध्यौ चाधुना समापतितं देवतोक्तं भोगकर्मफलमन्यथा कर्तुं नैव शक्यते, दैवीवाचो नैवान्यथा भवन्ति । यतः-

**आरोहतु गिरिशिरं, समुद्रमुल्लङ्घ्य यातु पातालम् ।**
**तत्रापि ध्रुवमन्वेति, कृतं शुभाशुभं कर्म ॥१॥**

इति विचार्य स आर्द्रकुमारमुनिर्नृपादीनामुपरोधेन तां कन्यां परिणीतवान् । ततस्तया सह भोगान् भुञ्जानस्य तस्यार्द्रकुमारस्य सुतः समुत्पन्नः । तस्य जन्मोत्सवोऽपि तेन विहितः । क्रमेण स सुतो वृद्धिं प्राप । तत एकदा पुनर्वैराग्यवासितहृदयः स आर्द्रकुमारो निजां पत्नीं प्राह, 'हे प्रिये ! अथायं पुत्रस्ते सहायभूतो जातोऽस्ति, अहं चाथ पुनर्दीक्षां ग्रहीष्यामि' । एवंविधं निजस्वामिवचनं श्रुत्वा विषण्णा सा श्रीमती पुत्रं प्रति तज्जनकाभिप्रायं ज्ञापयितुं तूलपूणिकां गृहीत्वा तर्कुणा[४९] कर्तयितुमुपविष्टा । इतो लेखशालातः समागतः स बालो मातरं कर्तयन्तीं वीक्ष्य जगौ, 'भो मातः ! किमिदमनीदृशं कर्मकरजनोचितं[५०] कर्म त्वयाऽऽरब्धम् ?' तत् श्रुत्वा श्रीमती जगौ, 'तव पिता दीक्षां गृह्णाति, ततस्तेन मुक्ताया ममाथाजीविकार्थं तर्कुरेवायं शरणम् । बालेनोक्तम्, मातस्त्वया दुःखं न कार्यम्, अहं तथा करिष्ये यथा मम पिता दीक्षार्थं गन्तुमेवाशक्तो भविष्यति । इत्युक्त्वा तत्र सुप्तस्य निजजनकस्य पादौ तर्कुसूत्रेण वेष्टयित्वा स जगौ, 'भो जनक ! ईदृशैः सूत्रतन्तुभिर्बन्धस्त्वं दीक्षार्थमितः कथं गमिष्यसि ?' ततोऽसौ मातुः सन्मुखं विलोक्य जगौ, 'भो मातः ! मया मे पित तथा बद्धोऽस्ति, यथा स गन्तुं न शक्नोति । एवंविधं बालचेष्टितं विलोक्यार्द्रकुमारो दध्यौ, नूनं ममास्य पुत्रस्य मोहोऽद्यापि दीक्षार्थं निवारयति, यतो मयि दीक्षिते अस्य पुत्रस्य पत्न्याश्च का गतिर्भविष्यति ? इति ध्यात्वा मोहाभि-

भूतेनार्द्रकुमारेवोति निजहृदये निश्चितम्, अनेन बालेन यावन्तस्तन्तवो मदीय-पादयोर्वेष्टिताः सन्ति, तावन्ति वर्षाणि मया गृहवासे एव स्थेयम् । ततः स आर्द्रकुमारस्तान् तन्तून् गणयामास, सर्वे द्वादश तन्तवो जाताः, ततस्तेन श्रीमतीं प्रियां प्रयुक्तम्, 'हे प्रिये ! त्वं चिन्तां मा कुरु अद्याप्यहं द्वादश वत्सराणि गृहे एव स्थास्यामि,' तदनन्तरं नूनं दीक्षां लास्ये । एवं सुतप्रतिबन्धेन[५१] स द्वादश वर्षाणि गृहे स्थित्वान्येद्युरिति दध्यौ-

**भवकूपाद्विनिर्गन्तुम्, व्रतमालम्ब्य रज्जुवत् ।**
**मया प्राप्तं च मुक्तं च, मग्नस्तत्राप्यहं पुनः ॥१॥**

**मनसैव व्रतं भग्नम्, प्राग्जन्मनि ततोऽप्यहम् ।**
**अनार्यत्वं प्रपन्नोऽस्मि, का गतिः स्यादतः परम् ॥२॥**

**भवत्विदानीमप्यात्त[५२]परिव्रज्यस्तपोऽग्निना ।**
**साक्षात्प्रक्षालयिष्ये स्वम्, मलिनीभूतहेमवत् ॥१॥**

इति ध्यात्वा स आर्द्रकुमारो निजां पत्नीं श्रीमतीं प्रति प्राह, 'हे प्रिये ! अथाहं दीक्षां लास्यामि,' तदा श्रीमती जगौ, 'हे स्वामिन् ! त्वा विनाहं कथं जीविष्यामि ? पुत्रस्यास्य च का गतिर्भविष्यति ?' तदार्द्रकुमारो जगौ 'हे प्रिये ! कथं त्वयैवमुच्यते ? अस्मिन्नसारे संसारे कोऽपि कस्यापि नास्ति, निजनिज-कर्मप्रेरिता जीवाः संयुज्यन्ते, वियुज्यन्ते च । यतः-

**जातश्चैको वृतश्चैक, एको धर्म करोति च ।**
**पापं स्वर्गसुखे जीवः, श्वभ्रे गच्छति कः समं ॥१॥**

**मूढाःकुर्वन्ति ये मे मे, वपुः पुत्रगृहादिकम् ।**
**तेऽपि त्यक्त्वा च रोगार्त्ताः मज्जन्ति भवसागरे ॥२॥**

**लाति पुनः पुनर्जीवो, नवं देहगृहादिकम् ।**
**कथं मे मे तनुर्गेहम्, कलत्रं कुरुते जडः ॥३॥**

**कुटुम्बं धनधान्यादि, सर्वमत्रापदां पदम् ।**
**देहं च मन्यते यः स्वम्, कर्म बध्नाति सोऽल्पधीः ॥४॥**

**एको धर्ममुपार्जितं च विबुधः कृत्वा स्वयं गच्छति,**
**स्वर्गे पापमुपार्ज्य घोरनरकं दुःखाकरं प्राणभृत् ।**
**एको दुःखतति[५३] ह्यसारमपि भो ! धृत्वा च मुक्त्वालयम्,**
**तस्मात्त्वं भज भावतो हि शरणं धर्मं त्यज स्वं गृहम् ॥५॥**

इत्यादिवचनैः पत्नीं पुत्रं च प्रतिबोध्य स्वयं पुनर्यतिलीङ्गमुपादाय निर्ममो निरहङ्कारः स निजगृहान्निर्गत्य वने गतः । एवं स आर्द्रकुमारमुनिरथ राजगृहं प्रति गच्छन् अन्तराले [५४]चौर्यवृत्तिपरं स्वं सामन्तशतपञ्चकमुपलक्ष्य यावत्तत्र स्थितस्तावत् नूनमयमस्माकं स्वाम्येवेत्युपलक्ष्य तैर्भूयस्या भक्त्या वन्दितः । ततः आर्द्रकुमारमुनिस्तान् जगाद, 'भो सामन्ताः ! युष्माभिः किमीदृशीयं पापकारिणी च [५५]दुर्गतिदायिनी वृत्तिः समारब्धा ?' यतः-

**चौर्यपापद्रुमस्येह, वधबन्धादिकं फलम् ।**
**जायते परलोके तु, फलं नरकवेदना ॥१॥**

तदा ते सेवका जगुः, 'हे स्वामिन् ! यदा त्वमस्मान् वञ्चयित्वा गतस्तदास्माभिः सर्वत्र विलोकितोऽपि न दृष्टः । तदास्माभिश्चिन्तितमार्द्रकुमारस्तु गतः, अथ वयं भूपस्य कथं स्वमुखानि दर्शयामः ? इति विचिन्त्य वयं सर्वेऽपि यानारूढा अत्र समागताः, अत्रापि बहु विलोकमाना अपि वयं त्वामनुपलभ्य चौर्यवृत्तिमाचरामः' । तदा मुनिराह 'भो भद्राः ! कष्टे समागतेऽपि सद्भिश्चौर्य-वृत्तिर्नैव विधेया, इदं दुर्लभं मनुष्यजन्म प्राप्य सज्जनैस्तद्विधेयम्, येनागामिनि जन्मनि शुभगतिर्भवेत्, यतः-

**जन्तूनामवनं, जिनेशमहनं,[५६] भक्त्यागमाकर्णनम्[५७],**
**साधूनां नमनं, मदापनयनं, सम्यग्गुरोर्माननम् ।**

**मायाया हननं विशुद्धिकरणं [५८]लोभद्रुमोन्मूलनम्,**
**चेतःशोधनमिन्द्रियाश्वदमनं यत्तच्छिवोपायनम् ॥१॥**

**केनापि पुण्ययोगेन, मानुष्यकमवाप्यते ।**
**प्राप्य तद्दुर्लभं धर्मः, कार्यः स्वर्गापवर्गदः ॥२॥**

**दया जीवेषु सत्योक्ति-रस्तेयं ब्रह्मचारिता ।**
**आकिञ्चन्यं च धर्मोऽयम्, जिनैरेव निवेदितः ॥३॥**

ततो भोः सामन्ताः ! यदि भवन्तो मयि भक्तिमन्तस्तदा मदीय-मार्गमाश्रयध्वम् ? ततो युष्माकमत्यन्तं सुखं भविष्यति' । तत् श्रुत्वा ते प्रोचुः, 'त्वमेवास्मत्स्वामी वर्तसे, तद्भवद्भिर्यत्किञ्चिदादिश्यते, तदेव वयं करिष्यामः' । इत्युक्त्वा तैः सर्वैरपि दीक्षा गृहीता । ततस्तैः समं स आर्द्रकुमारर्षिः श्रीमहावीरं वन्दितुं विहारं कुर्वन् [५९]राजगृहोपान्तस्थोद्याने ययौ, तत्र केचित्तापसा एकं महान्तं हस्तिनं हत्वा तन्मांसं भक्षयन्तस्तिष्ठन्ति स्म । तादृक्कर्म कुर्वतस्तान् वीक्ष्य स आर्द्रकुमारर्षिः प्राह, 'भो महानुभावाः ! जीवहिंसा कर्तुं न युज्यते, जीवहिंसया हि प्राणिनामधमा गतिर्भवति, यतः-

**अस्थिनि वसति रुद्रश्च, मांसे वसेज्जनार्दनः[६०] ।**
**शुक्रे वसति ब्रह्मा च, तस्मान्मांसं न भक्षयेत् ॥१॥**

**तिलसर्षपमात्रं च, मासं यो भक्षयेन्नरः ।**
**तस्य स्यान्नरके वासो-ऽनन्तदुःखप्रदोऽङ्गिनः ॥२॥**

तत् श्रुत्वा ते तापसाः प्रोचुः वयमेकमेव महान्तं जीवं हत्वा तन्मांसभक्षणपरा जीवामः, यूयं तु बहूनां धान्यजीवानां हिंसां कृत्वा निजाजीविकां विधास्यथ । इत्युक्त्वा ते दयाभासवन्तस्तापसा एकं महान्तं हस्तिनं तरुणा सह बबन्धुः। बहुभारलोहशृङ्खलाबद्धोऽसौ हस्ती तमार्द्रकुमार-मुनिमालोक्य जीर्णरज्जुमिव तां शृङ्खलां त्रोटयित्वा वेगेन वन्दितुं चलितः एवं

वेगेन धावन्तं तं गजेन्द्रं दृष्ट्वा ते सर्वेऽपि तापसाः 'हा ! हा ! अयं यतिर्हतो हत' इति पूत्कुर्वन्तस्तत्पश्चाद् धाविताः, परं स हस्ती तु तत्र गत्वा तमार्द्रकुमारमुनिं ननाम, तदा आर्द्रकुमारमुनिस्तं हस्तिनं जगौ, 'भो गजेन्द्र ! तव यदि धर्मे रुचिर्भवेत्तदा जैनधर्ममङ्गीकुरु,' एवं मुनिनोक्तोऽसौ पुनस्तं मुनिं प्रणनाम । मुनिनापि पुनरुक्तं 'भो गजेन्द्र ! यदि तवानशनग्रहणेच्छा, तदानशनं गृहाण' । ततस्तेन हस्तिनाऽशनं गृहीतम् । एवं हस्तिचेष्टितं दृष्ट्वा प्रबुद्धास्ते तापसा अपि जीवदयामूलं धर्ममङ्गीचक्रुः । अथ श्रेणिकनृपोऽपि गजशृङ्खलात्रोटना-नशनग्रहणतापसप्रतिबोधादिं श्रुत्वा अभयकुमारसहितस्तत्रागतः, भक्त्या च तमार्द्रकुमारमुनिं सपरिवारं [६१]पुत्रपौत्रादियुतोऽसौ ननाम । ऋषिणापि [६२]कल्याणकारिधर्माशिषा स प्रीणितः । ततो मुनिनोपदिष्टं धर्मोपदेशं श्रुत्वा राजा जगाद, 'भो महर्षे ! भवद्दर्शनादनेन हस्तिना बहुभारप्रमाणा लोहशृङ्खला यत् त्रोटिता, तद्विषये मे मनसि महदाश्चर्यं जातमस्ति' । मुनिरूचे 'भो नरेन्द्र ! एवंविधलोहशृङ्खलात्रोटनं तु [६३]सुकरम्, परं यदा-[६४]मतन्तुपाशत्रोटनं मया कृतम् तदेव सर्वसंसारिजीवानां दुष्करम्' । तत् श्रुत्वातीवविस्मितेन राज्ञा पृष्टम्, 'भो मुनीन्द्र ! तमतीवाश्चर्यकरं भवदीयाऽऽमतन्तुत्रोटनसम्बन्धं मे श्रावय ? इति नृपप्रार्थितेन तेन मुनिना स्वकीयः सकलोऽपि सम्बन्धः सर्वसमक्षं प्रकटीकृत्य कथितः, तत् श्रुत्वा नृपादयः सर्वेऽपि लोकाश्चमत्कृताः । ततः आर्द्रकुमार-मुनिराह, 'हे राजन् ! अयमभयकुमारो मे परमो बान्धवोऽस्ति, येनाहं तत्रानार्य-देशेऽपि मे श्रीयुगादिजिनप्रतिमाप्रेषणेन प्रतिबोधितः संसारकर्दमे[६५] च पतितोऽहन्तेन समुद्धृतः' । एतदाकर्ण्य सोऽभयकुमारोऽपि वैराग्यवासितहृदयः श्रेणिकं प्रति प्राह, 'भोः तात ! अधुनाहमपि दीक्षां ग्रहीतुमिच्छामि, अतो ममादेशं देहि यतो मदीयमित्रेणानेनार्द्रकुमारेण यत्कृतम् तत्कार्यं ममापि कर्तुं युक्तम्' । तन्निशम्य श्रेणिकोऽवदत्, 'भोः पुत्र ! त्वयाधुना दीक्षाग्रहणविषये किमपि न वाच्यम्, तथापि चेत्त्वं बलाद् दीक्षां ग्रहीष्यसि, तदा त्वन्मातुर्नन्दाया मम च हृदयस्फोटो[६६] भविष्यति, तव च मातापित्रोर्हत्यापापं लगिष्यति' । ततः सोऽभयकुमारः पितृवचसा गृहवासस्थितोऽपि शुद्धं श्राद्धधर्मं पालयति स्म ।

ततः स आर्द्रकुमारमुनिः श्रेणिकाभयकुारयुतः समवसरणस्थं श्रीवीरजिनेन्द्रं [६७]त्रिः प्रदक्षिणीकृत्य वन्दते स्म । वीरप्रभुणापि तस्मै धर्मोपदेशो दत्तः, यथा भो आर्द्रकुमारमुने ! भवता शुद्धं चारित्रमाराधनीयम्, यतः शुद्धचारित्राराधनं विना जीवस्य संसारन्मुक्तिर्न भविष्यति, यतो भूरिमनुष्या दीक्षां गृह्णन्ति, परं शुद्धमनसा स्तोका एव पालयन्ति । धर्म एव च परमबान्धवः, धर्मादेव च स्वार्गापवर्गादि भवति' । ततस्ते श्रेणिकादयः सर्वेऽपि श्रीवीरं प्रणम्य यथास्थानं गताः । ततः स आर्द्रकुमारमुनिस्तीव्रतपोऽग्निना सर्वकर्मेन्धनानि दग्ध्वा केवलज्ञानमवाप्यायुः-क्षयेण मुक्तिपुरीं जगाम ।

इति श्रीजिनप्रतिमादर्शनफलमाहात्म्योपदर्शने

श्री आर्द्रकुमारमुनिचरित्रं समाप्तम् ॥

## : अभ्यास :

प्रश्नः १. अभयकुमारे आर्द्रकुमारस्य स्नेहः कथञ्जातः ?

२. आर्द्रकुमारः जातिस्मरणज्ञानं कथं प्राप्तवान् ?

३. आर्द्रकभूपेण तं न प्रेषयितुं किं कृतम् ?

४. आर्द्रकुमारः अनार्यदेशे कथमुत्पन्नवान् ?

५. आर्द्रकुमारो भोगवलिकर्म कथमभुनक् ?

६. कदा-कदा देववाणी भूता ?

७. आर्द्रकमुनेः अभयकुमारस्य च मिलनं कुत्र कदा अभूत् ?

**१. वीक्षण नपुं. જોવું । २. अध्वन् पुं. માર્ગ ॥ ३. हार्दिक वि. - હૃદયનો (અન્તરંગ) ॥ ४. अम्बुज नपुं.- કમલ ॥ मधूप पुं. ભમરો ॥ ( मधूनि पिबति मधूप ) ॥ ६. शिखिन् पुं. મયૂર ॥ ७. अम्भोद पुं. મેઘ ॥ ८. विषय पुं. દેશ ॥ आर्द्रकश्चासौ भूपश्च आर्द्रकभूप ॥ ( वि. पू. कर्म. ) आर्द्रकभूपस्य प्रीतिः आर्द्रकभूपप्रीतिः ( ष. तत्पु. ) आर्द्रकभूपप्रीतेः सम्पादनम् आर्द्रकभूपप्रीतिसम्पादनम् ॥ ( चतु. तत्पु. ) આર્દ્રકરાજાની પ્રીતિના સંપાદન માટે ॥ १०. उदन्त पुं. - સમાચાર ॥ ११. रहोवृत्ति स्त्री. ગુપ્તપણે ॥ १२. ओम् अव्यय. હા ॥ १३. भोजनञ्च पानञ्च भोजनपाने ॥ ( द्वन्द्व. ) मनोहरे च ते भोजन**

पाने च मनोहरभोजनपाने ॥ ( वि. पू.क. ) मनोहरभोजनपाने आदौ येषान्ते मनोहरभोजन-पानादयः ॥ ( ब. व्री. ) तैः मनोहरभोजनपानादिभिः ॥ મનોહર ભોજન પાનાદિ વડે ॥ १४. यानम् आरूढाः यानारूढाः ॥ ( द्वि. तत्पु. ) વાહન ઉપર આરૂઢ થયેલા ॥ १५. आसन्न वि. નજીક ॥ १६. मिष. नपुं- બહાનું ॥ १७. पेटा स्त्री મોટી પેટી ॥ १८. तालक नपुं. તાળું ॥ १९. प्रगुण वि. - તૈયાર ॥ २०. तीर्थं करोति तीर्थंकरः ॥ ( उपपद. ) तीर्थंकरस्य प्रतिमा तीर्थंकरप्रतिमा ॥ ( ष. तत्पु. ) तीर्थंकप्रतिमया युता तीर्थंकरप्रतिमायुता ॥ ( तृ. तत्पु. ) ताम् तीर्थंकरप्रतिमायुताम् ॥ તીર્થંકરની પ્રતિમાથી યુક્ત એવી ॥ २१. कुञ्चिका स्त्री. ચાવી ॥ २२. रत्नम् आदौ येषान्ते रत्नादयः ( ब. व्री. ) रत्नादीनामा-भूषखणानि रत्नाद्याभूषणानि ॥ ( ष.त. ) तैः रत्नाद्याभूषणे ॥ રત્નાદિ આભૂષણોથી ॥ २३. जातेः स्मरणम् जातिस्मरणम् ॥ ( ष. तत्पु. ) लब्धं जातिस्मरणं येन सः लब्धजाति स्मरणः ॥ ( ब.व्री. ) પ્રાપ્ત કરાયું છે જાતિ સ્મરણ જેના વડે એવો તે ॥ २४. श्रावकेषु पुङ्गवः श्रावकपुङ्गवः ॥ ( स. तत्पु. ) तस्य श्वकपुङ्गवस्य ॥ શ્રેષ્ઠ શ્વકનો ॥ २५. तस्या अयम् तदीय ॥ ( तद्धित. ) तदीयश्चासौ मोहश्च तदीयमोहः ॥ ( वि. पू. क. ) तदीयमोहेन मुग्धः तदीयमोहमुग्धः ॥ तेन-तदीयमोहमुग्धेन ॥ ( तृ. तत्पु. ) તેણીના મોહથી મુગ્ધ એવા મારા વડે ॥ २६. दिव् पुं. સ્વર્ગલોક ॥ २७. स्वस्य स्थानम् स्वस्थानम् ॥ ( ष. तत्पु. ) स्वस्थानेः स्थितः स्वस्थानस्थितः ॥ ( स. तत्पु. ) तस्य स्वस्थानस्थितस्य ॥ પોતાના સ્થાને રહેલાની ॥ २८. यियासु वि. -દજવાની ઇચ્છાવાળો ॥ २९. जनकेन प्रदत्ताः ॥ ( त. तत्पु. ) तैः जनकप्रदत्तैः ॥ પિતાએ આપેલા તેઓ સાથે ॥ ३०. जातः विश्वासः येषान्ते जातविश्वासाः ( बहु. ) ઉત્પન્ન થયો છે વિશ્વાસ જેઓને એવા તે ॥ ३१. मनोज्ञ वि-મનોહર ॥ ३२. प्रगुणीकृत ( च्वि. ) તૈયાર કરાયેલ ॥ ३३. बहल वि.- ઘણું. પુષ્કળ ॥ ३४. वैराग्येन वासितम् वैराग्यवासितम् ॥ ( तृ. तत्पु. ) वैराग्यवासितं हृदयं यस्य सः वैराग्यवासित-हृदयः ॥ ( बहु. )વૈરાગ્યવાસિત હૃદયવાળો ॥ ३५. महच्च तद् सत्त्वञ्च महासत्त्वम् ॥ ( वि. पू. क. ) महासत्त्वेन शालते इत्वेवंशीलः महासत्त्वशाली ॥ महासत्त्वशास्नी ॥ ३६. कल्प पुं. ભવા ॥ ३७. न प्रबलः अप्रबलः ॥ ( नञ् तत्पु.: अप्रबलः प्रबलः इव भूत्वा प्रबलीभू. ( ( च्वि. ) ઘણા બળવાળો થઈને. ॥ ३८. इभ्य पुं. શેઠ. ३९. वरण नपुं. વરવાની ક્રિયા ॥ ४०. आर्द्रकुमारश्चासौ ऋषिश्च आर्द्रकुमारर्षिः ॥ ( वि. उत्त क. ) आर्द्रकुमारर्षिणा समलङ्कृतम् आर्द्रकुमारर्षिसमलङ्कृतम् ॥ ( तृ. तत्पु. ) तस्मिन् आर्द्रकुमारर्षिसमलङ्कृते ॥ આર્દ્રકુમારઋષિથી અલંકૃત એવા તે. ॥ ४१. भट्टारक पुं. સંત, સાધુ ॥ ४२. नास्ति अगारं येषान्ते अनगाराः ॥ ( न्म. ब. व्री. ) अनगारेषु शिरोमणिः ( स. तत्पु. ) શ્રેષ્ઠ અણગાર. ४३. आदित्सु वि. ગ્રહણ કરવાની ઇચ્છાવાળો ४४. सकृत् अव्य. એકવાર ॥ ४५. तद् इव दृश्यते इति तादृक् ॥ ( उपपद. ) तादृक् च

तद् चिह्नञ्च तादृक्चिह्नम् ! ( वि. पू. क. ) तादृक्चिह्नेन युतः तादक्- चिह्नयुतः ॥ ( तृ. तत्पु. ) तम् तादृकचिह्नयुतम् ॥ તેવા પ્રકારના ચિહ્નથી યુક્ત એવા તેને ॥ ४६. वत्सर पुं. वर्ष ॥ ४७. देव्या विहितः देवीविहितः ( तृ. तत्पु. ) दिशः मोहः दिग्मोहः ( ष. त. ) देवीविहितः दिग्मोहः यस्य सः देवीविहितदिग्मोहः ॥ ( समा. बहु. ) દેવીથી કરાયેલા દિશાના મોહવાળો ॥ ४८. श्वभ्रप्रद वि. - નરકે આપનાર ॥ ४९. तर्कु पुं. તકલી ॥ ५०. कर्म करोति इति कर्मकरः ॥ ( उपपद. ) कर्मकरश्चासौ जनश्च कर्मकरजनः ॥ ( वि. पू. क. ) कर्मकरजनेन उचितम् कर्मकरजनोचितम् ॥ ( तृ. तत्पु. ) કાર્ય કરનાર માણસથી ઉચિત. ५१. प्रतिबन्ध पुं. આગ્રહ ॥ ५२. आत्ता परिव्रज्या येन सः आत्तपरिव्रज्य ॥ ( बहु. ) સ્વીકારી છે દીક્ષા જેણે એવો તે ॥ ५३. तति स्त्री. - સમૂહ ॥ ५४. चोरस्य भावः चोर्यम् ॥ ( तद्धित. ) चौर्यस्य वृत्तिः चौर्यवृत्तिः ॥ ( ष. तत्पु. ) चौर्यवृत्तौ तत्परः चौर्यवृत्तितत्परः ॥ ( स. तत्पु. ) तम्-चौर्यवृत्तित्परम् ચોર વૃત્તિમાં તત્પર ॥ ५५. दुष्टा चासौ गतिश्च दुर्गतिः ( वि. पू. क. ) दुर्गतिं ददाति इत्येवंशील-दुर्गतिदायिनी ॥ ( उपपद. ) દુર્ગતિને આપનારી ॥ ५६. महन नपुं. પૂજા કરવી તે. ५७. आकर्णन नपुं. સાંભળવું તે ॥ ५८. लोभः एव द्रुमः लोभद्रुमः ॥ ( अवधा. कर्म. ) लोभद्रुमस्य उन्मूलनम् लोभदूमोन्मूलनम् ॥ ( ष. तत्पु. ) ॥ ५९. राजगृहस्य उपान्तम् राजगृहोपान्तम् ( ष.तत्पु. ) राजगृहोपान्ते तिष्ठति इति राजगृहोपान्तस्थम् ॥ ( उपपद. ) राजगृहोपान्तस्थञ्च तद् उद्यानञ्च राजगृहोपान्तस्थोद्यानम् ॥ ( वि. पू. क. ) तस्मिन् राजगृहोपान्तस्थोद्याने ॥ ६०. जनार्दन पुं.-કૃષ્ણ ॥ ६१. पुत्रस्य अपत्यानि पौत्राः ( तद्धित ) पुत्राश्च पौत्राश्च पुत्रपौत्राः ( द्वन्द्व. ) पुत्रपौत्राः आदौ येषान्ते पुत्रपौत्रादयः ॥ ( ब. व्री. ) पुत्रपौत्रादिभिः युतः पुत्रपौत्रादियुतः ॥ ( उपपद. ) પુત્રપૌત્રાદિથી યુક્ત ॥ ६२. कल्याणं करोति इति कल्याणकारी ॥ ( उपपद. ) कल्याणकारी चासौ धर्मश्च कल्याणकारिधर्मः ( वि.पू.क. ) कल्याणकारिधर्मस्य आशीः ॥ ( ष. त. ) तया-कल्याणकारिधर्माशिषा ॥ કલ્યાણકારીધર્મના આશીર્વાદથી ॥ ६३. सुकर वि. સરળ, સહેલું ॥ ६४. आम वि. - કાચું ॥ ६५. कर्मम पुं. કાદવ ॥ ६६. स्फोट पुं. ભંગ, નાશ ॥ ६७. त्रिः अव्यय. - ત્રણવાર ॥

• • •

[ १२ ]

## ॥ श्रीकामकुम्भकथा ॥

पान्तु वः श्रीमहावीर-स्वामिनो देशनागिरः[१] ।
[२]भव्यानामान्तरमल-प्रक्षालनजलोपमाः ॥१॥

यः प्राप्य [३]दुष्प्राप्यमिदं नरत्वम्,
धर्मं न यत्नेन करोति मूढः ।
क्लेशप्रबन्धेन स लब्धमब्धौ,
चिन्तामणिं पातयति प्रमादात् ॥२॥

धर्मतः सकलमङ्गलावली, धर्मतः सकलसौख्यसम्पदः ।
धर्मतः स्फुरति निर्मलं यशो, धर्म एव तदहो विधीयताम् ॥१॥

धर्मश्चिन्तामणिः श्रेष्ठो, धर्मः कल्पद्रुमः परः ।
धर्मः कामदुधा धेनु-र्धर्मः सर्वफलप्रदः ॥२॥

वने रणे शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ॥३॥

व्यसनशतगतानां क्लेशरोगातुराणाम्,
मरणभयहतानां दुःखशोकार्दितानाम् ।
जगति बहुविधानां व्याकुलानां जनानाम्,
शरणमशरणानां नित्यमेको हि धर्मः ॥४॥

धर्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्बलम्,
धर्मेणैव भवन्ति निर्मलयशोविद्यार्थसम्पत्तयः ।

**कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते,**
**धर्मः सम्यगुपासितो भवति हि [४]स्वर्गापवर्गप्रदः ॥५॥**

**धर्मोऽयं धनवल्लभेषु धनदः कामार्थिनां कामदः,**
**सौभाग्यार्थिषु तत्प्रदः किमपरं पुत्रार्थिनां पुत्रदः ।**
**राज्यार्थिष्वपि राज्यदः किमथवा नानाविकल्पैर्नृणाम्,**
**तत्किं यन्न करोति किञ्च कुरुते स्वर्गापवर्गावपि ॥६॥**

**पत्नी प्रेमवती सुतः सुविनयो भ्राता गुणालङ्कृतः,**
**स्निग्धो बन्धुजनः सखापि चुतरो नित्यं प्रसन्नः प्रभुः ।**
**निर्लोभानुचराः[५] स्वबन्धुसु मनः प्रायोऽत्र भोग्यं धनम् ।**
**पुण्यानामुदयेन सन्ततमिदं कस्यापि सम्पद्यते ॥७॥** तथाहि-

श्रीपुरनगरे जितारिः पृथिवीपतिः, तस्य मतिसागरनामा मन्त्री, सोऽतीवमान्यः, राजा वदति राज्यादिकं सर्वं पापेन भवति, मन्त्र्याह 'मैवं वद राजन्! पापफलं त्वेवं-

**कुग्रामवासः कुनरेन्द्रसेवा, कुभोजनं क्रोधमुखी च भार्या ।**
**कन्याबहुत्वं च दरिद्रता च, षड् जीवलोके नरका भवन्ति ॥८॥**

**मन्त्री तु धर्मादेव सर्वं भव्यं भवतीति मन्यते ।**

इति वदतो राज्ञः पापबुद्धिरिति नाम जातम्, मन्त्रिणस्तु पुण्यबुद्धिरिति, एवं सभान्तरे सर्वदा पुण्यपापविषये विवादो भवति। एकदा राज्ञोक्तं 'त्वं पुण्यं मन्यसे, तेन तव स्वल्पा लक्ष्मीः । मम च पापादेव राज्यादिसुखम्, यद्यहं युद्धवधादिकं करोमि। तेन मे हयगजान्तःपुरभाण्डागारादिवृद्धिः । तव च पुण्यं कुर्वतोऽपि यत्तव गृहे द्रव्यादि किमप्यस्ति तदपि समस्तं मया समर्पितमेव, न च ते पुयफलम्। एवं सत्यपि यदि त्वं धर्मं मन्यसे तदा धनं विनैकाकी देशान्तरे गत्वा धर्मादेव धनमर्जयित्वाऽऽगच्छ, तदाहं ते धर्मफलं वेद्मि' । मन्त्रिणोक्त-

मेवमस्तु ।

एवमुक्त्वा मन्त्री देशान्तरे गतः, एकदा रात्रावटव्यां गच्छतस्तस्य कोऽपि राक्षसो मिलितः, मन्त्रिणा तस्मिन् दृष्टमात्रे पूत्कारः कृतः, मा मा इत्युक्ते राक्षसेनोक्तं मा मेति मा वद, अद्याहं [६]सप्तदिनबुभुक्षितस्त्वां भक्षयिष्यामि, मन्त्रिणोक्तमधुना तावन्ममोपरि त्वं प्रसादं कुरु, यत्सम्प्रति मम कार्यमस्ति, अहं कार्यार्थमग्रे गच्छन्नस्मि । तत्कृत्वा पश्चाद्वलमानस्तव क्षुधोपशमं करिष्यामि, इत्युक्ते पुण्यप्रभावाद्राक्षसेन स मन्त्री मुक्तः, अथाग्रे गच्छता तेन कस्यचिन्नगरस्यासन्ने [७]वाटिकायां श्रीऋषभदेवप्रासादो दृष्टः, तत्र गत्वाऽतिहृष्टः सन् स स्वहृदयोद्भूतभावेन वीतरागस्तुतिं पठति, यथा-

**[८]अमोघा [९] वासरे विद्युदमोघं निशि गर्जितम् ।**
**अमोघं साधुवचन-ममोघं देवदर्शनम् ॥९॥**

**न यान्ति दास्यं न दरिद्रभावं न प्रेष्यतां नैव च हीनयोनिम् ।**
**न चापि वैकल्यमथेन्द्रियाणां ये कारयन्त्यत्र जिनेन्द्रपूजाम् ॥१०॥**

**धन्यानां ते नरा धन्या, ये जिनेन्द्रमुखाम्बुजम् ।**
**निर्विकारि मनोहारि, पश्यन्ति दिवसोदये ॥११॥**

इत्यादि तत्स्तुत्या मुदितः प्रतिमाऽऽरक्षककपर्दीयक्षः प्रत्यक्षो जातः, इति श्रीजिनभक्तिसंतुष्टेन तेन कपर्द्दियक्षेण बहिर्गत्वा तस्य कामघटः समर्पितः, मन्त्रिणोक्तं भो यक्ष ! अहमेनं घटं कथं गृह्णामि ? कथं वा स्थापयामि ? अनेन समीपस्थेन च पुरुषस्य लज्जा स्यात् । ततो देवेनोक्तमनुत्पाटित एवायं घटोऽदृष्टः सन् तव पृष्ठ आगमिष्यति । ततो मन्त्रिणा मानितम्, ततः स मन्त्री कृतकृत्यः सन् तं कामकुम्भं लात्वा स्वगृहं प्रति चलितः ।

अथ पश्चाद्वलमानः स तस्यामेवाटव्यां समागतः, तदा राक्षसोऽपि समायातः, तेन राक्षसेनोक्तमथ त्वं स्वं वचः पालय । मन्त्रिणोक्तं पालयिष्यामि, परं किमनेन मेऽशुचिना शरीरेण भक्षितेन ? यतः-

**रसासृग्मांसमेदास्थि-मज्जाशुक्राणि धातवः ।**
**सप्तैव दश वैकेषां, रोमत्वक्स्नायुभिः सह ॥१२॥**

**अमेध्यपूर्णे[१०] कृमिजालसङ्कुले स्वभावदुर्गन्धअशौचनिन्हवे ।**
**कलेवरे मूत्रपुरीषभाजने, लषन्ति मूढा विरमन्ति पण्डिताः ॥१३॥**

पुनर्मन्त्रिणोक्तं हे राक्षस मम शरीरेण तव कार्यम् ? वा सरसरसवत्या[११] तव कार्यम् ? तेनोक्तं तर्हि सरसां रसवतीं देहि ! तदा तेन मन्त्रिणा कामघटप्रभावेण यथेष्टां रसवतीं तस्मै दत्त्वा तस्य दिव्याहारो भोजितः, ततः संतुष्टेन राक्षसेनोक्तमेवंविधा रसवती त्वया कथं दत्ता ? सधर्मेणाऽसत्य-पापभीरूणा[१२] च तेन मन्त्रिणा सत्मेवोक्तं । यत्कामघटप्रभावेण, ततो राक्षसेन स कामघटो याचितः, तदा मन्त्रिणोक्तमेवंविधं कामघटमहं कथं तवा-ऽर्पयामि ? राक्षसेनोक्तं यदि त्वमर्पयियसि तदाऽहमतः परं हिंसां न करिष्यामि, तव च ततः पुण्यं भविष्यति, अहमपि च तव सकलकार्यकरं रिपुशस्त्रनिवारकं कथित-कार्यकारकं देवताधिष्ठितं च दण्डमर्पयिष्यामि, अतस्त्वं मे कामघटं समर्पय मन्त्रिणोक्तमहं समर्पयामि, तथापि तवाऽधर्मेण स न स्थास्याति सर्वथा, राक्षसेनोक्तमहं सर्वं प्रयत्नेन स्थापयिष्यामि इत्युक्ते मन्त्रि दण्डप्रभावं ज्ञात्वा, घटं च तस्मै अर्पयित्वा दण्डं च गृहीत्वाऽग्रतश्चचाल । तस्य मन्त्रिणो गच्छतो द्वितीयदिने [१३]बुभुक्षा लग्ना, तदा तेन दण्डश्चालापितो, यत्त्वं भोजनं दास्यसि ? तेनोक्तं न हि भोजनदाने मम सामर्थ्यम्,

**आदौ रूपविनाशिनी कृशकरी कामस्य विध्वंसिनी,**
**ज्ञानं मन्दकरी तपः क्षयकरी धर्मस्य निर्मूलनी ।**
**पुत्रभ्रातृकलत्रभेदनकरी [१४]लज्जाकुलच्छेदिनी,**
**सा मां पीडयति सर्वदोषजननी प्राणापहारी क्षुधा ॥१४॥**

दण्डेनोक्तम् अन्यत्किमपि कार्यं मम कथय, तत्करिष्यामि । तेनोक्तं तर्हि कामघटमानय । तदा स आनेष्यामीत्युक्त्वाऽऽकाशमार्गेण चचाल । गतश्च

स तत्र यत्र स राक्षस आसीत्, ततस्तं कुट्टयित्वा द्वारं भङ्क्त्वा कामघटं च गृहीत्वा स मन्त्रिसमीपे समागतः। मन्त्रिणाथ स कामघट आलापितो यत्त्वं तत्र किं समाधिना स्थितः ? घटेनोक्तं क्व मे समाधिः ? यतस्त्वं मां यस्य कस्यऽप्यधर्मिणोऽर्पयसि मम तु धर्मवतामेव समीपे समाधिर्नान्यत्र। ततस्तेन मन्त्रिणे भोजनं दत्तम्। ततश्च तद्द्वयं लात्वा स मन्त्र्यग्रतश्चचाल। क्रमेण स कस्यापि ग्रामस्य समीपे समागतः, तत्र तेन रैवताचलशत्रुञ्जयाख्यतीर्थद्वययात्रां कृत्वा पश्चाद्वलमानः कश्चित्सङ्घः समागतो दृष्टः, सङ्घं दृष्ट्वा मन्त्री त्वतीवहृष्टः, यतः-

**यात्रार्थं भोजनं येषां दानार्थं च धनार्जनम्।**
**धर्मार्थं जीवितं येषां ते नराः स्वर्गगामिनः ॥१५॥**

**विवेकः सह सम्पत्या, विनयो विद्यया सह।**
**प्रभुत्वं च श्रियोपेतं, चिह्नमेतन्महात्मनाम् ॥१६॥**

**स्पृष्ट्व शत्रुञ्जयं तीर्थं नत्वा रैवतकाचलम्।**
**स्नात्वा गजपदे कुण्डे पुनर्जन्म न विद्यते ॥१७॥**

इति विचार्य मन्त्रिणा सङ्घो भोजनाय निमन्त्रितः, तदा सङ्घेन तमेकाकिनं दुःखितं च दृष्ट्वा रन्धनाय प्रारब्धम्, ततो मन्त्रिणा जलघटं गृहीत्वा [१५]सङ्घमध्यस्थचूल्हकेषु वारि क्षिप्तम्, कथितं चात्र केनापि न रन्धनीयं तथाविधं तमसदृशं दृष्ट्वा व्याकुलीभूतः सङ्घपतिश्चिन्तयति, यदद्याऽस्य भोजनं तु दूरेऽस्तु, परमात्मीयमपि भोक्तुं न शक्यते। तदा सर्वेऽपि सङ्घपतयः सम्भूय विचारयन्ति। यदद्य किं करिष्यति सङ्घः ? अयं तु स्वोदरपूरणेऽपि न समर्थः, तथैवास्माकमात्मनीनमपि रन्धनाय न ददाति।

ततो वृद्धैरुक्तम्, अथ भोजनवेला जाता, मन्त्रिणागत्य सङ्घ आकारितः, सङ्घोऽपि सन्देहदोलारूढः[१६] शून्याटव्यां तदुक्तस्थानं प्रति चचाल। अग्रतो गच्छन् सङ्घो [१७]दुकूलमयं रमणीयं मण्डपं दृष्ट्वा हृष्टो विस्मितश्च।

परस्परं पृच्छन्ति जनाः, किमिदं सत्यमसत्यं वा ? दृष्टिभ्रमो वा ? अथ तत्र गमनान्तरं हस्तेन स्पृष्ट्वा ते मण्डपं विलोकयन्ति । ततस्तेन मन्त्रिणा घटप्रभावेण तत्र सुवर्णस्थालानि मण्डितानि । अष्टोत्तरशतसङ्ख्यामिता स्त्रीभिर्दिव्या रसवती [१८]परिवेषिता । ततस्ते परस्परं कथयन्ति यदीदृशानि फलानि, ईदृशानि पक्वान्नानि, ईदृशी च रसवती न क्वापि कदाचिदपि दृष्टा वाऽऽस्वादिता । अथ भोजनानन्तरं तेन सकलसङ्घं [१९]परिधापितः, चमत्कार-पूरितैः सङ्घपतिभिः पृष्टं, त्वयैतावत्कस्य बलेन कृतम् ? तेनोक्तं कामकुम्भ-बलेन, लोभाभिभूतैः सङ्घपतिभिरुक्तं, यदि त्वमस्माकं कामघटमर्पयिष्यसि, तदा तव सर्वदा साधर्मिक-वात्सल्यस्य पुण्यं भविष्यति, त्वं तु धर्मार्थी दृश्यसे अपरं चास्माकं चामरयुगलं राजप्रदं, छत्रं च [२०]सर्वरोगविषशस्त्रघाताद्युपद्रव-निवारकं त्वं गृहाण, कामघटं चास्माकं समर्पय । मन्त्रिणोक्तं देवेन तुष्टेन यद्यस्यार्पितं भवति तत्तत्रैव तिष्ठति, नान्यत्र । अर्थिनः सङ्घपतयः कथयन्ति, त्वं तदर्पय तिष्ठतु वा मा तिष्ठतु ।

ततो मन्त्रिणा तच्चामरयुगलं राज्यप्रदं छत्रं च गृहीत्वा कामघटः सङ्घपतिभ्यः समर्पितः तदनु हृष्टः सन् श्रीसङ्घो मन्त्री च चलितौ स्वस्वस्थानं प्रति । द्वितीयदिने बुभुक्षितो मन्त्री [२१]लकुटं प्रति वक्ति, कामघटमानय । तेनोक्तमानेष्यामीति कथयित्वा स सङ्घमध्ये गतः, पार्श्वस्थान् सुभटानाहत्य, तेषां च [२२]खड्गखेटकानि भङ्क्त्वा, मञ्जूषां च भङ्क्त्वा, सुरक्षितं कामघटं गृहीत्वा स पश्चादागतः, वस्तुत्रयं लात्वा मन्त्री स्वगृहे प्राप्तः यतः-

**जैनो धर्मः प्रकटविभवः सङ्गतिः साधुलोके,**
**विद्वद्गोष्ठी वचनपटुता कौशलं सर्वशास्त्रे ।**
**साध्वी लक्ष्मीश्चरणकमले वासना सद्गुरूणां,**
**शुद्धं शीलं मतिरमलिना प्राप्यते भाग्यवद्भिः ॥१८॥**

अथ तस्मिन्नेव दिने राज्ञा धर्मपरीक्षार्थं बीजपूरकद्वयमानाय्यैकस्य बीजपूरकस्य मध्ये सपादलक्षमूल्यं रत्नं क्षिप्त्वा जनस्य हस्ते विक्रयार्थमर्पितम्, तस्योक्तं च, शाकचतुष्पथे [२३]शाकविक्रयकारिणे त्वयैतत्समर्पणीयम्, यावता तं

कोऽपि न गृह्णाति तावत्त्वया प्रच्छन्नवृत्त्या तत्रैव स्थेयम्, यदा यः कोऽपि गृह्णाति, तदा तस्याभिधानं ममाग्रे वाच्यम्, तेन जनेनापि तथैव कृतम्, अथ मन्त्रिणो गृहागमनान्तरं तस्य जायया मन्त्रिणस्तापोपशान्त्यर्थं तत्रागत्य तदेव बीजपूरकं रत्नगर्भितं गृहीत्वा मन्त्रिणे समर्पितं, मन्त्रिणापि तद्भाक्षितं तन्मध्याच्च रत्नं गृहीतम्। अथ तेन जनेन राज्ञोऽग्रे प्रोक्तं यन्मन्त्रिजायया तद्बीजपूरकं गृहीतं, ततो राज्ञा चिन्तितमेतदपि नूनं धर्ममाहात्म्यमेव। अथ रात्रौ मन्त्रिणा सप्तभूमिकः स्वर्णमयावासः कृतः, तत्र रक्तरत्नखचितानि[२४] स्वर्णकपिशीर्षकाणि [२५]भान्तिस्म, द्वात्रिंशद्वाजिन्त्रोपेतं दिव्यगीतनाट्यान्वितं च नाटकं बभूव। तद् दृष्ट्वा श्रुत्वा च राजा मनसि चमत्कृतः सन् चिन्तयति, किमेषः स्वर्गः ? किमिन्द्रजालं वा स्वप्नं पश्यामि ? इति चिन्तयन् स निशायां सुष्वाप। प्रातर्मन्त्री दिव्यवस्त्राणि परिधाय सुवर्णस्थालं च रत्नैर्भृत्वा राज्ञे मिलितः, राज्ञा पृष्टमेतावन्ति रत्नानि त्वया कुतः प्राप्तानि ? मन्त्रिणोक्तं धर्मप्रभावात्। पुना राज्ञोक्तं रात्रौ स्वर्णमयावासो दिव्यानाटकं च किं तवैवासीत् ? तेनोक्तमेवमेव। अथ तदावासं द्रष्टुकामेन राज्ञा मन्त्रिणे प्रोक्तमहं [२६]स्वल्पपरिवारयुतस्तव गृहे भोजनं कर्त्तुमिच्छामि, ततो मासप्रान्ते मां तव गृहे भोजय, मन्त्रिणोक्तं स्वामिन्नद्यैवाहं युष्मान् भोजयिष्यामि। अतस्तव देशमध्ये यावान्मेलापकः[२७] समस्ति, तावन्तं मेलापकं गृहीत्वा मम गृहे भोजनार्थमागन्तव्यम्, यथाहं तान् सर्वानपि भोजयिष्यामि, राजा चिन्तयति, अहोऽस्य वणिग्मात्रस्यापि मन्त्रिणः कियत्साहसं वर्त्तते ! नूनं तेन मम मेलापकस्य पानीयमपि पातुं न शक्यते, तर्हि किं पुनर्भोजनम् ? रुष्टेन राज्ञा तस्मिन्नेव दिने निजदेशसर्वमेलापको मेलितः।

अथ राज्ञा मन्त्रिणो गृहे तत्स्वरूपविलोकनार्थं प्रच्छन्नं[२८] निजपुरुषः प्रेषितः, तेनापि तत्रागत्य यदा मन्त्रिगृहस्वरूपं विलोकितं तदा कापि भोजनसामग्री न दृष्टा। परं सप्तमभूमौ मन्त्री सामायिकं गृहीत्वा नमस्कारान् जपंस्तेन दृष्टः, ततस्तेन जनेन पश्चादागत्य तत्सर्वं स्वरूपं राज्ञे निवेदितम्। तदा राज्ञा चिन्तयति नूनमेष मन्त्री [२९]ग्रथिलीभूय छुटिष्यति, पश्चान्मयात्वेतेभ्यो सर्वेभ्यो भोजनं देयं भविष्यति। एवं स किंकर्त्तव्यतामूढो जातः, एतावता मन्त्री राज्ञ समीपं समागत्य विज्ञपयामास, 'हे स्वामिन् ! समागम्यताम्, रसवती शीतला

जायमानास्ति'। तत् श्रुत्वा राज्ञोक्तं 'भो मन्त्रिन्! त्वया मयापि सार्द्धं किं हास्यं प्रारब्धमस्ति ? यतस्तव गृहे तु साम्प्रतं स्वल्पापि भोजनसामग्री नास्ति'। तदा सचिवेनोक्तं 'हे स्वामिन्! एकशस्तत्र पादाववधार्य विलोक्यताम्' राजा [३०]सविस्तृतपरिकरस्तत्रागतः, कामपि सामग्रीमनालोक्य च [३१]रोषारुणो जातः सन् चिन्तयति। यतः-

**कोह पइट्ठिओ देहधारिं, तिन्नि विकार करेइ।**
**आप तपावें परतपें, पर तइ हाणि करेइ ॥१९॥**

**लागो कोहदवानलो, डज्झइ गुणरयणाइं।**
**उवसमजलें जो ओलवें, न सहे दुक्खसयाइं ॥२०॥**

**अपूर्वः कोऽपि कोपाग्निः, सज्जनस्य खलस्य च।**
**एकस्य शाम्यति स्नेहात्, वर्द्धतेऽन्यस्य वारितः ॥२१॥**

एष यदि भोजनं न दास्यति। तदा विविधकदर्थनयाहं तं विगोपयिष्यामीति चिन्तयन्मनुष्यलक्षैः परिवृतो राजा तत्र गतः, तदा तद्गृहाडम्बरं दृष्ट्वा चिन्यति, किमेषः स्वर्गः ? किमिदं सत्यमसत्यं वा ? इति विस्मितः सन् सपरिवारः स एवंविधां दिव्यपक्वान्नादिमयां रसवतीं भक्षयामास। भुञ्जानः सन् स राजा पार्श्वस्थान पुरुषान् पृच्छति, भो जना! एवंविधानि परमान्नानि युष्माभिः क्वापि दृष्टानि श्रुतानि वा ? तदा सर्वैरपि नेत्युक्तम्-

एवमतीवभक्त्या भोजितास्ते राजादयस्तेन सर्वेऽपि दिव्यवस्त्रैः परिधापिताः, तदनु विस्मितेन राज्ञा मन्त्री पृष्टः, भो मन्त्रिनेतावन्तो जनास्त्वया कस्य प्रसादेन भोजिताः ? मन्त्रिणोक्तम्, देवताधिष्ठितमहाप्रभाविककामघटप्रसादेन, तत् श्रुत्वा राज्ञोक्तं तं कामघटं ममार्पय। यतः शत्रुसैयादिकृतपराभववावसरे[३२] स मम महोपयोगी भविष्यति, तदा मन्त्रिणोक्तमधर्मवतस्तव गृहे स सर्वथा न स्थास्यति। राज्ञोक्तमेकस्त्वमेनं ममार्पय अहमुपायेन तं स्थापयिष्यामि। चेन्न दास्यसि तर्हि प्रत्युताहं तवाऽनर्थाय भविष्यामि। तदा मन्त्रिणा स कामघटस्तस्मै समर्पितः, राज्ञाप्यतियत्नेन

स्वगृहमध्ये स भाण्डागारे स्थापितः, परितश्च खड्गखेटककरा निजसहस्रसुभटाः स्थापिताः उक्तं च तेभ्यस्तेन दिनत्रयं यावद्भवद्भिः सावधानतयाऽस्य घटस्य रक्षा विधेया, युष्माभिर्मे बान्धवरूपैः सेवकैरिदं कार्यं सावधानतया विधेयम् यतः-

**आतुरे[३३] व्यसने प्राप्ते, दुर्भिक्षे शत्रुनिग्रहे ।**
**राजद्वारे स्मशाने च, यस्तिष्ठति स बांधवः ॥२२॥**

**जानीयात्प्रेषणे भृत्यान्, बान्धवान् व्यसनागमे ।**
**मित्रमापदि काले च, भार्यां च विभवक्षये ॥२३॥**

अथ द्वितीयदिने तस्मिन्पुरेऽपि धर्ममाहात्म्यदर्शनाय मन्त्रिणा लकुटं प्रति प्रोक्तं कामघटं मे समानय ! एवं मन्त्रिप्रहितो लकुटो राज्ञो गृहे गत्वा सर्वान् सुभटान् कुट्टयित्वा, रुधिरं वमतश्च विधाय, मूर्च्छाभिभूतान् कृत्वा कामघटं गृहीत्वा मन्त्रिगृहे समागतः । राजा कामघटं गतं दृष्ट्वा [३४]विषण्णचेता मन्त्रिगृहे गत्वोवाच, 'भो मंत्रिन्! तवोक्तं सर्वं सत्यं जातम्, साम्प्रतमयमनर्थः समुत्पन्नः, अतः प्रसादं कृत्वा ममैतत्सैन्यं [३५]सज्जीकुरु । एवं राज्ञः बह्वाग्रहेण मन्त्री तत्र गत्वा तेषां सुभटानामुपरि प्रभावान्वितं चामरं ढालयित्वा सर्वानपि सुभटान् सज्जीकृतवान् । ततो मन्त्रिणोक्तं किं दृष्टोऽयं युष्माभिर्मम धर्मप्रभावः ? राज्ञोक्तं दृष्टः, ततो राज्ञापि धर्मोऽङ्गीकृतः, प्रोक्तं च सर्वमपि शुभं धर्मादेव भवति, अतोऽहो धर्मप्रभावो जयति, सर्वनगरलोकैरपि धर्मस्य प्रभाव एव मनसि कृतः । चिन्तितं च तैः-

**कीटिकासञ्चितं धान्यम्, मक्षिकासञ्चितं मधु ।**
**कृपणेन सञ्चिता लक्ष्मी-रपरैः परिभुज्यते ॥२४॥**

अथैवं कियद्दिनानि यावद्राज्ञा धर्मप्रभावो मानितः, पुनरपि [३६]चलचितेन राज्ञैकदा मंत्रिणे प्रोक्तम्, भो मन्त्रिन् ! घुणाक्षरन्यायेनैकशस्तव भाग्यं फलितम्, परं नायं धर्मप्रभावः, इदं सर्वमपि पापफलमेव, अतस्त्वं द्वितीयवारं पुनरपि मम पुण्यफलं दर्शय कामघटं, चामरयुगलं, लकुटं चात्र मुक्त्वा सभार्योऽपि देशान्तरे गत्वा धनमर्जयित्वा पुनरपि यदि त्वमत्रागमिष्यसि, तदाहं तव धर्मप्रभावं मानयिष्यामि, नान्यथा, ततः परोपकारतत्परेण मन्त्रिणा तदपि मानितम् ।

तदनु मन्त्री राज्ञे निजगृहं सम्भाल्य सभार्योऽपि देशान्तरं गच्छन् कियद्दिवसैः समुद्रतटे गम्भीरं नगपुरं प्राप्तः, नगरासन्नवाटिकायां च देवकुले देवनत्यर्थं श्रीवीतरागप्रासादे प्राप्तः । तदवसरे [३७]तत्रस्थजनमुखात्तेन श्रुतं यत्सागरदत्तनामा व्यवहारी पूरितयानपात्रो [३८]द्वीपान्तरं प्रति गच्छन् लोकेभ्यो दानं ददाति तत् श्रुत्वा स मन्त्र्यपि निजभार्यां तत्रैव मुक्त्वा दानग्रहणार्थी समुद्रतटे समागतः, तत्र तेन दानार्थिजनानां बहुसमुदायो मिलितो दृष्टः, यतः–

**यस्यास्ति वित्तं स नरः कुलीनः,**
**स पण्डितः स श्रुतवान् गुणज्ञः ।**
**स एव वक्ता स च दर्शनीयः,**
**सर्वे गुणाः काञ्चनमाश्रयन्ते ॥२५॥**

इतो मन्त्रिणा सर्वलोकेभ्यो द्रव्यदानान्तरं वाहने चटितः सागरदत्त-व्यवहारी दृष्टः, तेन सोऽपि दानार्थं जलमध्ये कियद्भूमि लङ्घयित्वा तस्य वाहने चटित्वा श्रेष्ठिनः पार्श्वे दानं याचितवान्, व्यवहारिणापि तस्मै दानं दत्तम्, एवं दानं गृहीत्वा मन्त्री यावत्पश्चादागन्तुमिच्छति, तावत्सुवायुना पूरितं प्रवहणं समुद्रमध्ये दूरं गतम् । तेन स पश्चात्तटे समागन्तुं न समर्थो बभूव, प्रवहणमध्ये एव च स्थितः, अथ सागरदत्तेन व्यवहारिणा मिथः कथाप्रसङ्गेन स मन्त्री सकलकलाकलापकुशलो ज्ञातः, ततस्तेन व्यवहारिणा मन्त्रिणे पृष्टम्, त्वं लेखलेखनादिकं[३९] धर्मकलाञ्च किमपि वेत्सि ? तेनोक्तं वेद्मि यतः–

**बावत्तरिकलाकुसला, पंडियपुरिसा अपंडिया चेव ।**
**सव्वकलाणं पवरां, जे धम्मकलां न जाणंति ॥२६॥**

तदा व्यवहारिणोक्तं तर्हि त्वं मम व्यापारसम्बन्धिलेखादिकार्यं कुरु । तेनापि तदङ्गीकृतं ततो व्यवहारिणापि स लेखादिकार्ये स्थापितः, एवं स तत्र सुखेन कालं गम्यति ।

अथ मन्त्रिणा देवकुले मुक्ता तस्य भार्या विनयसुन्दरी स्वपतिवार्त्ता-मलभमाना कुम्भकारगृहे स्थिता, कुम्भकारेणापि तस्याः पुण्यशीलमाहात्म्येन

सा निजसुतापदे स्थापिता यत:-

**लज्जा दया दमो धैर्यं, पुरुषालापवर्जनं ।**
**एकाकित्वपरित्यागो, नारीणां शीलरक्षणं ॥२७॥**

अथ सा सती तत्रस्था स्वोचितानेवंविधान्नियमान् जग्राह, यथा भर्तुर्मिलनावधि भूमौ शयनीयं स्नानं न कार्यं, रक्तवस्त्राणि त्याज्यानि, पुष्पाङ्गराग विलेपनं त्याज्यं, नाऽऽस्वाद्यं ताम्बूलं, लवङ्गैलाचीजातिफलानां नियमः, शरीरमलोऽपि विभूषार्थं नापनेयः, सर्वशाकानां नियमः, दधिदुग्धपक्वान्नगुड-खण्डशर्करापायसप्रभृतिसर्वसरसमाहारं[४०] न भोक्ष्ये । नीरस [४१]एवाहारो मया ग्राह्यः सदैकभक्तमेव कार्यं, महत्कार्यं विना गृहाद्बहिर्न निर्गन्तव्यं, गवाक्षेषु न स्थातव्यं लोकानां विवाहाद्यपि न वीक्षणीयं सखीभिरपि सह [४२] नर्मालापपुरुषस्त्री-श्रृङ्गारहास्यविलासनेपथ्यादिका[४३] विकथा [४४]न कार्या, वैराग्यकथैव पठनीया गुणनीया च । कर्मकरादिभिः सहाप्यालापसंलापादि न कार्यम्, तर्हि अन्यपुरुषैः सह तु दूरे एव, चित्रस्था अपि पुरुषा नालोकनीया इति ।

अथ स मन्त्री तेन व्यवहारिणा सह सुखेन रत्नद्वीपं गतः, तत्र सुरपुरं नाम नगरम्, शक्रपुरंदराभिधश्च राजा । अथ तेन व्यवहारिणा प्रवहणात्सर्व-क्रयाणकान्युत्तार्य [४५]वक्षारेषु क्षिप्तानि, तेषां क्रयविक्रयादिसर्वव्यवसायस्तेन मन्त्रिणे समर्पितः, तेन स मन्त्रि तत्र सर्वव्यवसायं करोति, सागरदत्त व्यवहारी तु नगरान्तः स्थितगणिकायामासक्तो जातः । यत:-

**यौवनं धनसम्पत्तिः, प्रभुत्वमविवेकिता[४६] ।**
**एकैकमप्यनर्थाय, किं पुनस्तच्चतुष्टयम् ॥२८॥**

अथ स श्रेष्ठी तु तया वेश्यया सह विषयसुखं भुनक्ति, एकदा तया वेश्यया चिन्तितम्, यदस्य श्रेष्ठिनो यो धर्मबुद्धिनामा व्यापाराधिकारी वर्तते, स यदि केनचिदप्युपायेनास्माकं गृहे समागच्छेत्तदा नो बहुद्रव्यलाभो भवेत्, यतः स एव सर्वद्रव्याधिकार्यस्ति । एवं विचार्येत्थं सज्जितषोडशश्रृङ्गारा कपट-नाटकैकपटुः[४७] सा गणिका मन्त्रिणः क्षोभनार्थं समागता । तत्रागत्य तया

विविधहावभावादिविलासचेष्टितैर्मन्त्रिणः क्षोभनार्थं बहव उपायाः कृताः, परं स्वदारसन्तोषव्रतधारिणो मन्त्रिणो हृदये तया मनागपि रागभावो नोत्पादितः-

**संसारे[४८] हय विहिणा, महिलारूवेण मंडियं पासं ।**
**बज्झंति जत्थ मुढा, जाणमाणावि बज्झंति ॥२९॥**

**तस्माद्धर्मार्थिभिस्त्याज्यं, परदारोपसेवनम् ।**
**नयन्ति परदारास्तु, नरकानेकविंशतिं ॥३०॥**

**भक्खणे देवदव्वस्स, परत्थीगमणेण य ।**
**सत्तमं नरयं यांति, सत्तवारा उ गोयमा ॥३१॥**

एवं मन्त्रिणं स्वहावभावविलासादिभिरप्यक्षुब्धं[४९] विज्ञाय निष्फली[५०] भूतनिजमनोरथा सा वेश्या पश्चान्निजगृहे समागता । एवं परिवर्जितकुसङ्गस्य तस्य मन्त्रिणस्तस्मिन् सकलेऽपि नगरे प्रसिद्धिर्जाता, यतः-

**सीलं उत्तमवित्तं, सीलं जीवाण मंगलं परमं ।**
**सील दुहग्गहरं, सीलं सुक्खाण कुलभवणं ॥३२॥**

**वह्निस्तस्य [५१]जलायते जलनिधिः [५२]कुल्यायते तत्क्षणात्,**
**मेरुः [५३]स्वल्पशिलायते मृगपतिः सद्यः [५४]कुरङ्गायते ।**
**व्यालो[५५] माल्यगणायते विषरसः [५६]पीयूषवर्षायते,**
**यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥३३॥**

एकदा राज्ञा तन्नगरे तटाकं खानयितुं प्रारब्धं, ततः कियद्दिवसैर्लिखित-ताम्रपत्राणि निःसृतानि । जनैश्च राज्ञे समर्पितानि, राज्ञा च तत्र लिखितलेख-परिवाचनाय तानि पण्डितेभ्यः समर्पितानि, किन्तु तत्र [५७]लिप्यन्त-रसद्भावात्कोऽपि तानि वाचयितुं न शक्नोति । तदा कौतुकप्रियेण राज्ञा पटहो वादितो-यथा यः कोऽप्यमून्यक्षराणि वाचयिष्यति तस्य राजा स्वीयकन्यामर्द्धं राज्यं च दास्यति, इति वाद्यमानः पटहः क्रमेण मन्त्रिगृहसमीपे समागतः । तदा

मन्त्रिणा स पटहः स्पृष्टः, ततो मन्त्रिणा नृपसभायां गत्वा तानि ताम्रपत्राणि वाचितानि, यथा यत्रैतानि पत्राणि निःसृतानि, ततः पूर्वदिशि दशहस्तानि गत्वा कटिप्रमाणं भूमौ खनितायां सत्यां तत्रैका महती शिला समेष्यति। तस्या अधश्च दशलक्षाः सुवर्णानां सन्ति, तत् श्रुत्वा सर्वेषां चमत्कारोऽभूत्, कौतुकालोकनोत्कण्ठितमानसेन राज्ञोक्तं, तर्हि सम्प्रत्येव तत्र गत्वा विलोक्यते । ततः सर्वजनपरिवृतो राजा तत्र गतः ताम्रपत्रोक्तविधिश्च तेन कृतः, दशलक्षाः सुवर्णानां निःसृताः, सर्वेषां च महान् हर्षो जातः, राज्ञापि मन्त्रिणः प्रशंसा कृता, यदहो कीदृशं ज्ञानस्य माहात्म्यमस्तीति, यतः-

**विद्वत्त्वं च [५८]नृपत्वं च, नैव तुल्यं कदाचन ।**
**स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ॥३४॥**

**रूपयौवनसम्पन्ना, विशालकुलसम्भवाः ।**
**विद्याहीना न शोभन्ते, निर्गन्धा इव किंशुकाः[५९] ॥३५॥**

**वरं दरिद्रोऽपि विचक्षणो नरो,**
**नैवार्थयुक्तोऽपि सुशास्त्रवर्जितः[६०] ।**
**विचक्षणः कार्पटिकोऽपि शोभते,**
**न चापि मूर्खः कनकैरलङ्कृतः ॥३६॥**

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्,**
**विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।**
**विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्,**
**विद्या राजसु पूजिता न हि धनं विद्याविहीनः पशुः ॥३७॥**

**सुलभानि हि शास्त्राणि, गुरूपदेशस्तु दुर्लभः ।**
**शिरो वहति पुष्पाणि, गन्धं जानाति नासिका ॥३८॥**

**यस्य नास्ति स्वयं प्रज्ञा, शास्त्रं तस्य करोति किम् ।**
**लोचनाभ्यां विहीनस्य, दर्पणः किं करिष्यति ॥३९॥**

**पण्डितेषु गुणाः सर्वे, मूर्खे दोषास्तु केवलाः ।**
**तस्मान्मूर्खसहस्त्रेषु, प्राज्ञ एको न लभ्यते ॥४०॥**

**अकुलीनो [६१]नृपीभूतो, मूर्खपुत्रश्च पण्डितः ।**
**अधनेन धनं प्राप्तम्, तृणवन्मन्यते जगत् ॥४१॥**

अथ राज्ञा तस्मै मन्त्रिणे सौभाग्यसुन्दर्यभिधाना स्वकन्या निजं चार्द्धं राज्यं दत्तम् । तथैवानेकगजहयरत्नमणिमाणिक्यस्वर्णादिभृतानि द्वात्रिंशत्प्रवहणान्यप्यर्पितानि, एवंविधां तस्यर्द्धिं दृष्ट्वा सागरदत्तव्यवहारी हृदि प्रज्वलितुं लग्नः । अथ स सागरदत्तो निजशेषक्रयाणकानि विक्रीय तत्रस्थैर्नानाविधैरपरैः क्रयाणकैः प्रवहणमापूर्य पश्चान्मनसीर्ष्यया ज्वलमानः स्वदेशीयत्वाज्जनेन मन्त्रिणमाकारयामास । तदा मन्त्रिणापि निजश्वसुरराज्ञे प्रोक्तं यदहं यास्यामि स्वेदेशे, तदा राज्ञप्यर्द्धराज्यमूल्यप्रमाणानि स्वर्णमाणिक्यादिरत्नानि भृत्वाऽष्टौ प्रवहणानि तस्य समर्पितानि । समुद्रतटं यावच्च राजा तं प्रेषयितुं समायातः, ततस्तौ मन्त्रिव्यवहारिणौ समुद्रमध्ये चलितौ, अथ स सागरदत्तव्यवहारी मन्त्रिणो रत्नभृतानि प्रवहणानि रूपवतीं च पत्नीं दृष्ट्वा लोभदशां प्राप्तः सन् चिन्तयति-

**कोहो पीइं पणासेइ, माणो विणयनासणो ।**
**माया मित्तिं पणासेइ, लोहो सव्वविणासणो ॥४२॥**

अथ कपटेनैनं चेन्मारयामि तदैतत्सर्वमपि मे स्वाधीनं भवेत् । इति विचार्य तेन मन्त्रिणा सहाऽधिका प्रीतिर्मण्डिता ।

**ददाति प्रतिगृह्णाति, गुह्यमाख्याति पृच्छति ।**
**भुङ्क्ते भोजयते चैवम् षड्विधं प्रीतिलक्षणम् ॥४३॥**

अथैकदा सागरदत्तेन मन्त्रिणं प्रति प्रोक्तं, पृथक्पृथक्प्रवहणस्थयोरावयोः का प्रीतिः ? अतस्त्वं मम प्रवहणे समागच्छ ! ततः सरलस्वभावो मन्त्री तस्य यानपात्रे गतः । सागरदत्तेनोक्तं यद्यावां वाहनप्रान्ते समुपविश्योल्लोलज्जलधिकल्लोललीलां[६२] पश्यावस्तदा वरं, मन्त्रिणापि तदङ्गीकृतम् । अथावसरं प्राप्य लोभाभिभूतेन तेन सागरदत्तेन मन्त्री समुद्रान्तः पातितः, मन्त्रिणा तु पततैव नमस्कारस्मरणानुभावेन फलकं लब्धम् ततोऽनन्तरं सर्वाण्यपि प्रवहणानि त्वग्रतो गतानि । अथ स दुष्टः सागरदत्तः कूटशोकं विधाय विलपन्त्या राजपुत्र्याः पार्श्वे समागत्य मायया विलपन् सन्नुवाच, हे भद्रे ! यदि त्वं मदुक्तं करिष्यसि तदाहं त्वां मम सर्वकुटम्बस्वामिनीं करिष्यामि । तस्यैवंविधवचनतस्तया चतुरया ज्ञातं नूनमनेनैव दुरात्मना लोभाभिभूततया मम स्वामी समुद्रमध्ये पातितोऽस्ति । यतः-

**दिवा पश्यति नो [६३]घूकः, काको नक्तं न पश्यति ।**
**अपूर्वः कोऽपि कामान्धो, दिवानक्तं न पश्यति ॥४४॥**

**न पश्यति हि जात्यन्धः, कामान्धो नैव पश्यति ।**
**न पश्यति मदोन्मत्तो, अर्थी दोषं न पश्यति ॥४५॥**

**किमु [६४]कुवलयनेत्राः सन्ति नो नाकिनार्य-**
**[६५]स्त्रिदशपतिरहल्यां तापसीं यत्सिषेवे ।**
**मनसि तृणकुटीरे दीप्यमाने स्मराग्नौ,**
**उचिमनुचितं वा वेत्ति कः पण्डितोऽपि ॥४६॥**

**विकलयति कलाकुशलं, तत्त्वविदं पण्डितं विडम्बयति ।**
**अधरयति धीरपूरुषम्, क्षणेन मकरध्वजो देवः ॥४७॥**

अथ स्वशीलरक्षार्थं तयोक्तं सम्प्रति मम दुःखं वर्त्तते, अतो नगरगमनानन्तरं चिन्तयिष्यते । इति तद्वचसा सागरदत्तः स्वस्थो जातः, इतस्तस्य प्रवहणमपि सुवायुना पूरितं गम्भीरपुरनगरे प्राप्तम्, तावत्सौभाग्यसुंदरी

स्वशीलरक्षार्थं प्रवहणादुत्तीर्य निकटस्थश्रीमदृषभदेवप्रासादमध्ये गत्वा कपाटौ दत्त्वा च स्थिता । उक्तं च तया, यदि मम शीलप्रभावः स्यात्तर्हि ममोद्घाटनं विना कपाटौ मोद्घटताम्, अथ स सागरदत्तः स्वगृहे गतः ।

धर्मबुद्धिमन्त्री तु नमस्कारप्रभावात्फलकं लब्ध्वा क्रमेण समुद्रतटं प्राप्तः, यतः-

**जिणसासणस्स सारो, चउदसपुव्वाण जो समुद्धारो ।**
**जस्स मणे नमुक्कारो, संसारो तस्स किं कुणइ ॥४८॥**

**एसो मंगलनिलओ, भवविलओ सव्वसंतिजणओ य ।**
**नवकारपरममंतो, चिंतिअमित्तो सुहं देइ ॥४९॥**

**अपुव्वो कप्पतरू एसो, चिंतामणि अपुव्वो अ ।**
**जो झायइ सया कालं, सो पावइ सिवसुहं विउलं ॥५०॥**

**नवकारिक्कअक्खरो, पावं फेडेइ सत्तअयराणं ।**
**पन्नासं च पएणं, समग्गेणं तु मुक्खफलं ॥५१॥**

**जो गुणइ लक्खमेगं, पूएइ विहिए य जिणनमुक्कारं ।**
**तित्थयरनामगोयं, सो बंधइ नत्थि सन्देहो ॥५२॥**

**अट्ठेव य अट्ठसया, अट्ठसहस्सं च अट्ठकोडीओ ।**
**जो गुणइ भत्तिजुत्तो, सो पावइ सासयं ठाणं ॥५३॥**

अथ स समुद्रतटादग्रे भ्रमन् सन्नेकं शून्यं नगरं ददर्श शनैः शनैर्नगर-मध्ये प्रविशन् सोऽनेकमणिमाणिक्यरत्नविद्रुममौक्तिकस्वर्णादिविविध-वस्तुक्रयाणकापूर्णापणश्रेणीः सतोरणा मन्दिरधोरणीश्च[६६] ददर्श, बाढं चमत्कृतश्च । साहसेनैकाक्येव नगरमध्ये व्रजन् स राजमन्दिरे सप्तमभूमिकोपरि गतः, तत्र खट्वोपर्येकामुष्ट्रिकां स ददर्श । तथैव तत्र स कृष्णश्वेताञ्जनभृत-कूपिकाद्वयं शलाकाद्वयं च ददर्श, तद् दृष्ट्वा विस्मितः सन् स कौतुकेन

श्वेताञ्जनेनोष्ट्रिकाया नयने अञ्जनं चकार । तत्प्रभावाच्च सा दिव्यरूपा जज्ञे, तत्क्षणमेव च तयाऽऽसनं मुक्तम्, ततो मन्त्रिणा तस्यै पृष्टं का त्वं ? कस्य च सुता ? कथमेवंविधा ? किमिदं नगरं ? कुतः कारणाच्च जनरहितं शून्यम् ? इति श्रुत्वा सा कन्या निजनेत्राभ्यामश्रुपातं कुर्वन्ती प्राह भो नरपुङ्गव ! त्वमितः शीघ्रं याहि, अत्रैका राक्षसी विद्यते, सा त्वां भक्षयिष्यति । तदा मन्त्रिणा पुनरपि पृष्टम्, हे सुलोचने ! का सा राक्षसी ? इत्यादि सर्वं वृत्तान्तं त्वं स्पष्टतरं कथय, साह हे सत्पुरुष ! अस्य नगरस्य स्वामी भीमसेनो राजा, अहं च तस्य पुत्री, स मे पिता तु तापसभक्त आसीत् । एकदा कश्चित्तपस्वी मासोपवासी अस्मिन्नगरे समागतः, स च मत्पित्रा भोजनाय निमन्त्रितः, अहं च राज्ञा तस्य परिवेषणायादिष्टा । ततोऽसौ तापसो मद्रूपं दृष्ट्वा चुक्षोभ, रात्रौ च मम समीपे समागच्छन् स [६७]प्राहरिकैर्धृत्वा बद्धः, प्रातश्च नृपस्य समर्पितः, राज्ञा च स शूलायामारोपितः, स आर्त्तध्यानेन[६८] मृत्वा राक्षसी बभूव, तया च नगरमुद्ध्वस्तं विधाय पूर्ववैरेण राजा [६९]व्यापादितः, तद् दृष्ट्वा नगरलोकाः सर्वेऽपि भयभ्रान्तास्ततः [७०]पलायनं चक्रुः, नगरं च शून्यं जातम् । अहं तया मोहभावतो रक्षिता । पूर्वभवस्नेहेन महामोहेन च श्वेताञ्जनेनोष्ट्रीरूपेण स्थापिता । प्रतिदिनं च राक्षसी मम सारकरणार्थमत्र समागच्छति । अतस्त्वं प्रच्छन्नो भव ? यतः सा राक्षसी सम्प्रत्येव समागमिष्यति । पुनरेकदा सा राक्षसी मया पृष्टा, हे मातरहमत्रारण्ये एकाकिनी किं करोमि ? अतस्त्वं मां मारय तयोक्तं यदि योग्यं वरमहं लप्स्ये, तदा तस्मै त्वामहं दास्यामि ।

अथ साम्प्रतं तस्यागमनवेलास्ति, सा चं कदाचिन्महां तुभ्यं दत्ते, तदा त्वयाऽस्या राक्षस्याः पार्श्वादाकाशगामिनी विद्या, सप्रभावा खट्वा, [७१]महार्घ्यरत्नपेटिका, सप्रभावे रक्तश्वेतकणवीरकम्बे,[७२] दिव्यरत्नग्रन्थ्यौ च, एतानि वस्तूनि मार्गणीयानि करमोचनावसरे, इति सङ्केतं गृहीत्वैनां कृष्णांजनेन उष्ट्रिकां कृत्वा मन्त्री प्रच्छन्नः स्थितः, इतश्च मनुष्यं भक्षयामीति वदन्ती राक्षसी समागता । तया च श्वेताञ्जनेन सोष्ट्रिका कन्या चक्रे ततस्तया राक्षस्या सह वार्तां कुर्वन्त्या स्वयोग्यो वरो याचितः, तदा राक्षस्योक्तं कमपि तव योग्यं वरं न

पश्यामि, कन्ययोक्तमहमेव ते योग्यं वरं दर्शयामि । राक्षस्योक्तं तर्ह्यधुनैव त्वां तस्मै ददामि । ततः पूर्वसङ्केततस्तत्र मन्त्री प्रकटीबभूव,[७३] राक्षस्यापि स तया सह परिणायितः, करमोचनावसरे च खट्वादिपञ्चकं तेन याचितम्, तयापि च तत्सर्वं तस्मै समर्पितम् । ततो राक्षसी क्रीडाद्यर्थमन्यत्र जगाम । तदा तया कन्यया मन्त्र्यूचे, हे स्वामिन् ! साम्प्रतमावां स्वस्थानं गच्छावः, मन्त्रिणोक्तं कथं गम्यते ? स्वपुरादिमार्गाऽपरिज्ञानात् । ततः कन्ययोक्तं साम्प्रतमावाभ्यां रत्नग्रन्थिद्वयं गृहीत्वा खट्वायां चोपविश्य श्वेतकम्बया सा हन्या, ततः सा चिन्तिते पुरे नेष्यति, यदि च कदाचिद्राक्षसी पृष्टे समागच्छेत्तदा त्वया सा रक्तकणवीरकम्बया हन्तव्या, ततः सा निःप्रभावा पश्चाद्यास्यति ।

अथैवं तयोश्चलनानन्तरं सा राक्षसी तत्र समागता । स्वस्थानं च शून्यं दृष्ट्वा हा ! मुषितास्मीति चिन्तयन्ती सा तयोः पृष्ठे धाविता, मिलिता च । मन्त्रिणा कणवीरकम्बया हता सती पश्चाज्जगाम । ततो यत्र प्राक्तने द्वे भार्ये, यत्र च गम्भीरपुरं पत्तनम्, तस्मिन्नेव पुरे उद्यानवनमध्ये खट्वाप्रभावान्मन्त्री समागात् । कन्यादिकं बहिर्मुक्त्वा मन्त्री स्थानविलोकनाय नगरान्तर्गतः, इतस्तत्रैका वेश्या समागता । तया तत्कन्यारूपं दृष्ट्वा चिन्तितम्, यद्येषा-ऽस्मद्गृहे समागच्छेत्तदाङ्गणे कल्पवल्ल्येव रोपिता भवेत्, अतः केनाप्युपायेनैषा ग्राह्या । इति विमृश्य तत्पार्श्वे समागत्य सा वदति, वत्से त्वंय कस्य पत्नी ? कुतश्चागता ? क्व च तव भर्त्तेति पृष्टा सती सा तदग्रे यथास्थितं निजस्वरूपं जगाद । तदा कपटपाटवोपेतया वेश्यया कथितं तर्हि तु त्वं मम भ्रातृजायासि, कथमत्र स्थिता ? मन्त्री तु मद्गृहे प्राप्तः, तेन चाहं तवाकारणार्थं[७४] प्रेषितास्मि, ततस्त्वमेहि मया सार्द्धं मे मन्दिरे, ततः सा सरलस्वभावतया तदगृहे गता ।

**नात्यन्तसरलैर्भाव्यं गत्वा पश्य वनस्पतिम् ।**
**सरलास्तत्र छिद्यन्ते, कुब्जास्तिष्ठन्ति [७५]पादपाः ॥५४॥**

तया च सा निजावासे सप्तमभूमौ स्थापिता ।

अथ सा वेश्यां प्रति पृच्छति क्व मे भर्ता ? सा प्राह अत्र तव बहवो भर्त्तारः समायास्यन्ति इत्युक्त्वा तया स्वकुलाचारः प्रोक्तः, तदा तया कन्यया

चिन्तितम् हा ! अथ मया कथं स्वशीलं रक्षणीयं ? यतः-

**शीलं नाम नृणां कुलोन्नतिकरं शीलं परं भूषणम्,**
**शीलं ह्यप्रतिपाति वित्तमनघं शीलं सुगत्यावहम् ।**
**शीलं दुर्गतिनाशनं सुविपुलं शीलं यशःपावनम्,**
**शीलं निर्वृतिहेत्वनन्तसुखदं शीलं तु कल्पद्रुमः ॥५५॥**

अथ तया स्वशीलभङ्गभयादवपरके प्रविश्य कपाटानि दत्तानि । तच्छीलप्रभावाच्च तानि कथमपि न समुद्घटन्ति, अथ सा प्राक्परिणीता मन्त्रिपत्नी विनयसुन्दर्यपि श्रीदत्तकुम्भकारगृहस्थिता केनापि कामिना राजपुत्रेण हास्यादिना पराभूता स्वशीलरक्षायै तथैव स्थितास्ति । इतोऽयं [७६]व्यतिकरो राजलोकैर्ज्ञातः ततः स्वनगरानर्थभीतेन राज्ञा पटहोद्घोषणा कारिता । यत् यः कश्चिदेतत्कपाटत्रयमुद्घाटयिष्यति, कन्यात्रयं च वादयिष्यति तस्य राजा स्वराज्यार्द्धं राजकन्यां च दास्यति ।

इतः स मन्त्री निजनिवासार्थं स्थानं विलोक्य भोजनं च गृहीत्वा यावत्तत्रोपवने समागतस्तावत्तेन तत्र निजभार्या न दृष्टा । तदा विह्वलः सन् स नगरमध्ये भ्रमितुं लग्नः, इतस्तेन सा पटहोद्घोषणा श्रुता, व्यतिकरं च विज्ञाय पटहं स्पृष्ट्वा बहुजनपरिवृतो मन्त्री कुम्भकारगृहे समागतः, तत्र च द्वारपार्श्वे समागत्य तेन पृथ्वीभूषणनगरनिर्गमनादारभ्य गम्भीरपुरप्राप्तिविनयसुन्दरीदेवकुलमोचनावधि सर्वोऽपि वृत्तान्तो गदितः तत् श्रुत्वा तूर्णं विनयसुन्दर्या कपाटावुद्घाटितौ, उपलक्षितश्च मन्त्री, ततः श्रीयुगादिदेवप्रासादे समागत्य प्रवहणचलनादारभ्य समुद्रान्तः पतनं यावत्तेन सम्बन्धः प्रोक्तः तदा रत्नवत्यापि स्वरेण स्वपतिमुपलक्ष्य कपाटावुद्घाटितौ । ततोऽसौ मन्त्री वेश्याया गृहे समागत्य [७७]फलकप्राप्तितः समुद्रतरणादारभ्य तन्नगरप्राप्तिस्थानविलोकनभोजनग्रहणनिमित्तं नगरमध्यागमनं यावद्वृत्तान्तमुक्तवान् । तदा तया तृतीययापि तथैव मन्त्रिणमुपलक्ष्य कपाटावुद्घाटितौ । एवं तिस्रयोऽपि भार्याः स्वपतिमासाद्य स्वस्ववृत्तान्तं मन्त्रिणे कथयामासुः, प्रमुदितेन राज्ञापि निजराज्यार्द्धं स्वकन्या च मन्त्रिणे दत्ता । अथ मन्त्रिणा राज्ञे सागरदत्तस्य वेश्यायाश्च वृत्तान्तो निवेदितः,

तदा राज्ञा सागरदत्तमाकार्य मन्त्रिसत्कं[७८] सर्वं द्रव्यादिकं मन्त्रिणे दापितम्, [७९]अन्यायकारिणस्तस्य च चौरदण्डो दत्तः, तदा दयालुना मन्त्रिणा नृपति-पादयोर्लगित्वा स जीवन्मोचितः, अथ राज्ञा वेश्याया अपि सर्वं धनादि गृहीत्वा, तत्कर्णनासिकाच्छेदं च कारयित्वा स्वदेशात्सा बहिर्निष्कासिता, अथ मन्त्री ताभिश्चतसृभिर्जायाभिः सह दोगुन्दकदेववद्विषयसुखान्युपभुञ्जानस्तत्र कियद्दि-नानि सुखेनास्थात्, अथैकदा पाश्चात्यरात्रौ स धर्मबुद्धिर्मन्त्री जागरितः सन् पापबुद्धिनृपकृतापमानादिं स्मृत्वा तस्य पुण्यफलदर्शनार्थं प्रभाते निजस्त्रीभिर्युतो महता सैन्येन पृथ्वीभूषणनगरं प्रति चचाल। परचक्रमागतं श्रुत्वा पापबुद्धिनृपो गोपुरद्वाराणि दृढं विधाय नगरमध्ये एव स्थितः, तदा मन्त्रिणा नृपं प्रति दूतः प्रेषितः दूतेन चागत्य पापबुद्धिनृपायोक्तम्, हे राजन्! मम स्वामी वदति यन्मया सार्द्धं युद्धं कुरु, नो चेन्मुखे तृणं गृहीत्वा नगरान्निर्गत्यात्रागच्छ। तत् श्रुत्वा राज्ञोक्तं प्रभाते युद्धं करिष्ये। प्रातः स पापबुद्धिर्नृपः सर्वबलेन युतो युद्धाय बहिर्निर्गतः, द्वयोः सैन्ययोर्युद्धे जायमाने सति धर्मबुद्धिमन्त्री पापबुद्धिनृपं बद्ध्वा प्रोक्तवान्, हे नृप! किं त्वं मामुपलक्षयसि? राज्ञोक्तं हे देव! त्वामादित्यमिव को न वेत्ति? मन्त्रिणोक्तमेवं न, विशेषलक्षणेनोपलक्षयस्व राज्ञोक्तं नोपलक्षयामि मन्त्रिणोक्तं, सोऽहं धर्मबुद्धिस्तव धर्मफलदर्शनायागतो-ऽस्मि। अथ त्वं वद, किं धर्मोऽस्ति वा न? इत्युक्त्वा मन्त्रिणा स राजा धर्मफलविषये [८०] दृढीकृतो मुक्तश्च। ततस्तयोः प्रमोदः समुत्पन्नः। पापबुद्धिनृपस्यापि पुण्फलं दृष्ट्वा धर्मोपरि भावो जातः, ततो तौ द्वावपि तत्रैव नगरे सुखेन राज्यं चक्रतुः।

कियता कालेन केवलाज्ञानिमुनिं वनपालमुखादुपवने समवसृतं श्रुत्वा नृपसचिवादयस्तं वन्दनार्थं समागताः, तत्र केवलिनाऽपीत्थं धर्मदेशना प्रारब्धा।

**"भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयम्,**
**माने म्लानिभयं जये रिपुभयं वंशे कुयोषिद्भयम्।**
**दास्ये स्वामिभयं गुणे खलभयं काये कृतान्ताद्भयम्,**
**सर्वं नाम भयं भवेदिह नृणां वैराग्यमेवाऽभयम्॥५६॥**

यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महा-
नादीप्ते भुवने च कूपखननं प्रत्युद्यमः कीदृशः ॥५७॥

दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवेद्गर्भवासे नराणाम्,
बालत्वे चापि दुःखं[८१]मललुलितवपुःस्त्रीपयः[८२]पानमिश्रम् ।
तारुण्ये चापि दुःखं भवति विरहजं वृद्धभावोऽप्यसारः,
संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ॥५८॥

निर्द्रव्यो धनचिन्तया धनपतिस्तद्रक्षणे चाकुलो,
निःस्त्रीकस्तदुपायसङ्गतमतिः स्त्रीमानपत्येच्छया ।
प्राप्तस्तान्यखिलान्यपीह सततं रोगैः पराभूयते,
जीवः कोऽपि कथञ्चनापि नियतं प्राय सदा दुःखितः ॥५९॥

विलम्बो नैव कर्त्तव्य आयुर्याति दिने दिने ।
न करोति यमः क्षान्ति-र्धर्मस्य त्वरिता गतिः ॥६०॥

इति देशनाश्रवणानन्तरं राज्ञा पृष्टम्, हे भगवन् ! मया पूर्वभवे किं कर्म कृतम् ? येन मम धर्मोऽत्र नाऽभीष्टो जातः । सचिवेन च कीदृशं कर्म कृतम् ? येनेदृशी महती ऋद्धिस्तेन प्राप्ता ? ततः केवली प्राह-पूर्वभवे युवां सुन्दर-पुरन्दरनामानौ भ्रातरावभवताम् । सुन्दरस्तु मिथ्यात्वमोहितत्वादज्ञानकष्टकर्ता तापसो जातः, पुरन्दरस्तु जैनसाधुसङ्गत्या तदुपदेशानुसारेण जिनप्रासादं कारयितुं प्रारम्भं कृतवान् ।

अर्द्धनिष्पन्ने च जिनप्रासादे तेनैवंविधः संशयः कृतो यन्मया बहुसहस्र-द्रव्यव्ययं कृत्वा प्रासादः कारयितुं प्रारब्धोऽस्ति । परमेतन्नि-र्मापणेन[८३] मम किमपि फलं भविष्यति न वा ? इति संशयकरणानन्तरं पुनस्तेन

चिन्तितम्, हा मया व्यलीकं ध्यातं, मम [८४]प्रासादनिर्मापणफलं भविष्यत्येव, इति विचिन्त्य तेन सम्पूर्णभावेन स जिनप्रासादः [८५]सम्पूर्णीकृतः, आयुषः क्षये च युवां द्वावपि मृतौ । सुन्दरजीवस्तु बह्वज्ञानकष्टाद्धिंसादिविधानेन[८६] त्वं पापबुद्धिर्नृपो जातः, पुरन्दरजीवस्तु श्रीजैनधर्मप्रसादाद्बिम्बप्रतिष्ठातीर्थयात्रा-गुरुभक्तिसाधर्मिकवात्सल्यपौषधशालाऽनेकदीनदानादि पुण्यं कृत्वा स समृद्धिवान् धर्मबुद्धिनामा मन्त्री जातः, तत् श्रुत्वा तौ द्वावपि दीक्षां गृहीत्वा तपस्तप्त्वा चारित्राद्याराध्य केवलज्ञानमासाद्य मोक्षं जग्मतुः ॥

**इति श्री धर्मपरीक्षायां पापबुद्धिराजा**

**धर्मबुद्धिश्च मन्त्री, तत्सम्बन्धिनी-**

**॥ कमकुम्भकथा सम्पूर्ण ॥**

## : अभ्यास :

प्रश्न :

१. राज्ञः पापबुद्धिः मन्त्रिणः च धर्मबुद्धिः इति नाम कथं जातम् ?

२. धन्यानां अपि के नराः धन्याः ?

३. कस्मात् कारणात् मन्त्रिणे कपर्द्दियक्षेण कामघटः समर्पित ?

४. मन्त्रिणा सङ्घभक्तिः विशिष्टरूपेण केन प्रकारेण कृता ?

५. मन्त्रिण उदारता कुत्र कुत्र दृश्यते ? मन्त्रिणा कीदृशं आवासं कृतम् ?

६. राज्ञा किं दृष्ट्वा धर्मो अङ्गीकृतः ?

७. द्वितीयवारं पुण्यफलदर्शनार्थं राजा मन्त्रिणं किं आदिदेश ?

८. कुम्भकारगृहे स्थिता मन्त्रिपत्नी कान् नियमान् जग्राह ?

९. नमस्कारमहामन्त्रस्य प्रभावो वर्ण्यताम् ?

१०. त्रिसृणाम् भार्याणाम् शील प्रभावः केन प्रकारेण ज्ञातः ?

११. नृपस्य धर्मेऽप्रीतिः मन्त्रिणश्च धर्मे प्रीतिः कथं जाता ?

१. गिर स्त्री.- વાણી ॥ २. अन्तः भवः आन्तरः । ( तद्धित ) आन्तरश्चासौ मलश्च आन्तरमलः । ( वि.पू.कर्म. ) तस्य प्रक्षालनम् आन्तरमलप्रक्षालनम् । ( ष.तत्पु. ) प्रक्षालने जलस्य उपमा यासां ताः आन्तरमलप्रक्षालनजलोपमाः । ( व्यधि. बहु. ) અંદર ઉત્પન્ન થયેલા મલના પ્રક્ષાલનમાં જલની ઉપમાવાળા ॥ ३. दुःखेन प्राप्यते दुष्प्राप्यम् । ( प्रादि तत्पु. ) દુઃખે પ્રાપ્ત થાય તે ॥ ४. नास्ति पवर्गो यस्मिन् सः अपवर्गः । ( नञ् बहु. ) स्वर्गश्च अपवर्गश्च स्वर्गापवर्गौ ( द्वन्द्व. ) स्णर्गापवर्गौ प्रददाति स्वगापवर्गप्रदः । ( उपपद ) ५. अनुचर पुं.-नोकर ॥ ६. बुभुक्षित वि.ખાવા માટે ઇચ્છતો (ભૂખ્યો) ७. वाटिका स्त्री.-વાડી. (બગીચો) ८. अमोघ वि. સફળ ॥ वासर पु. દિવસ । १०. अमेध्य नपुं. વિષ્ટા ॥ ११. रसवती स्त्री. - ભોજન, રસોઈ ॥ १२. न सत्यम् असत्यम् ( नञ् तत्पु. ) असत्यञ्च पापञ्च असत्यपापे । ( द्वन्द्व ) असत्यपापाभ्यां भीरूः तेन असत्यपापभीरूणा । ( पं. तत्पु ) અસત્ય અને પાપથી ભીરુ એવા તેના વડે ॥ १३. बुभुक्षा स्त्री. ભોજનની ઇચ્છા ॥ १४. लज्जा च कुलञ्च लज्जाकुले ( द्वन्द्व ) लज्जाकुले छेदयति इति लज्जाकुलच्छेदिनी । ( उपपद ) લજ્જા અને કુળને છેદનારી ॥ १५. सङ्घस्य मध्यम् सङ्घमध्यम् । ( ष. तत्पु. ) तस्मिन् तिष्ठन्ति इति सङ्घमध्यस्थाः । ( उपपद ) सङ्घमध्यस्थाश्चामी-चूल्हकाश्च सङ्घमध्यस्थचूल्हकाः ( वि.पू.कर्म. ) तेषु सङ्घमध्यस्थ-चूल्हकेषु । સંઘની મધ્યમાં રહેલા ચૂલાઓમાં ॥ १६. सन्देह एव-दोला सन्देहदोला ( अवधा ( कर्म ) ताम् आरूढ सन्देहदोलारूढः ( द्वि. तत्पु. ) શંકારૂપી હિંચકા પર ચઢેલો ॥ १७. दुकूल नपुं. રેશમી વસ્ત્ર ॥ १८. परिवेषित वि.-પીરસાઈ ॥ १९. परिधापित वि. -પહેરામણી કરાવાયો ॥ २०. शास्त्राणां घातः शस्त्रघातः ( ष. तत्पु. ) रोगश्च विषंश्च शस्त्रघातञ्च रोगविषशस्त्रघाताः ( द्वन्द्व. ) सर्वे च ते रोगविषशस्त्र-घाताश्च रोगविषशस्त्रघाताः । ( कर्म. ) सर्वरोगविषशस्त्रघाताः आदौ येषान्ते सर्वरोग-विषशस्त्रघातादयः ( ब. ब्री. ) सर्वरोगविषशस्त्रघातादयश्चामी उपद्रवाञ्च सर्वरोग-विशस्त्रघाताद्युपद्रवाः । ( वि.पू.कर्म. ) तान् निवारयति सर्वरोगविषशस्त्रघाताद्युप-द्रवनिवारकम् । तद् ( उपपद. ) સર્વે રોગ વિષ શસ્ત્રોના ઘાતાદિ ઉપદ્રવોને નિવારનાર એવા તેને ॥ २१. लकुट नपुं. દંડ ॥ २२. खेटक नपुं. દંડ ( लकडी ) २३. शाकस्य विक्रयः शाकविक्रयः । ( ष. तत्पु. ) शाकविक्रयं करोति इति शाकविक्रयकारी । ( उपपद. ) तस्मै शाकविक्रयकारिणे । શાક વેચનાર માટે ॥ २४. खचित वि. જડેલ ॥ २५. स्वर्णस्य कपिशीर्षकाणि स्वर्णकपि-शीर्षकाणि । ( ष. तत्पु. ) સોનાના કાંગરા ॥ २६. स्वल्पश्चासौ परिवाश्च स्वल्पपरिवारः ( वि.पू.कर्म. ) स्वल्परिवारेण युतः स्वल्पपरिवारयुतः । ( तृ. तत्पु. ) २७. मेलापक पुं. મનુષ્યોનો સમૂહ ॥ २८. प्रच्छन्न

वि. गुप्त. २९. न ग्रथिलः अग्रथिलः (नञ् तत्पु.) अग्रिथलः ग्रथिलः इव भूत्वा ग्रथिलीभू। (च्वि. स.) ગાંડો થઈને ॥ ३०. परिवार पुं.- પરિવાર ॥ ३१. अरूण वि. लाल ॥ ३२. शत्रोः सैन्यम् शत्रुसैन्यम्। (ष. तत्पु.) शत्रुशैन्यम् आदौ यस्य सः शत्रुसैन्यादि (ब.ब्री.) शत्रुसैन्यादिना कृतः शत्रुसैन्यादिकृतः। (तृ. तत्पु.) शत्रुसैत्यादिकृतश्चासौ पराभवश्च शत्रुसैन्यादिकृतपराभवः। (कर्मधारय.) शत्रुसैन्यादिकृतपराभवस्य अवसरःशत्रुसैन्यादिकृतपराभवावसरः (ष. तत्पु.) तस्मिन् शत्रुसैन्यादिकृतपराभवावसरे શત્રુસૈન્યાદિ વડે કરાયેલા પરાભવના અવસરમાં ३३. आतुर पुं. - रोग, पीडा। ३४. विषण्णं चेतः यस्य सः विषण्णचेताः (समा. बहु.) ખેદયુક્ત મનવાળો ॥ ३५. न सज्जः असज्जः। (नञ् तत्पु.) असज्जः सज्जः इव कुरू सज्जीकुरू ॥ (च्वि. समा.) તૈયાર કર ॥ ३६. चलश्चतद् चित्तञ्च चलचित्तम्। (वि. पू. कर्म.) तेन चलचित्तेन। ३७. तत्र तिष्ठति इति तत्रस्थः। (उपपद) तत्रस्थश्चासौ जनश्च तत्रस्थजनः। (वि.पू.कर्म.) तत्रस्थजनस्य मुखम् तत्रस्थजनमुखम्। (ष. तत्पु.) तस्मात्-तत्रस्थजनमुखात्। ત્યાં રહેલા માણસના મુખથી ॥ ३८. अन्यः द्वीपः द्वीपान्तरः तम् બીજા દ્વીપમાં ॥ ३९. लेख लेखनादिक नपुं.-નામું વગેરે ॥ ४०. पायस पुं. ખીર ॥ ४१. निर्गतः रसः यस्मात सः नीरसः। (પ્રાદિ બ.વ્રી.) રસ વિનાનો ॥ ४२. नर्मन् नपुं. મશ્કરી ॥ ४३. नेपथ्य नपुं.- વેષભૂષા ॥ ४४. विपरीता कथा विकथा। (तत्पु.) ४५. वक्षार पुं. વખાર ॥ ४६. विवेकः अस्ति यस्य सः विवेकी। (तद्धित.) न विवेकी अविवेकी। (नञ् तत्पु.) तस्य भावः - अविवेकीता। (तद्धित.) અવિવેકીપણું. ॥ ४७. एकपटु पुं.-અતિ હોશિયાર ॥ ४८. સસારમાં દુષ્ટ એવા ભાગ્યવડે મહિલારૂપે પાશો રચાય છે. જ્યાં મુગ્ધ જીવો તો બંધાય છે પણ જાણકાર જીવો પણ ફસાય છે. ४९. अक्षुब्ध वि. ક્ષોભ નહિ પામેલ ॥ ५०. निर्गतं फलं यस्मात् सः निष्फलः। (प्रादि ब. व्री.) न निष्फलः अनिष्फलः। (नञ् तत्पु.) अनिष्फलः निष्फलः इव भूतः निष्फलीभूतः। (च्वि. समास) निजस्य मनोरथः निजमनोरथ। (ष. तत्पु.) निष्फलीभूतः निजमनोरथः यस्याः सा निष्फलीभूतनिजमनोरथा। (समा. बहु.) નિષ્ફલ થયેલા પોતાના મનોરથવાળી ॥ ५१. जलायते, कुल्यायते। વગેરે પ્રયોગો નામધાતુના જાણવા ॥ ५२. कुल्या इव आचरति कुल्यायते। નીક સમાન થાય છે ॥ ५३. स्वल्पा शिला स्वल्पशिला। (वि. पू. कर्म) स्वल्पशिला इव आचरति इति स्वल्पशिलायते। નાની શીલા જેવો થાય છે. ॥ ५४. कुरङ्ग पु.-હરણ. ॥ ५५. व्याल पु. सर्प. ॥ ५६. पीयूषस्य वर्षा पीयूषवर्षा। (ष. तत्पु.) पीयूषवर्षा इव आचरति इति पीयूषवर्षायते। અમૃતની વર્ષા જેવું આચરણ કરે છે. ५७. लिप्यन्तर पुं. - અન્યભાષા ५८. नृन् पाति नृपः [उपपद] नृपस्य

भावः नृपत्वम् રાજાપણું. ५९. किंशुक पुं.- કેશુડાનું ફૂલ. ६०. शोभनञ्च तद् शास्त्रञ्च सुशास्त्रम् । ( सु पूर्व. कर्म. ) सुशास्त्रेण वर्जितः सुशास्त्रवर्जितः । ( तृ. तत्पु. ) ६१. न नृपः अनृपः । अनृपः नृपः इव भूतः नृपीभूतः । [च्वि.] ६२. जलं धीयते अस्मिन् जलधिः [उपपद]उल्लँश्चासौ जलधिश्च उल्लल्ज्जलधिः [वि. पू. कर्म.]उल्लल्ज्जलधेः कल्लोलाः उल्लल्ज्जलधिकल्लोलाः [ष. तत्पु.]उल्लल्ज्जलधि-कल्लोलानां लीला ताम् उल्लल्ज्जधि-कल्लोललीलाम् । ઉછળતા એવા સમુદ્રના તરંગોની લીલાને ॥ ६३. घूक पुं. ઘુવડ ॥ ६४. कुवलयमिव नेत्रे यासान्ताः कुवलयनेत्राः । ( उप. बहु. ) કમળ જેવા નેત્રવાળી ॥ ६५. ઈન્દ્ર મહારાજાને કમળ જેવા નેત્રવાળી અપ્સરાઓ ન હતી ? કે તાપસી એવી અહલ્યાને ભોગવી અથવા તૃણની ઝૂંપડી જેવા મનની અંદર કામરૂપી અગ્નિ પ્રકટ થયે છતે પંડિત માણસ પણ ઉચિત-અનુચિતને જાણતો નથી. ६६. धोरणी स्त्री. - શ્રેણિ ॥ ६७. प्राहरिक पुं. સુભટ ॥ ६८. आर्त्तञ्च तद् ध्यानञ्च आर्त्तध्यानम् [वि. पू. कर्म.] तेन आर्त्तध्याने । આર્ત્તધ્યાનથી ॥ ६९. व्यापादित वि. મરાયો. ॥ ७०. पलायन नपुं.-નાશભાગ ॥ ७१. महार्घ्याणि च तानि रत्नानि च महार्घ्यरत्नानि । [वि. पू. कर्म.] महार्घ्यरत्नानां पेटिका । [ष. तत्पु.] । કિંમતી રત્નોની પેટી ॥ ७२. कम्बा स्त्री. સોટી ॥ ७३. न अप्रकटः अप्रकटः । [नञ् तत्पु.] अप्रकटः प्रकटः इव बभूव प्रकटीबभूव । ( च्वि. ) ॥ ७४. आकारण नपु.-બોલાવવું. ॥ ७५. पादाभ्यां पिबन्ति पादपाः ( उपपद. ) ॥ ७६. व्यतिकर पुं.- वृत्तान्त ॥ ७७. फलक नपुं.-પાટિયું ॥ ७८. सत्क वि. - સંબંધી ॥ ७९. न न्यायः अन्यायः । ( नञ् तत्पु. ) अन्यायं कोरति अन्यायकारी । ( उपपदः ) तस्य अन्यायकारिणः । અન્યાય કરનારને ॥ ८०. न दृढः अदृढः । ( नञ् तत्पु. ) अदृढः दृढः इव कृतः दृढीकृतः । ( च्वि. ) ॥ ८१. मलेन लुलितम् मललुलितम ( तृ. तत्पु. ) मललुलितञ्च तद् वपुश्च मललुलितवपुः । ( वि. पू. कर्म. ) મલથી ખરડાયેલ શરીર ॥ ८२. स्त्रियाः पयः स्त्रीपयः । ( ष. तत्पु. ) स्त्रीपयसः पानम् स्त्रीपयः पानम् । ( ष. तत्पु. ) स्त्रीपयःपानेन मिश्रम् स्त्रीपयःपानमिश्रम् । ( तृ. तत्पु. ) ॥ ८३. निर्मापण नपुं. બનાવવું ॥ ८४. प्रासादस्य निर्मापणम् प्रासादनिर्मापणम् । ( ष. तत्पु. ) प्रासाद-निर्माणपस्य फलम् प्रासादनिर्माफलम् । ( ष. तत्पु. ) મહેલના નિર્માણનું ફલ ॥ ८५. न सम्पूर्ण असम्पूर्णः । ( नञ्. त.पु. ) असम्पूर्णः सम्पूर्ण इव कृतः सम्पूर्णीकृतः । ( च्वि. ) સમ્પૂર્ણ કરાયું ॥ ८६. हिंसा आदौ यस्य सः हिंसादिः । ( ब. व्री. ) हिंसदेः विधानम् हिंसादिविधानम् । (ष. तत्पु.) तेन हिंसादिविधानेन । હિંસા આદિના વિધાનથી ॥

# [ १३ ]

# ॥ श्रीजम्बूकुमारचरित्रम् ॥

एकदा राजगृहे श्रीवर्धमानः समवसृतः, श्रेणिको वदनार्थमागतः, तस्मिन्नवसरे कश्चित्सुरः प्रथमदेवलोकादागतः सूर्याभवन्नाट्यं विधाय तेन निजायुःस्वरूपं पृष्टम्, भगवतोक्तमितः सप्तमे दिने च्युत्वा त्वं मनुष्यभवं प्राप्स्यसि । इति श्रुत्वा स स्वस्थानं गतः, श्रेणिकेनोक्तम् स्वामिन् । क्वायमवतारं[१] प्राप्स्यति ? वीरेणोक्तं राजगृहे जम्बूनामायमन्तिमः केवली भविष्यति । श्रेणिकेनोक्तम् प्रभो ! अस्य पूर्वभवस्वरूपं मे कथ्यताम्, भगवानाह, जम्बूद्वीपे भरते [२]सुग्रीवनामनि ग्रामे रावडनामा वणिगस्ति, तस्य रेवती पत्नी, तत्कुक्षिसमुत्पन्नौ भवदेवभावदेवौ द्वौ पुत्रौ । एकदा भवदेवेन दीक्षा गृहीता, स विहरन् एकदा निजग्रामे समागतः, [३]नवपरिणीतां नागिलां स्त्रियं मुक्त्वा लज्जया भावदेवेनापि बन्धुसमीपे चारित्रं गृहीतम् । भवदेवो मृत्वा स्वर्गं गतः, भावदेवो भवदेवमरणानन्तरं [४]चारित्रभ्रष्टो जातः, लज्जां त्यक्त्वा नवपरिणीतां नागिलां संस्मरन् भोगाशया स गृहमागतः, ग्रामाद्बहिः प्रथमं जिनेश्वरप्रासादे स्थितः, एतस्मिन्नवसरे [५]तपःकृशाङ्गी नागिलापि जिनयात्रार्थं तत्रागता, तया स्वकीयः पतिरुपलक्षितः, इङ्गिताकारेण कामातुरश्च ज्ञातः ।

नागिलया पृष्टम्, किमर्थं मुने ! आगतोऽसि, साधुरुवाच मदीया नागिला भार्या, तस्या हेतोः समागतऽस्मि । लज्जया पूर्वं संयमो गृहीतः, परं प्रेमभावः कथं याति ? नागिला यदि मिलति तदा सर्वमपि वाञ्छितं फलति, नागिला कथयति चिन्तामणिं मुक्त्वा कः [६]कर्करं गृह्णाति ? गजं विहाय को रासभारोहणं करोति ? प्रवहणं दूरे त्यक्त्वा को महतीं शिलामाश्रयति ? कः सुरतरुमुत्क्षिप्य धत्तूरतरुं वपति ? इत्याद्युपदेशं दत्त्वा तया स्वपतिर्वालितः, तेन स चारित्रे दृढो जातः, चारित्रं पालयित्वा तृतीये स्वर्गे सप्तसागरोपमायुर्देवो[७] जातः, नागिलाप्येकावतारं कृत्वा मोक्षं गमिष्यति, भावदेवजीवस्ततश्च्युत्वा

जम्बूद्वीपे पूर्वविदेहे वीतशोकानगर्यां पद्मरथनृपगृहे वनमालाराज्ञीकुक्षौ पुत्रत्वेनोत्पन्नः, तस्याभिधानं 'शिवकुमार' इति, यौवनं प्राप्तः, पञ्चशतराजकन्यानां पाणिग्रहणं कारितम्, एकस्मिन्नवसरे गवाक्षस्थितेन शिवकुमारेण कश्चित्साधुर्दृष्टः, गवाक्षादुत्तीर्य पृष्टम् । किमर्थं क्लेशसहनम् ? साधुनोक्तम् धर्मनिमित्तम्, शिवकुमारेणोक्तम् कोऽयं धर्मः ? साधुनोक्तम् श्रवणेच्छा चेदस्माकं गुरुसमीपे समागच्छ, तेन सार्द्धं स धर्मघोषाचार्यसमीपे आगतः, धर्मं श्रुत्वा तेन जातिस्मरणं प्राप्तम्, गुरुं नत्वा स गृहे आगतः, मातापितृभ्यां दीक्षाज्ञा न दत्ता, गृहवासे एव षष्ठभक्तं प्रतिदिनं करोति । पारणे [८]चाचाम्लं करोति ।

एवं द्वादशवर्षाणि यावत्तपस्तप्तवा स प्रथमस्वर्गे चतुःपल्योपमायुर्विद्युन्मालीनामा देवो जातः, इति चत्वारो भवा जम्बूस्वामिनो भगवता[९] श्रेणिकाग्रे उक्ताः ।

ततः पञ्चमे भवे ततश्च्युत्वा राजगृहे नगरे ऋषभदत्तश्रेष्ठिनो गृहे धारिणीकुक्षौ शिवकुमारदेवः पुत्रत्वेनोत्पन्नः, स्वप्ने जम्बूतरुदर्शनाज्जम्बूकुमार इति नाम स्थापितम् । बाल्येऽपि तेन कलाः सकला अभ्यस्ताः, यौवनं प्राप्तम्, अतीवरूपवान्, तरुणीहरिणीपाशरूपः, तस्मिन्नवसरे तन्नगरवासिभिरष्टाभिः श्रेष्ठिभिर्जम्बूकुमाराय [१०]स्वकीयकन्यादानार्थं सत्यङ्कारः कृतोऽस्ति, एतस्मिन्नवसरे तत्र श्रीसुधर्मस्वामिगणभृत्समवसृतः, श्रेणिको वन्दनार्थं समागतः, ऋषभदत्तो जम्बूकुमारेण सार्द्धमागतः, श्रीसुधर्मापि भवदवतापोपशान्त्यर्थं पुष्करजलधारोपमां देशनां ददाति, संसारस्वरूपस्याऽनित्यता दर्शिता, यथा कामिनां मनश्चञ्चलम्, यथा मूषागतं[११] स्वर्णम्, यथा जलसङ्क्रान्तम् विधुमण्डलम्, यथा वायुना हतो ध्वजप्रान्तस्तद्वदस्थिरं भवस्वरूपम्, यथाङ्गुष्ठलालापानेन बालः सुखं मन्यते, तथाऽयमपि जीवो निन्दितैर्भोगैः सुखं मन्यते, अहो ! मुग्धत्वं लोकानाम्, यत्रोत्पन्नस्तत्रैवानुरक्तः, तानेव स्पृशन् मनसि हृष्यति । इत्यादिदेशनां श्रुत्वा प्रतिबुद्धो जम्बूकुमारः सुधर्माग्रे कथयति, स्वामिन् ! भवतारिणीं दीक्षां दत्त्वा मां स्तारय, सुधर्मास्वामिनोक्तम्, हे देवानुप्रिय ! मा प्रमादं कुरु, इति गुरुवचः श्रुत्वा गृहमागच्छन् स राजमार्गे

समागतः, तत्र बहवो राजकुमाराः शस्त्राभ्यासं कुर्वन्ति, तत्रैको लोहगोलको जम्बूपार्श्वे समागत्य पतितः, जम्बूकुमारेण चिन्तितम्, यद्ययं यन्त्रगोलको मामलगिष्यत्तदा मनोवञ्छितं कथमभविष्यत् ? एवं ज्ञात्वा पश्चादेत्य गुरुपार्श्वे तेन लघुदीक्षा गृहीता, पश्चात्स गृहमागतः, पित्रोश्चरणौ प्रणम्य कथयति, अहं दीक्षां ग्रहीष्यामि, अनित्योऽयं संसारः, किमनेन कुटुम्बेन ? अहमान्तरे कुटुम्बेऽनुरक्तोऽस्मि, [१२]अहमौदासीन्यगृहे वत्स्यामि, विरतिमातुः सेवां करिष्यामि, योगाभ्यासो मे पिता, समता धात्री माता, [१३]नीरागतैवाऽभीष्टा मम भगिनी, बन्धुर्विनय एवानुयायी, विवेक एवाङ्गजः, सुमतिरेव प्राणप्रिया, ज्ञानमेवामृतं भोजनम्, सम्यक्त्वमेवाक्षयो निधिः, अस्मिन् कुटुम्बे ममानुरागः, तपस्तुरङ्गममारुह्य भावनाकवचं[१४] परिधाय [१५]अभयदानादिकैर्मन्त्रिभिः सहितः सन्तोषसेनापतिमग्रेसरं कृत्वा संयमगुणसेनां [१६]सज्जीकृत्य क्षपकश्रेणिरूपया गजघट्या परिवृतो गुर्वाज्ञामेव शिरस्त्राणं[१७] धृत्वा, धर्मध्यानासिना आन्तरां दुःखदायिनीं मोहसेनां हनिष्यामीति पुत्रवचनं श्रुत्वा पितरौ प्राहतुः-

हे पुत्र ! एकवारमष्टौ कन्याः परिणय, पश्चाद्व्रतमङ्गीकुरु अस्मदीयं मनोरथं पूरय इति पितृवचसा तेन पाणिग्रहणमष्टानां कन्यानां कृतम्, परं मनसा निर्विकारः, एकैकया कन्यया नवनवकोट्यः स्वर्णानामानीताः, अष्टौ कोट्योऽष्टकन्यानां [१८]मातुलपक्षत आगताः, एका कोटिर्जम्बूकुमारस्य मातुलपक्षतः, एवमेकाशीतिकोट्यः स्वर्णानाम्, अष्टादशकोट्यः स्वगृहस्थाः, एवं नवनवतिकोटिस्वर्णानामधिपतिर्जम्बूकुमारो रङ्गशालायां रात्रौ स्त्रीभिः सार्द्धं स्थितः किन्तु न स रागदृष्ट्या विलोकयति, न वचनेनापि सन्तोषयति, सरागवचनैश्चालितोऽपि न चलति, तस्मिन्नवसरे प्रभवनामा चौरो जम्बूगृहे समागतः, पञ्चशतचौरपरिवृतः काञ्चनकोटिं गृह्णाति स्म । ग्रन्थीन् बद्ध्वा मस्तके लात्वा ते यावन्निर्गच्छन्ति तावज्जम्बूकुमारेण स्मृतनमस्कारमन्त्रमाहात्म्यात्सर्वेऽपि स्तम्भिताः [१९]भित्तिलिखितचित्राणीव स्थिताः, तदा प्रभवेणोक्तम्, हे जम्बूकुमार! त्वं जीवदयाप्रतिपालकोऽसि, अभयदानात्परमन्यत्पुण्यं नास्ति, प्रातःकाले श्रेणिकः सर्वानप्यस्मान्, मारयिष्यति । अतो मुञ्च मुञ्चास्मान्, गृहाण मदीये

तलोद्घाटिन्यवस्वापिन्यौ विद्ये, अर्पयैकां त्वदीयां स्तम्भिनीं विद्यां, जम्बूकुमारेणोक्तम् ममैका धर्मकला महती विद्यास्ति, अपरा सर्व अपि कुविद्या:,[२०] अहं तृणवद्भोगानपहाय व्रतं प्रातर्ग्रहीष्यामि, इमे भोगा [२१]मधुबिन्दूपमाः, प्रभवेणोक्तम् मधुबिन्दुदृष्टान्तं मे कथय, जम्बूकुमारः कथयति-

एकस्मिन्नरण्ये सार्थभ्रष्टः कश्चिन्नरो वने परिभ्रमति, एतस्मिन्नवसरे आरण्यो[२२] हस्ती हननाय सन्मुखं धावितः, स प्रणष्टः, हस्ती पश्चाल्लग्नः, अग्रे गत्वा गजभयात् कूपमध्ये स्थितां वटशाखामाश्रित्य लम्बायमानः स्थितः, तस्याधस्ताद्विकिसतमुखौ द्वावजगरौ वर्त्तेते । कूपकस्य चतुर्षु पार्श्वेषु चत्वारो लम्बकायाः[२३] स्थिताः सन्ति, शाखायां रसपूरितो मधुमण्डपो वर्त्तते । द्वौ मूषकौ तां शाखां कर्त्तयतः, मधुमण्डपान्निर्गता मक्षिकास्तं दशन्ति, एवं कष्टमापन्नः स मूढश्चिरकालेन मधुबिन्दुं मुखे प्राप्य तदास्वादसुखितस्तत्रास्ते । एतस्मिन्नवसरे कश्चिद्विद्याधरः समागतः, तेनोक्तम् अस्मिन् विमाने समागच्छ, दुःखान्निष्कासयामि, मूर्खो वक्ति, क्षणं यावत्प्रतीक्षस्व, एकं बिन्दुमास्वाद्यागच्छामि, स विद्याधरो गतः, मूर्खो दुःखं प्राप्तः, एवं हे प्रभव ! मधुबिन्दु सदृशोऽयं विषयविपाकः, अत्रोपनयः-

भव एव महत्यटवी, जीवो रङ्कतुल्यः, [२४]जरामरणावतरणरूपोऽयं कूपः, विषयजलेन पूर्णः, नरकगतितिर्यग्गतिरूपावजगरौ, कषाया विषधराः, आयुरेव वटशाखा, द्वौ पक्षौ द्वौ मूषकौ, मृत्युरेव गजः, विषयो मधुमण्डपस्थानीयः, तस्य स्पृहां कुर्वन्नयं जीवो रोगशोकवियोगाद्यनेकानुपद्रवान् सहते, अतो धर्म एव महत्सुखं, विद्याधरस्थानीयो गुरुः ।

॥ इति मधुबिन्दूपनयः ॥

पुनरपि प्रभवः कथयति, यौवनवयसि पुत्रकलत्रादिसकलपरिवारस्त्यक्तुं न योग्यः, जम्बूकुमारेणोक्तम् एकैकस्य जीवस्य परस्परमनन्तशः सम्बन्धो जातः, यथाऽष्टादशनातरासम्बन्धः,[२५] प्रभवेणोक्तम्, तदष्टादशसम्बन्ध स्वरूपं मे कथ्यतां जम्बूः कथयति-

मथुरापुर्यां कुबेरसेना वेश्या, तस्याः कुक्षावेकं युगलं जात्, एकस्य कुबेरदत्त इति, अपरस्याश्च कुबेरदत्तेति नाम प्रतिष्ठितम्, तद्युगलं मुद्रालङ्कृतं वस्त्रेण वेष्टयित्वा [२६]मञ्जूषायां च निक्षिप्य यमुनाप्रवाहे प्रवाहितम्, प्रातः सा मञ्जूषा सौरीपुरं गता, द्वाभ्यां श्रेष्ठिभ्यां निष्कासिता, एकेन पुत्रो गृहीतोऽन्येन च पुत्री गृहीता, यौवनं प्राप्तौ, कर्मयोगात्तयोरेव परस्परं विवाहो जातः, [२७]सारि-पाशकक्रीडां कुर्वत्या कुबेरदत्तया पतिहस्ते मुद्रा दृष्टा, स्वकीयं भ्रातरमुपलक्ष्य विरक्ता सा संयमं जग्राह, अवधिज्ञानं प्राप्ता। एतस्मिन्नवसरे कुबेरदत्तः कार्यार्थं मथुरां गतः, कुबेरसेनया मात्रा सार्धं च लग्नः, एकः पुत्रो जातः, [२८]कुबेरदत्तासाध्व्या ज्ञानेन ज्ञातम्, महाऽनर्थो जायते। तत्प्रतिबोधार्थं सा तत्रागत्य वेश्यागृहे समागता। रोदनं कुर्वतो बालस्य पार्श्वे आगता, साध्वी कथयति रे बालक! कथं रोदिषि? मौनं गृहाण, त्वं ममाभीष्टोऽसि त्वया सार्द्धं मम षट् सम्बन्धा वर्त्तन्त, त्वं मम पुत्रः १ त्वं मम भ्रातृपुत्रः २ त्वं मम बन्धुः ३ त्वं देवरः ४ त्वं मम पितृभ्राता ५ त्वं मम पौत्रः ६ एवं षट् सम्बन्धाः पुनर्हे वत्स! तव जनकेनापि सार्धं मम षट् सम्बन्धाः, स मम पतिः १ मम पिता २ मम बन्धुः ३ मम ज्येष्ठः ४ मम श्वसुरः ५ मम पुत्रश्च ६ एवं तव मात्रापि सार्धं षट् सम्बन्धाः, सा मम भ्रातृजाया १ मम सपत्नी २ मम माता ३ मम श्वश्रूः ४ मम वधूः ५ मम वृद्धमाता च ६. इति साध्वीवचनं श्रुत्वा पूर्वस्वरूपं ज्ञात्वा कुबेरसेनया व्रतं गृहीतम्, भवपारं च प्राप्ता। एवं हे प्रभव! अस्मिन् संसारेऽनन्तश- सम्बन्धा जाताः, कस्य कः? अतो धर्मो एव परमबन्धुः। इत्यष्टादशसम्बन्धदृष्टान्तः, प्रभवः पुनरपि कथयति, हे जम्बू! त्वया यदुक्तं तत्सत्यम्, परं-

**अपुत्रस्य गतिर्नास्ति, स्वर्गो नैव च नैव च।**
**तस्मात्पुत्रमुखं दृष्ट्वा, स्वर्गं गच्छति मानवः ॥१॥**

इति पुराणवाक्यं, अतो भोगान् भुङ्क्त्वा सुतं गृहे स्थापयित्वा, संयमे मनो रक्ष। जम्बूः प्राह, न हि सुतेन [२९]सुगतिकुगत्योर्विपर्ययः, [३०]सांसारिक-जीवानां केवलं मोहभ्रम एवायाम्, यथा महेश्वरदत्तस्य पुत्रः कार्ये नागतः,

प्रभवेण पृष्टम्, कोऽसौ महेश्वरदत्तः ? जम्बू प्राह,

विजयपुरे नगरे महेश्वरदत्तः श्रेष्ठी, तस्य महेश्वरनामा पुत्रः, मरण वेलायां महेश्वरदत्तेनोक्तम्, मम श्राद्धदिने एकं महिषं हत्वा [३१]तदीयेनामिषेण सर्वोऽपि परिजनः पोषितव्यः, स मृतः, पुत्रेण पितृवचनं धारितम् । स मृत्वा वनमध्ये महिषो जातः, महेश्वरमाता गृहमोहेन मृत्वा गृहे कुर्कुरी जाता । एवं दैवयोगात्स एव महिष आनीतः, अथ महेश्वरस्य स्त्री कुलटा, तया सह रममाणो जारपुरुषो महेश्वरेण मारितः, स मृत्वा तद्गृहे पुत्रत्वेनोत्पन्नः, स लाल्यमानोऽस्ति, स महिषो मारितः, कुटुम्बेन तन्मांसं भक्षितम्, एतस्मिन्प्रस्तावे श्रीधर्मघोषनामा मुनिर्गोचर्यां तत्रागतः, तद्गृहचरितं ज्ञानेन ज्ञात्वा भणितम्-

**मारितो बल्लभो जातः, पिता पुत्रेण भक्षितः ।**
**जननी ताड्यते सेय-महो मोहविजृम्भितम् ॥१॥**

एवं श्लोकं श्रुत्वा महेश्वरेणोक्तम्, स्वामिन् किमेतत् ? साधुना सर्वमपि कथितं स न मन्यते, कुर्कुरीपार्श्वान्निधानदर्शनेन प्रत्यय[३२] उत्पादितः, ततो महेश्वरः श्राद्धं मुक्त्वा श्राद्धो जातः, कुर्कुर्यपि जातिस्मरणं प्राप्य मिथ्यात्वं त्यक्त्वा स्वर्गं गता । अतो हे प्रभव ! पुत्रेण का सिद्धिः ? इति महेश्वरदत्त-दृष्टान्तस्तृतीयः ॥३॥

प्रभवः प्राह, हे जम्बू ! तवैतत्प्रथमं पुण्यं यन्मम जीवितदानं दत्तम्, ममायं च परिवारो यदि बन्धान्मोक्षं प्राप्नोति, तदाहमपि तव सार्थे चारित्रं ग्रहीष्यामीति निश्चयं श्रुत्वा समुद्रश्रीनामा प्रथमस्त्री भणति । हे प्रभव ! भवादृशां[३३] दुष्कर्मकारिणां [३४]चारित्रं घटते, दुःखिनः सुखापेक्षया चारित्रं गृह्णन्ति, परन्तु सुखिनां संयमकष्टमनिष्टम्, प्रायेण लोकाः परगृहभञ्जका भवन्ति, हे प्रभव ! यदि तव कथनादयं व्रतं ग्रहीष्यति, तर्हि हालिकस्येव स पश्चात्तापं प्राप्स्यति । प्रभवेणोक्तम्, कोऽयं हालिकः ? समुद्रश्रीः कथयति-

मणुमण्डले बगनामा पामरो वसति, स कृषिकर्म करोति, [३५]कोद्रव-कङ्गुप्रमुखं धान्यं च वपति, स एकदा पुत्र्याः श्वशुरगृहे गतः, स तत्र

मिष्टैर्गुडमण्कैर्भोजितः, स इक्षुतो गुडोत्पत्तिं ज्ञात्वा स्वगृहे समागत्य पुष्पितं फलितं क्षेत्रमुन्मूल्येक्षुखण्डं वपति स्म । स्त्रिया वारितोऽपि न स्थितः, आत्ममतिको जातः, इक्षुक्षेत्रं तु न निष्पन्नम्, पुरातनमपि धान्यं गतम्, मनसि पश्चात्तापं कृतवान्, मिष्टभोजनाशया पुरातनमपि गतं तद्वत् हे प्राणवल्लभ ! त्वमपि पश्चात्तापं प्राप्स्यसि, प्राप्तं सुखं मुक्त्वाधिकस्य वाञ्छा न कर्तव्या ।

॥ इति बगपामरदृष्टान्तः ॥४॥

जम्बूकुमारः कथयति, हे प्रिये ! यत्त्वयोक्तम् तत्सत्यम्, परं ये [३६]ऐहिकसुखाभिलाषिणस्ते दुःखं प्राप्नुवन्ति, ज्ञानात्परं धनं न, समतासदृशं सुखं न, जीवितसममाशीर्वचनं न, लोभसदृशं दुःखं न, आशासदृशं बन्धनं न, स्त्रीसदृशं च जालबन्धनं न वर्तते यस्तास्तु स्त्रीष्वतीवलोभवान् स [३७]वायस इवानर्थं प्राप्नोति. स्त्रिया पृष्टम्, कोऽयं वायसः ? जम्बूकुमारः कथयति-

भृगुकच्छे रेवानदीतीरे एको गजो मृतः, तत्र बहवः काका मिलिताः सन्ति, गमनागमनं च कुर्वन्ति, यथा सत्रशालायां द्विजा मिलन्ति, तद्वत्तत्र वायसा मिलिताः सन्ति, तत्रैको वायसो मृतगजकलेवरस्याऽवमद्वारे[३८] प्रविष्टः तत्रैव च स तिष्ठत्यामिषलम्पटः, तत्र ग्रीष्मकाले द्वारं मिलितम्, काकस्तु तत्रैव स्थितः, वर्षाकाले तद्गजकलेवरं पानीयप्रवाहेण वाहितम्, अवमद्वारविकसनात्स वराको निःसृत, चतुर्दिक्षु पानीयपूरं विलोकयन् तत्रैव मरणमापन्नः, अत्रोपनयः- मृतगजकलेवरतुल्याः[३९] कामिन्यः, विषयी नरो वायसतुल्यः, स भवजले ब्रुडति, एवं बहुलोभेन शोकं प्राप्नोति ।

॥ इति वायसदृष्टान्त प्रथमस्त्रीकथा ॥

अथ द्वितीया पद्मश्रीः कथयति - हे स्वामिन्नतिलोभेन वानर इव नरो दुःखं प्राप्नोति, प्रभवचौरः कथयति तं वानरदृष्टान्तं कथय, पद्मश्रीः कथयति ।

एकस्मिन् वने कपियुगं वसति सुखेन च तिष्ठति, एकस्मिन् दिने देवाधिष्ठिते जलह्रदे स वानरः पतितः, मानवरूपं च प्राप्तः, वानर्यपि पतिता स्त्रीरूपा जाता वानरेणोक्तमेकवारं ह्रदे पतनेन मनुष्यत्वं प्राप्तम्, द्वितीयवारं

पतनेन च देवत्वं प्राप्स्यामि, स्त्रिया वारितोऽपि पतितः, पुनरपि वानररूपं प्राप्तः, अस्मिन्नवसरे केनचिद्राज्ञा [४०]दिव्यरूपा सा स्त्री स्वगृहमानीता, स वानरश्च कस्यचिन्नटस्य हस्ते चटितः, तेन नृत्ये योजितः, स वानरो नाट्यं कुर्वन् राजद्वारे समागतः, वानरो निजस्त्रियं दृष्ट्वाऽतीवदुःखं चकारेति दृष्टान्तः ।

॥ इति वानरदृष्टान्तः ॥

जम्बूः कथयति, हे प्रियेऽनेन जीवेनानंतशो देवभोगा अनुभूतास्तथापि न तृप्तः तर्हि मानुष्यसुखं कियन्मात्रम्, यथेङ्गालिकेन वनमध्यं गतेन मध्याह्न-समये पिपासातुरेण सर्वाणि जलभाजनानि निष्ठापितानि, परंत तस्य पिपासा न गता, स तरुच्छायायां सुप्तः, स्वप्ने समुद्रनदीजलं पीतम्, परं स न तृप्तः, एकप्रदेशे [४१]कर्दमयुतं जलं मुखे दत्तम्, तथापि न तुष्टः, समुद्रजलेन तृप्तिं न प्राप्तस्तर्हि कर्दमेन कुतः ? समुद्रजलोपमाः सुरभोगाः कर्दमजलतुल्याश्च मानुषीतनुभोगाः ।

॥ इति द्वितीयस्त्रीकथा ॥

तृतीयया पद्मसेनया कथितम्, सहसात्कारेण कार्यकरणेन नूपुर-पण्डितावत्पश्चात्तापो भविष्यति, अत्र नूपुरपण्डितादृष्टान्तो वाच्यः, तदुपरि जम्बूकुमारेण विद्युन्मालिदृष्टान्तः कथितः, येन मातङ्गीसङ्गमेन सर्वा अपि विद्या हारिताः, स चायं-

भरते कुशवर्धनग्रामे विप्रकुले विद्युन्मालिमेघरथनामानौ बान्धवौ । एकदा वने गतौ, केनचिद्विद्याधरणे मातङ्गी विद्या दत्ता, विद्याधरेणोक्तम्, सा मातङ्गी देवी भोगप्रार्थनां करिष्यति परं मनसि धैर्यं रक्षणीयं न चलितव्यम्, तदा विद्या सिद्धिं प्राप्स्यति, द्वौ बान्धवौ साधयितुं लग्नौ । तत्रैको विह्वलमना[४२] विद्युन्माली मातङ्ग्या चलितः, अन्यस्तु गुरुवचनं स्मृत्वा न चलितः, तस्य विद्या सिद्धा, षण्मासमध्ये तेन बहु धनं प्राप्तम्, विद्युन्माली तु दुःखी जातः, जम्बूकुमारेणोक्तम्, मातङ्गीसङ्गतिसदृशा मानुष्यस्त्रीभोगाः, अतो बहुसुखार्थिना ते त्याज्याः ।

॥ इति तृतीयस्त्रीकथा ॥

अथ चतुर्थी कनकसेना कथयति-

यदि मातङ्गीसदृशा वयं तर्हि कथं परिणीताः ? पानीयं पीत्वा गृहपृच्छा न कर्तव्या । हे स्वामिन् ! त्वमपि कौटुम्बिकवल्लोभेन पश्चात्तापं प्राप्स्यसि । दृष्टान्तश्चायम्-

सुरपुरे एकः कौटुम्बिको वसति, तेन कृषिकर्म कृतम्, रात्रौ पक्षिणां पलायनार्थं शङ्खं वादयति, एकस्मिन् दिने तस्करा गोधनं गृहीत्वा तत्क्षेत्रपार्श्वे समागताः । शङ्खध्वनिं च श्रुत्वा भयातुराः पशून् मुक्त्वा गताः, स कौटुम्बिकः पशून् विक्रीय सुखी जातः, एवं वारत्रयं जातम् । एकदा तैस्तस्करैः तत्कौटुम्बिकवृत्तान्तो ज्ञातः, ते आगताः, कौटुम्बिको बद्धः, प्रहारेण च सरलः कृतः, एवं स्वामिन् ! अतिलोभाभिभूता दुःखं प्राप्नुवन्ति ।

॥ इति शङ्खधमककौटुम्बिकदृष्टान्तः ॥

जम्बूकुमारः कथयति [४३]अतिकामलालसा वानरवद् बन्धनं प्राप्नुवन्ति, वानरदृष्टान्तस्त्वयम्-

एको वानरो ग्रीष्मकालं तृषातुरो जलभ्रान्त्या [४४]चिक्कणे जलरहिते कद्‌र्दमे पतितः, यथा यथा शरीरे कर्दमस्पर्शो जायते तथा तथा शीतलमङ्गं भवति, समग्रं शरीरं कद्‌र्दमेन लिप्तम्, तथापि तृषा न गता, सूर्यातपयोगेन कर्दमः शुष्कः, शरीरे पीडा जाता, तद्वत् हे प्रिये ! विषयसुखकद्‌र्दमेनाहं शरीरं न लिम्पयामि ।

॥ इति वानरदृष्टान्तः ॥

पञ्चमी स्त्री नभसेना कथयति-

हे स्वामिन् ! अतिलोभो न कर्तव्यः, अतिलोभेन बुद्धिरन्धतां गता, तदुपरि सिद्धिबुद्‌ध्योर्दृष्टान्तो वाच्यः । जम्बूकुमारः कथयति, हे प्रिये ! बहुकथनेनापि अहं जात्यतुरङ्गम इवोत्पथेन न व्रजामि, जात्यतुरङ्गम-दृष्टान्तस्त्वयम्-

वसन्तपुरे नगरे जितशत्रुराजा, तस्य गृहे एकस्तुरङ्गमः, स घोटको

जिनदत्तश्रावकगृहे मुक्तः, स चातीवलक्षणोपेतः, एकदा केनचित्पल्लीपतिना तद्घोटकग्रहणार्थमेको निजसेवको मुक्तः, तेन क्षात्रं दत्त्वा स घोटको निष्कासितः, परन्तु स घोटको न चलति, उत्पथं न गच्छति, अनुभूतं राजमार्गं विनाऽन्यमार्गे न गच्छति। एतस्मिन्नवसरे श्रेष्ठिना ज्ञातम्, चौरो बद्धः, घोटकश्च गृहीतः, चौरोऽपि मुक्तः। एवं हे प्रियेऽहमपि स घोटक इव शुद्धं संयममार्गं मुक्त्वा चौरसदृशीभिर्भवतीभिराकृष्यमाण उत्पथे न गच्छामि।

॥ इति तुरङ्गमदृष्टानतः ॥

षष्ठी स्त्री कनकश्रीः कथयति, हे प्रिय! अतिहठग्रहणं न युक्तम्, आयतिर्विचारणीया।[४५] द्विजपुत्र इव रासभपुच्छं न ग्रहीतव्यम्। प्रभवेणोक्तम् कोऽयं द्विजः? स्त्री कथयति।

एकस्मिन् कुलग्रामे एको द्विजपुत्रः, सोऽतीवमूर्खः तस्य माता कथयति, हे पुत्र! यद् गृहीतं तन्न मोचनीयम्, एतत्पण्डितस्य लक्षणम्। तेन मूर्खेण जननीवचनं धारितम्, एकस्मिन् दिने कुम्भकारगृहीत एको रासभो नष्टः, पश्चाद्भूतेन कुम्भकारेण द्विजपुत्राय कथितम्। अहो एनं खरं गृहाण, मूर्खेण रासभस्य पुच्छं गृहीतम्। रासभश्चरणलत्तां[४६] ददाति, तथापि स पुच्छं न मुञ्चति, लोकैरुक्तं भो मूर्ख! पुच्छं मुञ्च मुञ्च, तेनोक्तम्, मम मात्रा शिक्षा दत्तास्ति यद् गृहीतं तन्न मोचनीयम्। स मूर्खो [४७]निजकदाग्रहेण कष्टं प्राप्तः।

॥ इति विप्रपुत्रदृष्टान्तः ॥

जम्बूकुमारः कथयति, हे प्रिये! एतत्सत्यं खरसदृश्यो भवत्यः, भवतीनामङ्गीकरणं खरपुच्छग्रहणतुल्यम्, लज्जास्थानेन परिणीतानां एतद्वाक्यं न युक्तम्, एतानि वचनानि स सहते यस्य स्थानं न भवति, यो विप्र इव ऋणधारी भवति स दासो भूत्वा तद्गृहे तिष्ठति, विप्रदृष्टान्तस्त्वयम्-

कुशस्थलपुरे-एकः क्षत्रियः, तस्य गृहे एका तुरगी, तस्याः सेवार्थमेको नरश्च रक्षितः, स [४८]नरोऽहर्निशं तुरगीनिमित्तं यदशनादि तन्मध्यात्स्वयमपि प्रच्छन्नवृत्त्या भक्षयति। सा तुरगी कृशशरीरा जाता, क्रमेण च मरणं प्राप्य तस्मिन्नेव नगरे वेश्या जाता। स नरश्च विप्रकुले समुत्पन्नः। एकस्मिने दिने तेन

सा वेश्या दृष्टा, पूर्वभवसम्बन्धात्स तद्गृहे दासो भूत्वा स्थितः, गृहकर्म च करोति। तद्वदहमपि भोगाशया दासो न भवामि।

॥ इति तुरगीकथा षष्ठी ॥

सप्तमी रूपश्रीः कथयति, हे स्वामिन्नधुनाऽस्मदीयं कथनं न क्रियते परं पश्चान्मासाहसपक्षिवदात्मना दुःखं प्राप्स्यसि।

यथैको मासाहसनामा पक्षी वने वसति, स पक्षी सुप्तव्याघ्रमुखे प्रविश्य दंष्ट्रायां स्थितं मांसपिण्डं गृहीत्वा बहिरागत्यैवं वदति 'मा साहसं कुर्यात्' एवं स वदति परं करोति, पक्षिभिर्वारितोऽपि मांसलोलुपी पुनः पुनर्दंष्ट्रायां प्रविशति, स पक्षी व्याघ्रेण कवलितः।

॥ इति मासाहसपक्षिद्रष्टान्तः ॥

जम्बूकुमारः कथयति, धर्ममित्रमेव शरणे रक्षति, यथा प्रधानस्य धर्ममित्रेण साहाय्यं दत्तम्। द्रष्टान्तश्चायम्-

सुग्रीवपुरे जितशत्रुराजा, सुबुद्धिश्च मन्त्री, तस्य त्रीणि मित्राणि, एको नित्यमित्रः, द्वितीयः पर्वमित्रस्तृतीयस्तु जुहारमित्रः, इत्यवगतमेतत्। तदुपरि श्लोकोऽयम्-

**नित्यमित्रसमो देहः, स्वजनाः पर्वसन्निभाः।**
**जुहारमित्रसमो ज्ञेयो, धर्मः परमबान्धवः ॥१॥**

॥ इति मित्रत्रदृष्टान्तः ॥ इति सप्तमी कथा ॥

अथ धनावहश्रेष्ठिनः पुत्री जयन्तश्रीनामा स्वं भर्तारं विज्ञपयति, हे स्वामिन्! कोऽयं वचनविवादः ? भवद्भिः साकं[४९] नवपरिणीतानामस्माकं वक्तुं न युक्तम्, परं किं कल्पितवार्त्तया विप्रतारयसि ? भवद्भिर्या याः कथाः कथितास्ताः सर्वा अपि कल्पिता एव, यथा ब्राह्मणपुत्र्या कल्पितवार्त्तया राज्ञो मनो रञ्जितम्, तथा त्वमप्यस्माकं कल्पितवार्ताभिर्मनोरञ्जनं करोषि। तस्मिन्नवसरे सर्वाभिरपि कथितम्, भो जयन्तश्रि! तां कथां कथय, यां कथां श्रुत्वा प्रियतमो गृहे तिष्ठति। जयन्तश्रीः कथयति, सावधानाः शृणुत।

भरतक्षेत्रे लक्ष्मीपुरनगरे नयसारनामा राजा राज्यं करोति, स राजा गीत-कथा-नाटक-प्रहेलिकाऽन्तर्लापिकादिष्वतीवनिपुणः, नवीनकथाश्रवणरसिकः [५०]प्रत्यहं नवीनां नवीनां वार्त्तां जनमुखात् शृणोति। एकदा तेन राज्ञा नगरे पटहो वादितो यत्सर्वैरपि लोकैर्वारकेण[५१] राज्ञोऽग्रे नवीना कथा कथनीया। एतद्राज्ञो वाक्यं श्रुत्वा यस्य वारकः समायाति स राज्ञोऽग्रे गत्वा कथां कथयति। एकदावसरे एकस्य ब्राह्मणस्य वारकः समायातः, स ब्राह्मणोऽतीवमूर्खराट् कथां वक्तुं न जानाति। तद्गृहे एका पुत्री वर्त्तते, साऽतीवचतुरा, तया पितुरुक्तम्, त्वं निश्चिन्तो भव, अहं राज्ञोऽग्रे गत्वा नवीनां कथां कथयिष्यामीति राज्ञोऽग्रे गता, राज्ञा पृष्टम् भो पुत्रि! कथां कथय, यथा मन्मनोरञ्जनं जायते। ब्राह्मणपुत्र्या कथितम्, हे राजन्! स्वानुभूतामेव वार्तां कथयामि, सावधनतया शृणु हे स्वामिन्नहं पितृगृहे [५२]नवयौवनवती जाता, तदा पित्रा सदृशकुलोत्पन्नेन ब्राह्मणपुत्रेण सार्द्धं मदीयो विवाहो मेलितः, स नवीनमेलितविवाहो मदीयो भर्ता मदीयरूपविलोकनार्थं मद्गृहे समायातः, तस्मिन्नवसरे मे मातापितरौ क्षेत्रं गतौ, अहमेकाकिनी[५३] गृहे स्थिता। मया सम्यक्स्नानभोजनादिना स भर्ताऽतीव सन्तोषितः, सोऽपि भर्त्ता मदीयमद्भुतं रूपं दृष्ट्वाऽतीवकामज्वरपीडितो जातः, पल्यङ्कोपरि स्थितोऽङ्गमोटनं करोति, सरागवचनं वदति, पुनःपुनर्मामवलोकयति। मया तदीयोऽभिप्रायो ज्ञातः, तदा मया कथितम्, भो कांत! त्वरा[५४] न विधेया, पाणिग्रहणं विना [५५]विषयादिकृत्यं न भवति। अतिबुभुक्षितोऽपि पुमान् किं करद्वयेन भुङ्क्ते? ततोऽधुना विषयसेवनं न युक्तमेवेति मदीयवाक्यं श्रुत्वाऽतीवकामातुरस्य तस्य कुक्षौ शूलं समुत्पन्नम्, तेन व्याधिना च स मदीयो भर्त्ता मृतः, तदा मया स गृहमध्ये भूमौ निक्षिप्तः, केनापि न ज्ञातम्, मात्रा पित्रापि न ज्ञातम्। हे स्वामिन्नियं मदीयाऽनुभूता वार्त्ता कथिता। तां श्रुत्वा राजातीवसन्तुष्टो जातः, सा कन्या गृहे समायाता। जयन्तश्रीः कथयति यथा तया कल्पितवार्त्या राज्ञो मनो रञ्जितम्, तद्वत्त्वमप्यस्माकं मनो रञ्जयसि, परन्तु मिथ्यैवेयं प्रवृत्तिः, अतो यः स्वकीयं चरणं विचार्य धरिष्यति तस्य लज्जा स्थास्यति, अतो हे स्वामिन्! [५६]भुक्तभोगी भूत्वा पश्चाच्चारित्रं गृहीत्वाऽऽत्मार्थः साधनीयः।

॥ इति ब्राह्मणपुत्री दृष्टान्तः ॥

इति जयन्तश्रीवाक्यं श्रुत्वा जम्बूकुमारः प्राह-

भो जयन्तश्रि ! मोहातुरमनाः प्राणी अधर्मे धर्मबुद्धि निधाय विषयादिकं स्थापयन् कर्माणि बध्नाति, अहो ! दुरन्ता विषयाः, विषेभ्योऽप्यधिका विषया इति सत्यमेव । विषया मृतानपि मारयन्ति । यदुक्तम् -

**भिक्षाशनं तदपि नीरसमेकवारम्,**
**शय्या च भूः परिजनो निजदेहमात्रम् ।**
**वस्त्र च जीर्णशतखण्डमयी च कन्था,**
**हा हा तथापि विषया न परित्यजन्ति ॥१॥**

अतो भो वनिते ! यदि जन्मजरामरणवियोगशोकादयः शत्रवो मत्समीपं नायान्ति तदाहं भवत्सम्बन्धिनो भोगानभिलषामि । यथा मां बलात्कारेण गृहे स्थापयथ, तथा रोगादिभ्योऽपि रक्षणे किं शक्तिरस्ति ? तदा स्त्रीभिरुक्तम्, [५७]स्वामिन्नेतादृशः कः समर्थो, यः संसारस्थितिं वारयति, तदा 'जम्बूकुमारेणोक्तमहमशुचिभृतायां मोहकुण्डिकायां भवदीयायां तनौ न रतिं प्राप्नोमि, यतोऽनन्तपापराशिभवः स्त्रीणां भवनिबन्धः, यदुक्तम्-

**अणंता पावरासीओ, जया उदयमागया,**
**तया इत्थित्तणं पत्तं, सम्मं जाणाहि गोयमा ॥१॥**

**पुनरप्युक्तम्-दर्शने हरते चित्तं, स्पर्शने हरते बलम् ।**
**संगमे हरते वीर्यं नारी प्रत्यक्षराक्षसी ॥१॥ इति ।**

अतो नाहं ललिताङ्गवन्मोहनिमग्नोऽशुचिकूपे भवकूपे निवसामि, तदा स्त्रीभिरुक्तम्, स्वामिन् ! कोऽयं ललिताङ्गो यः स्वामिोपनयं[५८] नीतः, जम्बूकुमारः कथयति ।

वसन्तपुरे नगरे शतप्रभो राजा राज्यं करोति, तद्गृहे रूपवती नाम्नी

पट्टराज्ञी, साऽतीवरूपवती यौवनादिगुणाकीर्णा मोहनृपराजधानी राज्ञोऽतीव-वल्लभा, परन्तु सा व्यभिचारिणी, एकदा सा रूपवती गवाक्षस्थिता नगर कौतुकं विलोकयति। तस्मिन्नवसरे ललिताङ्गनामा कश्चिद्युवाऽतीवरूपपात्रं मार्गे गच्छंस्तया दृष्टः, तद्रुपदर्शनाज्जातमोहोदयाऽतीवकामातुरा रूपवती चेटीं प्रति कथयति, भो एनं युवानमानय, तया तस्मै निवेदितं मदीया स्वामिनी त्वामाकारयति, अतः समागच्छ मया सार्द्धं मत्स्वामिनीगेहम्, सोऽपि विषयभिक्षापरिभ्रमणशीलो निःशीलस्तद्गेहं जगाम। साऽप्यागतं ललिताङ्गं दृष्ट्वा हावभावविलासविभ्रमान् विस्तारयन्ती, अङ्गमोटनं कुर्वन्ती, दोर्मूलं दर्शयन्ती, नाभिमण्डलं विवसनं[५९] कुर्वन्ती तदीयं मनो वशीचकार। यदुक्तम्-

**स्त्री कान्तं वीक्ष्य नाभिं प्रकटयति मुहुर्विक्षिपन्ती कटाक्षान्,**
**दोर्मूलं दर्शयन्ती रचयति [६०]कुसुमापीडमुत्क्षिप्तपाणिः।**
**रोमाञ्चस्वेदजृम्भाः श्रयति कुचतटस्त्रंसि वस्त्रं विधत्ते,**
**सोल्लासं वक्ति नीवीं शिथिलयति दशत्योष्ठमङ्गं भनक्ति ॥१॥**

तदीयमेतत्स्वरूपं दृष्ट्वा स्मरोल्लम्भिताङ्गो ललिताङ्गनामा तया सार्द्धं भोगान् बुभुजे, [६१]विषयलुप्तचेतनो निःशङ्कं, तां भुक्तवान्। एतस्मिन्नवसरे तदीयो भर्त्ता राजा समायातः, तदा [६२]द्वारस्थितचेटीमुखाद्राजागमनं श्रुत्वा साऽतीवभयविह्वलाङ्गी तं नरमशुचिकूपे स्थापयामास, राज्ञि आगते, राज्ञा सार्द्धं च हास्यविनोदादिवार्त्तां चकार। सोऽपि ललिताङ्गोऽशुचिकूपे स्थितो महतीं [६३]क्षुत्तृषादिबाधां सहते, परवशो जातः, मनसि चिन्तयति अहो! विषय-लाम्पट्यम्! धिग्मामकृत्यकारिणम्! एवं तत्र वसतो बहूनि दिनानि जातानि। सा राज्यपि तं विसस्मार, धिक्स्त्रीणां कृत्रिमं प्रेम, ललिताङ्गस्तत्र तिष्ठन् मृततुल्यो जातः, वर्षाकाले जलपूरिताऽशूचिकूपजलप्रवाहेण वाहितो निर्गतो मिलितः स्वजनानाम्, निवेदितं सर्वमपि स्वरूपम्, विषयाभिलाषविमुखो जातः, कियद्भिर्दिनैर्गृहे [६४]स्वस्थीभूतः पुनरेकदा राज्या दृष्ट उपलक्षित आकारितश्च, ललिताङ्गेनोक्तम् न पुनरेवं करिष्यामि, विषयासक्तेन महती मया वेदना-ऽनुभूतेति। ततः परं विषयविरक्तो भूत्वा स सुखी जातः, अतो भो वनिते!

यद्यहं विषयासक्तो भवामि तदा ललिताङ्गवद्दुःखभाजनं स्याम् अतो न रते रतिः कर्त्तुं युक्ता ।

॥ इति ललिताङ्गदृष्टान्तः ॥

एवं कुमारेण शिक्षा दत्ता, एवं परस्परमुत्तरप्रत्युत्तरवाक्यै रजनी निर्जगाम । पश्चात्स्त्रीभिरुक्तम्, स्वामिन् ! दुष्करं व्रतपालनं । [६५]अनुपमोऽयं वैराग्यरसः, यैरयं सम्यगाराधितस्तैर्मुक्तिपदमलङ्कृतमिति स्त्रीभिरपि जम्बूवचः प्रमाणीकृतम् ! तस्मिन्नवसरे प्रभवेणोक्तं, मदीयं महद्भाग्यं यच्चौरेणापि मया वैराग्यवार्त्ता श्रुता । विषयमोऽयं विषयाभिलाषः, दुस्त्यजोऽयं विषयरागः, धन्यस्त्वं येन तारुण्येऽपीन्द्रियाणि वशीकृतानि । जम्बूकुमारेणापि तदुद्धाराय बहवो धर्मोपदेशा दत्ताः, वैराग्यवासितेन प्रभवचौरेणोक्तम्, त्वं महान् ममोपकारकर्त्ता, अहमपि त्वया सार्द्धं व्रतं ग्रहीष्यामि । प्रातःकालो जातः । श्रेणिकेन राज्ञा तत् श्रुतम्, श्रेणिकेनापि बहवो रक्षणोपायाः कृताः, परन्तु जम्बूकुमारेण मनसि न धारिताः पश्चात्प्रातः समहोत्सवं सप्तक्षेत्र्यां वित्तं वितीर्य कृतश्रेणिकनृपोत्सवः [६६]प्रभवादिपञ्चशतीपरिकलितो निजजनकजननीसहितः प्रमदाभिरनुश्रितो निजश्वशुरश्वश्रूसंयुतः श्रीसुधर्मास्वामिनः समीपे चारित्रं जग्राह । अनुक्रमेणाधीतद्वादशाङ्गीकश्चतुर्दशपूर्वधारी[६७] चतुर्ज्ञानसहितः स श्रीसुधर्म-स्वामिपट्टभूषणं जातो, घातिकर्मक्षयात्केवलमवाप्य मुक्तिकामिनीकण्ठालङ्कार हारः सञ्जातः ।

**धन्योऽयं सुरराजराजमहितः श्रीजम्बूनामा मुनि-**
**स्तारुण्येऽपि पवित्ररूपकलितो यो निर्जिगाय स्मरम् ।**
**त्यक्त्वा मोहनिबन्धनं निजवधूसम्बन्धमत्यादरा-**
**न्मुक्तिस्त्रीवरसङ्गमोद्भवसुखं लेभे मुदा शाश्वतम् ॥१॥**

एवं जम्बूसदृशः क्षणभङ्गुरं विषयसुखं त्यक्त्वा शाश्वत एव सुखे रमन्ते, तत्प्रत्ययेन प्रभवसदृशा अपि सुलभबोधिनः संसाराम्बुधिपारगा भवन्तीति ।

॥ इति श्रीजम्बूकुमारचरित्रं सम्पूर्ण ॥

## : अभ्यास :

प्रश्नः

१. नागिलया भवदेवमुनिः किम् कथयित्वा चारित्रे दृढीकृतः ?

२. शिवकुमारः दीक्षार्थं गृहवासे किं करोति ?

३. जम्बूकुमारः दीक्षां ग्रहणार्थं पितरौ किमकथयत् ?

४. आन्तरिककुटुम्बः कीदृशः ?

५. विषयोपरि जम्बूकुमारःललिताङ्गदृष्टान्तेन स्त्रीभ्यः कां शिक्षां ददौ ?

६. जम्बूकुमारेण सार्धं के के जनाः दीक्षां जगृहुः ?

१. अवतार पुं. -જન્મ ॥ २. सुग्रीव इति नाम यस्य सः सुग्रीवनामा । ( ब. व्री. ) तस्मिन्-सुग्रीवनामनि ॥ ३. नवा चासौ परिणीता च नवपरिणीता । ( वि. उभ. क. ) ताम्-नवपरिणीताम् । નવી પરણેલી એવી તેને ॥ ४. चारित्रात् भ्रष्टः चारित्रभ्रष्टः । ( प. तत्पु. ) ચરિત્રથી ભ્રષ્ટ ॥ ५. कृशम् अङ्गं यस्याः सा कृशाङ्गी । ( समा. बहु. ) तपसा कृशाङ्गी तपःकृशाङ्गी । ( तृ. तत्पु. ) તપથી કૃશ થયેલા અંગવાળી ॥ ६. कर्कर पुं.- કાંકરો ॥ ७. सागरस्य उपमा यस्य तद्-सागरोपमम् ! ( व्यधि. बहु. ) साप्तनां सागरौपमाणां समाहारः सप्तसागरोपमम् ( समाहार स. ) सप्तसागरोपमम् आयुः यस्य सः सप्त-सागरोपमायु ) ( समा. बहु. ) સાત સાગરોપમના આયુષ્યવાળો ॥ ८. आचाम्ल नपुं.-આયંબિલ ॥ ९. भगः अस्ति यस्य सः भगवान् ! तेन भगवता । ( तद्धित. ) १०. स्वकीयाश्चामूः कन्याश्च स्वकीय-कन्याः । ( वि. पू. क. ) स्वकीयकन्यानाम् दानम् स्वकीयकन्या दानम् । ( ष. तत्पु. ) स्वकीयकन्यादानाय इदम् स्वकीयकन्यादानार्थम् । ( चतु. तत्पु. ) ॥ પોતાની કન્યાઓના દાનને માટે આ ॥ ११. मूषा स्त्री.- ધાતુ ગાળવાની કૂંડી ॥ १२.उदासीनस्य भावः औदासीन्यम् । ( तद्धित. ) औदासीन्यञ्च तद् गृहम् च औदासीन्यगृहम् । ( वि. पू. क. ) तस्मिन्-औदासीन्यगृहे । ઉદાસીનતાના ઘરમાં ॥ १३. रागात् निर्गतः नीरागः नीरागस्य भावः नीरागता । ( तद्धित. ) । નીરાગપણું ॥ १४. कवच पुं.- બખ્તર ॥ १५. नास्ति भयं यस्मिन् तद् अभयम् । ( नञ् बहु. ) अभयं च तद् दानं च अभयदानम् । ( वि. पू. क. ) अभयदानम् आदौ येषां ते अभयदानादिकाः( ब. व्री. )

तैः - अभयदानादिकैः । અભયદાનાદિ વડે ॥ १६. न सज्जा असज्जा । ( नञ् तत्पु. ) असज्जां सज्जां इव कृत्वा सज्जीकृत्य । ( च्वि. स. ) તૈયાર કરીને ॥ १७. त्राण नपुं. રક્ષણ १८. मातुल पुं. - મામા ॥ १९. भित्तौ लिखितानि भित्तिलिखितानि ( स. तत्पु. ) भित्तिलिखितानि च तानि चित्राणि च भित्तिलिखित-चित्राणि । ( वि. पू. क. ) ભીંત ઉપર લખાયેલાં ચિત્રો ॥ २०. कुत्सिताः विद्याः कुविद्याः ( कु पूर्वपद क. ) ખરાબ વિદ્યાઓ ॥ २१. मधुबिन्दोः उपमाः येषां ते मधुबिन्दूपमाः । ( व्यधि. बहु. ) મધુબિન્દુની ઉપમાવાળા ॥ २२. आरण्य वि.-જંગલી ( अरण्ये भवः आरण्य ) २३. लम्बकाय पुं.-સર્પ ॥ २४. जरा च मरणं च अवतरणं च जरामरणावतरणानि । [द्वन्द्व]जरामरणावतरणानि रूपं यस्य सः जरामरणा-वतरणरूपः । ( व्यधि. बहु. ) જરા મરણ અને જન્મરૂપ ॥ २५. अष्टादशानाम् नातराणाम् समाहारः अष्टा-दशनातरम् । ( समाहार ) तस्य सम्बन्धः अष्टादशनातरासम्बन्धः । ( ष. तत्पु. ) અઢાર નાતરાનો સંબંધ ॥ २६. मञ्जूषा स्त्री. पेटी. २७. सारिपाशक पुं. - સોગઠાંબાજી २८. कुबेरदत्ता चासौ साध्वी च कुबेरदत्ता साध्वी । ( कर्म. ) तया - कुबेरदत्तासाध्व्या કુબેરદત્તા સાધ્વી વડે ॥ २९. शोभना गतिः सुगतिः । ( सु. पूर्व कर्म. ) कुत्सिता गतिः कुगतिः । ( कु. पूर्व. क. ) सुगतिश्च कुगतिश्च सुगतिकुगती । ( द्वन्द्व. ) तयोः सुगतिकुगत्योः સારી અને ખરાબ ગતિનું ॥ ३०. संसारः एव प्रयोजनं येषाम् ते-सांसारिकाः ( तद्धित. )सांसारिकाश्चामी जीवाश्च सांसारिकजीवाः । ( वि. पू. क. ) तेषाम् सांसारिकजीवानाम् । સાંસારિક જીવોનો ॥ ३१. आमिष नपुं. માંસ ॥ ३२. प्रत्यय पुं.- વિશ્વાસ ॥ ३३. भवान् इव दृश्यन्ते भवादृश्यः । ( कृदन्त ) तेषाम्-भवादृशाम् । આપના જેવાઓનું ३४. दुष्टानि च तानि कर्माणि च - दुष्कर्माणि ( वि. पू. क. ) दुष्कर्माणि कुर्वन्ति इति दुष्कर्मकारिणः । ( उपपद ) तेषाम्-दुष्कर्म-कारिणाम् । દુષ્કર્મ કરનારાઓનું ॥ ३५. कङ्गु स्त्री.-એક જાતનું ધાન્ય ॥ ३६. इह भवः ऐहिकम् । ( तद्धित. ) ऐहिकस्य सुखम् ऐहिकसुखम् । ( ष. तत्पु. ) ऐहिकसुखम् अभिलषन्ति इति ऐहिकसुखा-भिलाषिणः । ( उपपद. ) આ ભવના સુખની અભિલાષા કરનારા ॥ ३७. वायस पुं.-કાગડો ३८. अवम पुं. - ગુદાદ્વાર ३९. मृतश्चासौ गजश्च मृतगजः । ( वि. पू. क. ) मृतगजस्य कलेवरम् मृतगज-कलेवरम् । ( ष. तत्पु. ) तेन तुल्याः मृतगजकलेवरतुल्याः । ( त. तत्पु. ) મરેલા હાથીના કલેવર તુલ્ય ॥ ४०. दिव्यं रूपं यस्याः सा दिव्यारूपा । ( समा. बहु. ) દિવ્યરૂપવાળી ॥ ४१. कर्दम पुं.-કાદવ ॥ ४२. विह्वलं मनः यस्यः सः विह्वलमनाः । ( समा. बहु. ) વિહ્વલ મનવાળો. ४३. अत्यन्तश्चासौ कामश्च अतिकामः ( वि. पू. क. )

अतिकामस्य लालसा अतिकाम-लालसा । ( ष. तत्पु. ) અતિ કામની ઈચ્છા ॥ ४४. चिक्कण वि.-ચીકણા ॥ ४५. आयति स्त्री.-ભાવિ. ४६. चरणलत्ता स्त्री.-લાત. ४७. कुत्सितः आग्रहः कदाग्रह । ( कु. पू. कर्म. ) निजस्य कदाग्रहः निजकदाग्रहः । ( ष. तत्पु. ) तेन निजकदाग्रहेण પોતાના કદાગ્રહથી ॥ ४८. अहनि च निशायाम् च अहर्निशम् ( समाहार. ) ४९. साकम् अव्य. સાથે. ५०. अहनि-अहनि प्रत्यहम् । ( अव्ययीभाव. ) દરરોજ ॥ ५१. वारक नपुं.-વારાફરતી. ५२. नवं च तद् यौवनं च - नवयौवनम् । ( वि. पू. क. ) नवयौवनम् अस्ति यस्या सा नवयौवनवती । ( तद्धित. ) નવા યૌવનવાળી ॥ ५३. एकाकिन् वि. -એકલું ॥ ५४. त्वरा स्त्री.-ઉતાવળ ॥ ५५. विषयः आदौ येषाम् ते विषयादयः ( ब. व्री. ) विषयादीनां कृत्यम् । विषयादि-कृत्यम् ( ष. तत्पु. ) વિષયાદિ કાર્ય ॥ ५६. भुक्तः भोगः येन सः भुक्तभोगी । ( तद्धित. ) ભોગવેલા ભોગવાળો ॥ ५७. एषः इव दृश्यते एतादृशः । એવા પ્રકારનો ॥ ५८. उपनय पुं.-દૃષ્ટાન્ત. ५९. विवसन नपुं.-વસ્ત્રરહિત ॥ ६०. कुसुमापीड पुं.-અંબોડો ॥ ६१. लुप्ता चेता यस्य सः लुप्तचेतनः ( बहु. ) विषयेण लुप्तचेतनः विषयलुप्तचेतनः ( तृ. तत्पु. ) વિષયથી લુપ્ત મનવાળો ॥ ६२. द्वारे स्थिता द्वारस्थिता । ( स. तत्पु. ) द्वारस्थिता चासौ चेटी च द्वारस्थिताचेटी । ( वि. पू. क. ) तस्याः मुखम् द्वारस्थितचेटीमुखम् ( ष. तत्पु. ) तस्मात् द्वारस्थितचेटीमुखात् દ્વારમાં રહેલી દાસીના મુખથી ॥ ६३. क्षुत् च तुट् च क्षुत्तृषौ । ( इत. द्वन्द्व. ) क्षत्तृषौ आदौ येषां ते क्षुत्तृषादयः । ( ब. व्री. ) क्षुत्तृषादीनाम् बाधा क्षुत्तृषादिबाधा । ( ष.त.पु. ) ताम् क्षुत्तृषादिबाधाम् । ભૂખ-તરસ આદિ પીડાને. ६४. अस्वस्थः स्वस्थः इव भूतः स्वस्थीभूतः । ( च्वि. स. ) સ્વસ્થ થયેલો ॥ ६५. अविद्यमाना उपमा यस्य सः अनुपमाः ॥ ( ब. ब्री. ) ६६. प्रभवः आदौ ये । ते प्रभावदयः ( ब. व्री. ) पञ्चानाम् शतानां समाहारः पञ्चाशती । ( द्विगु. समा. ) प्रभवादीनाम् पञ्चशती प्रभवादि-पञ्चशती । ( ष. त. पु. ) तया परिकलितः प्रभवादि-पञ्चशतीपरिकलितः । ( तृ. त. पु. ) પ્રભવ આદિ પાંચસોથી પરિવરેલો ॥ ६७. चतुर्दशानां पूर्वाणाम् समाहारः चतुर्दशपूर्वम् । ( द्विगु. समा. ) चतुर्दशपूर्वं धारयति चतुर्दशपूर्वधारी । ( उपपद. ) ચૌદ પૂર્વને ધરનારા ॥

• • •

## [ १४ ]

# ॥ श्रीचन्दनबालाचरित्रम् ॥

**वितीर्णं[1] शुद्धपात्रेषु, दानं सद्भावपूर्वकं ।**
**चन्दनाया इव श्राद्धाः, वीरे मुक्त्यै भवेद् ध्रुवम् ॥१॥**

तथाहि-अस्मिन् भारते क्षेत्रे कौशाम्बीत्यभिधा पुरी वर्त्तते, तत्र पुर्यामनेके जिनेन्द्रप्रासादाः शोभन्ते । तत्र दानादिधर्मपरः शतानीकाख्यो राजा न्यायाध्वना[2] राज्यं करोति स्म । तेन राज्ञा च चेटकनृपस्य मृगावतीनाम्नी पुत्री परिणीतासीत् । अथ तस्य शतानीकनृपस्य सुगोत्राभिधानो मन्त्रीवरो बभूव । तस्य मन्त्रिणश्च नन्दाभिधा प्रियासीत् । सा जिनशासनश्राविकया तया मृगावत्या सह मैत्रीं कुर्वाणा धर्मं करोति स्म । तत्रैव च नगरे धनावहनामैकः श्रेष्ठी परिवसति स्म । तस्य च श्रेष्ठिनो मूलाभिधा पत्न्यभवत् ।

इतश्च छद्मस्थः श्रीवीरजिनेन्द्रो विहरमाणः पौषकृष्णप्रतिपद्दिने तत्र नगरे समागतः । तत्र च स प्रभुरित्यभिग्रहं जग्राह । लोहनिगडनिबद्धांह्रिः १, मुण्डितमस्तका २, [3]कृतोपवासत्रया ३, रुदती ४, राजपुत्र्यपि दासीभावं प्राप्ता ५, [4]देहल्यन्तरितैकपदा ६, निवृत्तायां भिक्षुकभिक्षावेलायां ७, सूर्पकोणस्थान् ८, कुल्माषान् ८ चेद्ददाति, तदैव मया पारणकं विधेयम्, नान्यथेति महावीरः प्रभुरभिग्रहं जग्राह । एवमभिग्रहं गृहीत्वा भिक्षाचर्यायां भ्रमतः प्रभोश्चतुर्मासी व्यतिक्रान्ता ।

अन्येद्युः स प्रभुर्भिक्षार्थं भ्रमन् कल्पद्रुरिव तस्य सुगोत्रमन्त्रिणो गृहे समागात् । तदा दुर्बलगात्रं शुद्धामपि दीयमानां भिक्षां क्वाप्यगृह्णन्तं तं प्रभुं दृष्ट्वा सुगोत्रमन्त्रिपत्नी नन्दातीवहृष्टा भिक्षां दातुमभ्युत्तस्थौ । घृतक्षीर-खण्डाद्याहारं ददानामपि तामतिक्रम्य प्रभुरन्यत्र गतः । तदा [5]दूना नन्दा निजस्वामिनं प्रति प्राह, हे स्वामिन् ! अयं महावीरः प्रभुर्भिक्षां कथं न गृह्णाति ?

तस्य किमपि कारणं न ज्ञायते, ततो यदि तत्कारणं ज्ञायते तदा वरम्। तत् श्रुत्वा भद्रकपरिणामो मन्त्री प्राह, हे प्रिये! नूनमन्नाहारं विनायं [६]प्रभुर्मृतिं गमिष्यति। अथ यः कश्चिदभिग्रहः गृहीतोऽस्ति, स यथातथा ज्ञातव्य एव। मृगावत्यपि प्रभुं भिक्षामगृह्णतं ज्ञात्वा हृदि दूना तस्मै भिक्षादानार्थं बहुनुपायान् करोति स्म। एवं ते मृगावतीनन्दे मिथः प्रीतिपरे प्रभुं पारणार्थं निमन्त्रयामासतुः, परं प्रभुर्यदा न किञ्चिद् गृह्णाति तदा ते उभे अपि श्राद्ध्यौ हृदि दुःखिन्यौ बभूवतुः। ततो नृपो, मन्त्री, मृगावती, नन्दा च, ते सर्वेऽपि निरन्तरं प्रभवे भिक्षां[७] दातुमुपचक्रमिरे, परं प्रभुः कथमपि भिक्षां न गृह्णाति। ततस्तैर्मिलित्वा परस्परमिति ध्यातम्, नूनं प्रभुणा चिन्तितोऽभिग्रहोऽस्माभिर्ज्ञातुं न शक्यते।

इतश्चम्पापुर्यां दधिवाहनाभिधो राजा राज्यं करोति स्म। तेन राज्ञा पद्मावत्यभिधा चेटकभूपपुत्री परिणीता, तस्या पद्मावत्या द्वितीयं धारिणीत्यभिधानमपि प्रसिद्धमासीत्। तयोश्चन्दनबाला वसुमती चेत्यपराभिधा पुत्री बभूव, अथान्यदा तयोः शतानीकदधिवाहननृपयोः परस्परं वैरं जातम्, तेन शतानीको राजा [८]प्रच्छन्नं स्वकीयसर्वसैन्ययुतः स्वपुरान्निर्गत्य चम्पापुरीं [९]वेष्टयामास। ततस्तयो रौद्रे महारणे जायमाने शतानीकस्य शतसङ्ख्येषु सुभटेषु पुर्यन्तः पतत्सु दधिवाहनो राजा निजं सर्वं राज्यं मुक्त्वा ततो नष्टः। तदा शतानीकेन भूपेन सा चम्पापुरी लुण्टिता तदैकेन [१०]पदिकेन तस्य दधिवाहनभूपस्य प्रिया धारिणी, वसुमतीपुत्रीयुता गृहीता। एवं स कौशाम्बीनाथस्तत्र स्वाज्ञां प्रवर्त्य स्वपुरं प्रति पश्चाद् ववले।

तदा स पदिकोऽपि ते धारिणीवसुमत्यौ मातृपुत्र्यौ रथे समारोप्य चचाल। अथ मार्गे गच्छन् स सुभटो धारिणीं जगौ, त्वं मे प्रिया भव तस्यैवं कर्णकटुकं वचो निशम्य धारिणी प्राह, अरे! नराधम! रे! पापिष्ठ! त्वयैतत् किं प्रोक्तम्? अहं परस्त्री अस्मि, परस्त्रीमगनेच्छयापि नरो नरकगामी भवति, यतः-

**स्वाधीनेऽपि कलत्रे, नीचः, परदारलम्पटो भवति।**<br>
**सम्पूर्णेऽपि तटाके, काकः कुम्भोदकं पिबति ॥१॥**

**अप्पा[११] धूले मेलीओ, सयणह दीधी छार ।**
**पगपग माथा ढांकणुं, जिण सेवी परदार ॥२॥**
**विक्रमाक्रान्तविश्वोऽपि,[१२] परस्त्रीषु रिंसया[१३] ।**
**कृत्वा कुलक्षयं जातो, रावणो नरकाऽतिथिः ॥३॥**

तत् श्रुत्वा तेन कामातुरेण पदिकेन तस्या धारिण्याः शीलभञ्ज-नार्थमनेके उपायाः कृताः, परं तस्या मनो मनागपि न चलितम् । अथ तस्याः शीलभङ्गार्थं तस्मिन् दुष्टे पदिके बलात्कारं कुर्वति धारिण्या राज्या आत्महत्यया [१४]तूर्णं निजप्राणास्त्यक्ताः एवं निजमातरं मृतां दृष्ट्वा वसुमती तद्वियोगार्तातीव विललाप, हा मातः ! हा मातः ! त्वं मां मुक्त्वा कथं मृता ? अरे ! दैव ! त्वयाहं मातृविहीनैकाकिनी कथं विहिता, अथ मे कस्य शरणं भविष्यति ? इत्यादि विलपन्ती सा मूर्च्छया पतिता शीतलवायुना पुनराप्तचैतन्या सा करुणस्वरेण पुनर्विलपितुं लग्ना, तं दुष्टं पदातिकं चोपलम्भयामास, अरे ! दुष्ट ! त्वयैतत् किं कृतम् ? अथ मदीयजननीहन्तारं त्वां किमहं शापेन भस्मसात् करोमि ? अरे ! दुष्ट ! नूनं त्वं घोरे नरके यास्यसि । एवंविधानि तस्या वचांसि श्रुत्वा [१५]शापभीतः स पदातिको जगौ भो [१६]मृगेक्षणे ! मया कुबुद्ध्यैवैतत्पापं विहितम्, भवितव्यताया अग्रे कस्याप्युपायो न चलति, राजा वा रङ्को वा सर्वोऽपि भाविमेवानुसरति, अथ त्वं विलापं, भयं च मा कुरु, अहं त्वां परिणेतुं नेच्छामि । अतः परं त्वं मम भगिनी वा पुत्र्यसि । एवमुक्त्वा स पदातिकस्तां वसुमतीमाश्वास्य मृताया धारिण्याः शरीराद्धाराद्याभूषणान्युत्तार्य तच्छरीरं रथाद् भूमौ चिक्षेप ।

ततः स पदातिको यावत्तां वसुमतीं निजगृहे समानयत्, तावत्तां दृष्ट्वा तस्य भार्या व्याजहार, अरे ! त्वमिमां नारीं कुतोऽत्र सामनयः ? मया दृग्भ्यां द्रष्टुमपि न शक्यते, अहमेनां मम सुखसर्वस्वहारिणीं जानामि, यद्येनां त्वं गृहमध्ये रक्षिष्यसि, तदाहं ते ममात्महत्यां दास्यामि, यदि वा राजा चेदिमां वार्तां ज्ञास्यति, तदा तव सर्वस्वं ग्रहीष्यति । अस्या आगमनतो मम शरीरे शीतं

चटितमस्ति, तदिमां तूर्णं गृहाद्बहिर्निष्काशय, नो चेदधुनैवाहं भूपपार्श्वे गत्वा सर्वमेतद्वृत्तान्तं निवेदयिष्यामि । किञ्च-

**सोकरूपे जो आवे दासी, तोय न धारुं आपणपासी ।**
**सोकसरिखी न राखुं राणी, [१७]सांलसरिखी में पहिछाणी ॥१॥**
**सोकसाटे तुज कंचणकोडी, म्हारे मन ते डोळाफोळी ।**
**थोडुं घणुं लेइ एहने वीको ( वंचो ), नहितर एहने छोडी मूको ॥**

एवंविधप्रियावचोबाणैर्विद्धो रणाङ्गणशूरोऽपि स पदातिकः कम्पमानकायो व्यचिन्तयत्, अहो ! [१८]संसारेऽपारेर्ष्याकण्टकाकुला [१९]पाटलपुष्पकोमलापि महिला भ्रमरमिव रसलुब्धं पुरुषं निस्सारं करोति । अथैवं तया क्रुद्धया प्रियया तिरस्कृतः स पदातिको भयभीतस्तां वसुमतीं विक्रेतुं राजपथे निनाय । तदा तत्रानेके लोकास्तां ग्रहीतुं तत्र मिलिताः विक्रयार्थं [२०]वर्यां स्त्रियमागतां श्रुत्वा वेश्यासमूहोऽपि तां ग्रहीतुं तत्रायातः । रूपलवाण्यादिगुणगणोपेतां तां निरीक्ष्य मधुनः परितो मक्षिका इव लोका अपि तां वेष्टयामासुः । अथैका वृद्धा वेश्या तं पदातिकं जगौ, भो पदातिक, रत्नादि यद् द्रव्यं तव विलोक्यते तद् गृहाण, परमिमां कन्यामस्मभ्यं देहि, तत् श्रुत्वा तां वेश्यां स पदातिको जगौ, त्वं पञ्चशतं दीनाराणामर्पय, इमां च गृहाण, इति श्रुत्वा तया वेश्यया तत् प्रतिपन्नम् । ततः तया वेश्यया निजबाहुधृता सा वसुमती तां पप्रच्छ, युष्माकं किं कुलं, युष्मत्कुले किं कार्यं क्रियते, यूयं किं ब्राह्मण्यः, वान्यजातीयाः, तदा सा वेश्या जगौ, तवास्मदीयकुलेन किं कार्यं ? अस्माकं गृहे वर्याणि वस्त्राणि परिधीयन्ते, ताम्बूलादिसुगन्धिवस्तूनि चर्व्यन्ते, किञ्चास्माकं गृहे यादृग् भोजनादि वर्तते, तादृग् राजभुवने भूपपत्नीभिरपि नास्वाद्यते । तत् श्रुत्वा वसुमत्या प्रोक्तम्, अथ ज्ञातं मया तव वेश्याकुलमिति । भवत्याः कुलेऽहं मरणान्तेऽपि नायास्यामि । तदा ताभिः सर्वाभिर्वेश्याभिर्मिलित्वा तां वसुमतीमुत्पाटयितुं बलात्कारः कृतः, परं तस्याः शीलमाहात्म्यतस्तस्या वृद्धवेश्याया नासा त्रुटिता, शरीरे च सा श्यामवर्णा बभूव,

मिलितैर्लोकैश्च सहास्यं पूत्कारः कृतः, यथा-

**ज्यां जुए त्यां नाकज नहीं, अति तेह विलखी थइ रही ।**
**काळी थइ जेसी डुंबडी[२१] हसे लोक पाडे बुबडी ॥१॥**
**बीजी नाशे करती सांन, चाल चाल हवे जासे कान ।**
**नहीं एह मानुषी नार, छे कोइ देवीतणो अवतार ॥२॥**

एवं भयभीतास्ताः सर्वा अपि वेश्यास्ततो द्रुतं [२२]पलाय्य स्वस्वस्थाने जग्मुः । ततो मन्दोत्साहः स पदातिकोऽन्यस्मिंश्चतुष्पथे तां नीत्वा गत । इतस्तत्र स धनावहः श्रेष्ठी तां समादातुं समागात् । तदा वसुमत्या तस्मै श्रेष्ठिने पृष्टम्, भो श्रेष्ठिन् ! युष्माकं किं कुलं, किं च युष्मत्कुले क्रियते, किं यूयं ब्राह्मणाः, वा वणिजः, तत् श्रुत्वा स धनावहो जगौ, अस्माकं वणिक्कुलं, अस्मत्कुले च जिनो देवः पूज्यते, शुद्धचारित्रिणः साधवश्च सेव्यन्ते, जिनोक्तो धर्मश्च श्रूयते, जीवदया च पाल्यते, नमस्कारमहामन्त्रस्य जापश्च क्रियते, नित्यं त्रिकालगलितं जलं च [२३]व्याप्रियते, दानं दीयते, शुद्धं शीलं च पाल्यते, तथाहि-

**महामंत्र जपीये नवकार, जे मंत्रे तरीये संसार ।**
**त्रणवार पाणी गालीये, दीजे दान शील पालीये ॥१॥**
**तप कीजे भावना भावीये, साते क्षेत्रे धन वावीये ।**
**विदल साथे नवी खाये दही, अत्थाणानुं नामज नहीं ॥२॥**

निशि भोजदन नवि कीजे माय, मधु माखण घरे कोइ न खाय ॥

तत् श्रुत्वा हृष्टा वसुमती तं पदातिकं प्राह, भो पदातिक ! यदि त्वं मां विक्रेतुमिच्छसि, तदास्मै श्रेष्ठिने देहि, ततस्तेन पदातिना दीनारशतं गृहीत्वा तस्मै धनवाहश्रेष्ठिने वसुमती समर्पिता । ततः स धनावहः श्रेष्ठी तां गृहीत्वा स्वगृहे समायातः । एवं सुकर्मयोगेन सा शुभस्थाने प्राप्ता, तस्या वसुमत्याः स्वभावश्चन्दनवत् शीतलत्वात् श्रेष्ठिना चन्दनेत्यभिधानं विहितम्, यतः-

**विधि विफेडे विधि घडे, विधि घडीने भंजेइ ।**
**लोक नकामा तडफडे, जो विधि करे सो होइ ॥१॥**

अथ तां चन्दनां दृष्ट्वा तस्य धनावहश्रेष्ठिनः प्रिया मूला स्वचेतसि चकिता, परं तदा किमपि नावदत् । श्रेष्ठिना तस्यै प्रोक्तम्, हे प्रिये ! त्वया अस्याश्चन्दनायाः पुत्रीवत् पालनं विधेयम् इति श्रुत्वा सा धृष्टा निजहृदये इति चिन्तयामास, नूनमेष मे पतिरेतां परिणेतुमेवानीतवान्, अधुना मम प्रतारणार्थं[२४] पुत्रीति जल्पति, यतः-

**पापी नवि एठुं मन गणे, मनमेलो मुख बेटी भणे ।**
**शीआल बोली देशे दाघ, डोकरीने घरे पेठो वाघ ॥१॥**

**दुध नीयम लीए मंजार, उंदरसाथ करे ते आहार ।**
**एह वात कदी साची होय, पण ए बेटी नवि मानुं कोय ॥२॥**

**हुं घरडी ए जोबनवेष, मुज माथे छे धोळा केश ।**
**मुजसुखतणी विणासणहार, खरे सोक आवी घरबार ॥३॥**

एवं खेदं कुर्वन्ती सा मूला निजहृदि विचारयामास, अधुनाहं यत्किञ्चिदपि स्वामिने कथयिष्यामि, तत्तस्य नूनं न रोचिष्यते, ततोऽवसरं लब्ध्वाहमेनां चन्दनां मारयिष्यामि, इति विचिन्तयन्ती सा मूला शून्यहृदया बभूव ।

अथैकदा तस्यां मूलायां [२५]प्रातिवेश्मिकगृहे गतायां श्रेष्ठी गृहे समायातः, तदा सा चन्दनबाला तं तातमिवासने उपावेश्य विनयपूर्वकं तत्पादौ जलेन प्रक्षालयितुं लग्ना । इतोऽकस्मात् तदैव सा मूलापि गृहमध्ये समायाता, तदा निजस्वामिपादौ प्रक्षालयन्तीं तां चन्दनबालां, च भूमौ लग्नां तदीयां वेणीं निजोत्सङ्गे[२६] स्थापयन्तं श्रेष्ठिनं [२७]वीक्ष्येर्ष्याग्निदग्धा सा दध्यौ, एषैवं श्रेष्ठिपादौ प्रक्षालयति, अस्या लम्बितां वेणीं च श्रेष्ठी ह्येवं निजोत्सङ्गे स्थापयति, तेन नूनं

ज्ञायते, यदयं श्रेष्ठी मामर्धजरतीं निष्काश्य, वा विषादिना हत्वा अस्याः पाणिग्रहणमेव द्रुतं करिष्यति, अथाऽविलम्बेन मयेयं मारयितुं योग्या, यतः-

**उगंती विसवेलडी, नखे न छेदी जेण ।**
**ते मूरख मूला भणे, हित न साध्युं तेण ॥१॥**

इति चिन्तयन्ती सा इर्ष्याग्निना ज्वलयन्त्येव तस्थौ ।

अथ प्रातः श्रेष्ठी निजहट्टे गतः, तदा तया मूलया [२८]नापित आकारितः, प्रोक्तं चास्या बालाया मस्तकं त्वं मुण्डय ? तदा तेन नापितेनापि तस्या मस्तकं मुण्डितम्, ततस्तत्पादयोः सा लोहनिगडे क्षिप्त्वा, तां रहो[२९] [३०]गुप्तापवरके चिक्षेप, तद्द्वारे च [३१]तालकं ददौ ततः सा दुष्टा मूला दध्यौ-

**सोक मारणे नहि को दोष, सोक मरे थाये संतोष ।**
**सोकतणी मुज मनमां गोझ, राखे सोक ते माणस रोझ ॥१॥**

**गोरी पूछे सुगुण जण, उभी राजहचोक ।**
**जो कोइ जाणो तो कहो, भली सूडी के सोक ॥२॥**

**सूडी एकज कट्ठडो, सोक अणंतां कट्ठ ।**
**सोकसाल जो होय तो, थाये हयडुं भट्ठ ॥३॥**

अथापवरकस्थिता चन्दनबाला दध्यौ-

अथ मम वीतराग एव शरणं, अरे ! मया पुराकृतं किमपि दुष्कर्माधुनोदयं प्राप्तं ! नगरभङ्गेऽहं जननीयुता पदातिना बन्दीकृता, मार्गे गच्छन्ती मातापि निजशीलभङ्गभयादात्मघातेन मृता, पशुरिवाहं तेन पदातिना विक्रयार्थं चतुष्पथे मुक्ता । परं किञ्चित्सुकृतोदयेन वेश्यापाशादहं रक्षिता, धनावहश्रेष्ठिना च गृहीता । अत्राप्यहमधुना मुधैवेर्ष्याभिभूतया श्रेष्ठिन्यात्र बन्दीकृतास्मि । परमेतदपि सुष्ठु जातं, यदत्रैकान्तस्थानेऽहं धर्मध्यानं करिष्यामि । एवं निजहृदयमाश्वास्य सा तत्र धर्मध्यानपरा स्थिता । यतः-

**जाणे नहीं दिवस के रेण, झरे नीर निवारे नेण ।**
**चंदना महामंत्र तिहां जपे, त्रण उपवासे कर्मज खपे ।।१।।**

एवं तत्र स्थिता चन्दनबाला दिनं वा रात्रिं वा न जानाति, एवं दिनत्रय व्यतीतम् । इतोऽसौ धनावहः श्रेष्ठी दिनत्रयान्तस्तां चन्दनामदृष्ट्वा मनसि शङ्कितो निजपत्नीं पप्रच्छ, भो प्रिये ! सा चन्दना पुत्री क्व गता ? कथं न दृश्यते, तत् श्रुत्वा सा मूला जगौ, स्वामिन् ! साऽतीवोद्धता जातास्ति, गृहमध्ये चरणमपि न धारयति, अहं न जानामि, यत् सा कुत्र गता भविष्यति ? वा केन सह रंस्यते । अहं त्वेवं जानामि, यदियं वेश्येव बहून् पुरुषांस्त्यक्त्वा समायातास्ति, कदाचिद् गृहमध्याद् द्रव्यादि लुण्टित्वा सा पलायनं करिष्यति । मुधैव यूयं तदर्थमुद्वेगं कुरुथ । इति निशम्य श्रेष्ठी निजमनसि तस्याः स्वमहिलाया एवात्रार्थे किञ्चित्कौटिल्यं विज्ञाय जगौ, यावदहं चन्दनां न पश्यामि, तावद्भोजनं न विधास्ये । इत एकया वृद्धदास्या श्रेष्ठिनमेकान्ते नीत्वा प्रोक्तम्, भो श्रेष्ठिन् ! त्वमेनमपवरकं समुद्घाट्य तस्मिन् भूमिगृहे पश्य, नूनं तव पत्न्या दिनत्रय पूर्वं तत्र सा क्षिप्तास्ति, मदीयं नाम प्रकटं मकार्षीः, चेत्तव भाग्यं तर्हि सा तत्र कदाचिज्जीविता मिलिष्यति । तत् श्रुत्वा सचमत्कारं चेतसि विषण्णः श्रेष्ठी तां जगौ, भो दासि ! त्वं नूनमुत्तमासि ।

ततः स श्रेष्ठी यावत्तदपवरकतालकं भङ्क्त्वा भूमिगृहे विशति, तावत्तत्रान्धकारात्तां चन्दनामपश्यन् शब्दापयामास, परं भयभीता सा किञ्चिद-प्युत्तरं न ददाति । ततः स दीपककरणात्तत्र सुप्तां चन्दनां पश्यति स्म, ततो विहितोपवासत्रयां तामुत्पाट्य श्रेष्ठी बहिः पट्टशालायामानयत् । इतः सा मूला सर्वमप्यन्नं [३२]रसवतीगृहे मुक्त्वा, तत्र च तालकं दत्त्वाऽन्यत्र गतासीत् । श्रेष्ठी च तत्र तालकं दृष्ट्वा व्याकुलो दासीं प्रति प्राह, यत्किञ्चिदपि [३३]राद्धमन्नं भवेत्तदानय, अन्यथा विना भोजनमस्या नूनं मरणं भविष्यति । तत् श्रुत्वा सा दास्यपि गृहाङ्गणे महिष्यर्थं राद्धान् कुल्माषानानीय श्रेष्ठिने ददौ । श्रेष्ठ्यपि व्याकुलस्तत्र भाजनान्तरमपश्यन् सूर्पे एव तान् कुल्माषान् क्षिप्त्वा चन्दनायै

भोजनार्थं ददौ। तस्याः पादयोश्च लोहनिगडे दृष्ट्वा द्रुतं तद्भञ्जनार्थं श्रेष्ठी स्वयं लोहकारमाकारयितुं बहिर्ययौ। अथ कुल्माषोपेतसूर्पहस्ताऽष्टमपारणार्थं देहल्या उम्बरोपरि निविष्टा सा चन्दना ध्यायति, यद्यस्मिन् समये कस्यापि महात्मनोऽतिथेः समागमनं भवेत्तदा तस्मै इदं कुल्माषभोजनं दत्त्वाहं पारणं करोमि। इतस्तस्या महाभाग्यवशात् भगवान् श्रीमहावीरो गोचरचर्यायां विहरंस्तत्र समायातः। अथ तेन भगवतैवंविधोऽभिग्रहः कृतोऽस्ति, यथा-

द्रव्यतः सूर्पकोणकस्थितान् कुल्माषान, क्षेत्रतश्चैकं पादं देहल्या अन्तः एकं पादं च बहिः स्थापयित्वोम्बरोपरिस्थिता, कालतो व्यतीतायां भिक्षा-चरवेलायां, भावतो राजसुता, दासत्वमापन्ना, निगडितपादा, मुण्डिमस्तका, अष्टमभक्तिका, रुदती चेत् कापि मह्यं भिक्षां दास्यति, तदाहं ग्रहीष्यामि। अथैवमभिग्रहवन्तं श्रीमहावीरं प्रभुं तत्रागतं वीक्ष्य चन्दना स्वचित्तेऽत्यन्तं हृष्टा भिक्षार्थे निमन्त्रयामास।

तदा भगवानपि तस्या रोदनं विना किञ्चिन्न्यूनं स्वाभिग्रहं मत्वा भिक्षामनादाय यावत्पश्चाद्यातुं प्रवृत्तस्तावच्चन्दना खिन्नहृदयेति दध्यौ, अहो! अस्मिन् समये समायातोऽपि भगवान् मदीयाभाग्यवशतो मया दीयमानामपि भिक्षां न गृह्णाति, इति ध्यायन्त्यास्तस्या नयनाभ्यामश्रूणि सरितुं लग्नानि। एवं तां रुदतीं दृष्ट्वा निजाभिग्रहं सम्पूर्णं विज्ञाय तस्याश्चन्दनाया हस्ततो भगवान् तत्कुल्माषभिक्षां लाति स्म।

यदुक्तम्-

**पृथ्वीनाथसुता [३४]भुजिष्यचरिता जञ्जीरिता मुण्डिता,**
**[३५]क्षुत्क्षामा रुदती विधाय पदयोरन्तर्गतां देहलीम्।**
**कुल्माषान् प्रहरद्वयव्यपगमे सूर्पस्य कोणस्थितान्,**
**दद्यात् पारणके तदा भगवतः सोऽयं महाभिग्रहः ॥१॥**

एवं यदा प्रभुणा भिक्षा गृहीता तदैव तत्र देवैरभ्येत्य द्वादश-कोटीस्वर्णवृष्टिः कृता, तस्या लोहनिगडे स्वर्णशृङ्खलाभूते, मस्तके च तस्या

मनोहरः केशपाशो बभूव, गगनाङ्गणे देवदुन्दुभयो नेदुः, राजादयः सर्वेऽपिः लोका आनन्दोद्गारसहितास्तां चन्दनां महाभाग्यवतीं दृष्ट्वा प्रशंसयामासुः ।

इतो लोहकारसहितस्तत्रागतो धनावहश्रेष्ठी तदाश्चर्यं दृष्ट्वा महानन्दं प्राप । भयभीता मूला तु कम्पमानशरीरा तत्रागत्य चन्दनायाः पादयोः पतिता । चन्दना तु तामुत्थाप्य नत्वा जगौ, हे मातः ! अयमुपकारस्त्वयैव मह्यं कृतोऽस्ति, अद्याप्यहं भाग्यवत्यस्मि, यत् त्रिजगत्प्रभुर्मया भवत्याः प्रसादेन पारणं कारितः ।

**यतः-चंदना मुखथी एमज गाय, मूला तुं खरी माहरी माय ।**
**धारिणीए तो जनम ज दीध, तुजथी तो मुज कारज सीध ॥१॥**
**उपकारो शतानीकराय, पछी पदातितणो छे पसाय ।**
**जो मने वेचत वेश्याने हाथ, तो मुज हालत शुं अरे थात ॥२॥**
**पूरवभवनो धनावह बाप, जेहपसायें नाठुं मुज पाप ।**
**मूलातणो घणो उपकार, मागे चंदना संयमभार ॥३॥**

हे मातर्मूले ! त्वमेव मे सत्या माता, यदि त्वं मामेवं नाऽकरिष्यस्तदाहं षण्मासोपवासिनं जगत्प्रभुं महावीरं कथमपारयिष्यम्, एवं तस्या मूलाया उपकारमेव चन्दना मन्यते स्म । यतः-

**उपकारे उपकार तो, करे कोइ सवि लोक ।**
**अवगुणउपर गुण करे, ते अहीं विरला कोक ॥१॥**

अथ प्रभुरपि ततोऽन्यत्र विजहार । अथ देवकृततत्सुवर्णवृष्टिग्रहणतत्परं शतानीकभूपं शासनदेवी निषिद्ध्य प्राह, भो राजन् ! त्वमेतत्सुवर्णसमूहं मा गृहाण, एष सुवर्णसमूहोऽस्याश्चन्दनबालाया दीक्षासमये व्ययीकरणयोग्यो भविष्यति, यत इयम् चन्दनबाला भगवतः केवलज्ञानप्राप्तेरनन्तरं चतुर्विधसङ्घ-स्थापनसमये प्रथमा साध्वी भविष्यति । इत्युक्त्वा शासनदेवी तत्सर्वं धनं

धनावहश्रेष्ठिने समर्प्य स्वस्थाने गता। ततो दीक्षामनोरथतत्परा सा चन्दनबालापि धर्मकार्याणि कुर्वाणा सुखेन तस्य धनावहश्रेष्ठिनोगृहे स्थिता निजं समयं गमयति। इतः कियत्कालानन्तरं भगवान् महावीरोऽपि सर्वकर्मक्षयात्केवलज्ञानं प्राप। तदैव सा चन्दनबालापि तत्र समेत्य प्रभुं प्रणम्य संयमं ययाचे। ततः श्रीवीरप्रभुणानुमोदिता सा पूर्वं देवैः वृष्टां सर्वामपि श्रियं सप्तसु क्षेत्रेषु व्ययित्वा शुभभावनापरा दीक्षां जग्राह। अथैकदा श्रीमहावीरप्रभुः कौशाम्ब्युद्याने समवासार्षीत्। तदा तत्रानेके देवाः, नृपाः, साधवः, साध्व्यः, श्रावकाः, श्राविकाश्च धर्मं श्रोतुं समाजग्मुः। तदा प्रभौ धर्ममुपदिशति चरमपौरुषी-व्याख्यानावसरे निजमूलविमानस्थौ चन्द्रसूर्यावपि प्रभोर्वन्दनार्थं समायातौ।

तदा सन्ध्यां पतितां विज्ञाय बहुश्रुता सा चन्दना साध्वी तु ततः समवसरणतः समुत्थाय पुरमध्ये निजोपाश्रये गता। समागतसूर्यविमानप्रकाशेन सन्ध्यावेलामजानन्ती मृगावती तत्रैव समवसरणे स्थिता। इतस्तयोश्चन्द्र-सूर्ययोस्ततः स्वस्थाने गतयोस्तत्रान्धकारं व्याप्तं निरीक्ष्य निजप्रमादं निन्दन्ती मृगावती तु द्रुतं समुत्थायोपाश्रये ययौ। तत्र प्रवर्तिन्या तया चन्दनया तु तदा पौरुषीं भणित्वा संस्तारः[३६] कृतोऽभूत्। मृगावती तु स्वकृतं प्रमादं निन्दन्ती, तदर्थं मिथ्यादुष्कृतं च ददाना सुप्तायाश्चन्दनायाः प्रवर्तिन्याश्चरणौ वाहयामास। चन्दनापि तां समागतां विज्ञाय तस्यै [३७]उपलाम्भं यच्छति स्म, भो महाभागे! तव कुलीनाया रात्रिगमनरूपम् एवंविधप्रमादाचरणं युक्तं न, मृगावती तु तदुपालम्भं श्रुत्वा निजापराधार्थं पुनः पुनस्तां क्षमयामास। ततो द्रुतं सा चन्दनासाध्वी तु निद्रां प्राप्ता। मृगावती तु तच्चरणौ संवाहयन्ती निजात्म-निन्दापरा क्षपकश्रेण्यारूढा केवलज्ञानं प्राप्ता।

इतस्तत्राऽऽपतन्तं कृष्णं सर्पं स्वज्ञानेन विलोक्य मृगावती निद्राधी-नायाश्चन्दनाया हस्तमुत्पाट्यन्यत्र मुमोच। तत्स्पर्शतो जागरिता रुष्टा चन्दना तां मृगावतीं जगौ, अरे त्वमुत्तिष्ठ, इतः स्थानादयन्त्र गच्छ, त्वया मदीयो हस्तः कथमुत्पाटितः? तदा क्षमायाचनपरया मृगावत्योक्तम्, भो महाभाग्यवति! मदीयापराधं यूयं क्षमध्वम्, किञ्चात्र सर्पमागच्छन्तं विज्ञायैव मया पूज्याया

भवत्या हस्त उत्पाटितोऽन्यत्र च मुक्तः ।

तत् श्रुत्वा चेतसि चमत्कृतया चन्दनया प्रोक्तम्, त्वयात्र कज्जल-प्रायान्धकारे सर्प आगच्छन् कथं ज्ञातः ? तदा मृगावती जगौ, हे पूज्ये ! मया ज्ञानेन ज्ञातः तदातीवचमत्कृत्या चन्दनयोत्थाय पुनस्तस्यै पृष्टम्, किं ते ज्ञानं प्रतिपाति वा अप्रतिपाति समुत्पन्नम् ? तयोक्तं हे भगवति ! भवत्याः प्रसादेन अप्रतिपाति । तदैव सा चन्दनाप्यभ्युत्थाय तां नत्वा [३८]मिथ्यादुष्कृतदानपरा स्वात्मानं निन्दयामास, यथा हा ! मयाऽज्ञानवशतः केवलज्ञानवत्या अस्या मृगावत्याः साध्वीश्रेष्ठाया आशातना कृता ! एवं निजात्मनिन्दापरायास्त-स्याश्चन्दनायाः साध्व्या अपि क्षपकश्रेण्यारूढायास्तदैव केवलज्ञानं समुत्पन्नम् । क्रमेण ते द्वे अपि साध्व्यौ मुक्तिं गते ।

## : अभ्यास :

प्रश्नः १. केन कारणेन धारिण्या आत्महत्या कृता ?

२. वसुमत्याः शीलस्य को माहात्म्यः ?

३. भगवता महावीरेण कोऽभिग्रहो जगृहे ?

४. चन्दनार्यया मृगावत्यै क उपालम्भो ददे ?

५. चन्दनार्या केवलज्ञानं कया रीत्या प्राप ?

## ॥ इति श्रीचन्दनबालाचरित्रं समाप्तम् ॥

**१. वितीर्ण वि.-આપેલ ॥ २. न्यायः एव अध्वा न्यायाध्वा । ( अव. पू. ) तेन न्यायाध्वना । ન્યાયમાર્ગ વડે ॥ ३. उपवासानाम् त्रयम् उपवासत्रयम् । ( ष. तत्पु. ) कृतं उपवासत्रयं यया सा कृतोपवासत्रया । ( समा. बहु. ) કરાયા છે ત્રણ ઉપવાસ જેણી વડે એવી તે ॥ ४. देहली स्त्री.-ઉંબરો ॥ ५. दून वि. દુઃખી ॥ ६. मृति स्त्री.-मृत्यु ॥ ७. उप+क्रम् ? ग.-પ્રયત્ન કરવો, વિનંતી કરવી ॥ ८. प्रच्छन्न वि.-ગુપ્ત ॥ ९. वेष्टयामास ઘેરો ઘાલ્યો ॥ १०. पदिक पुं.- સૈનિક ॥ ११. જેણે પરદારાને સેવી છે. તેણે આત્માને ધૂળમાં નાખ્યો છે. સ્વજનોને બેઆબરુ કર્યા છે. બધા તેને લાત મારે છે. १२. विक्रम पुं.-પરાક્રમ ॥ १३. रिंसा स्त्री.-રમવાની ઈચ્છા ॥ १४. तूर्णम् अव्य-જલ્દી ॥ १५. शापात् भीतः शापभीतः ( पं.तत्पु. ) શાપથી ભય પામેલ ॥**

१६. मृग इव ईक्षणे यस्याः मृगेक्षणा । ( उप. बहु. ) तत्सम्बोधने हे मृगेक्षणे ! હે ! મૃગના જેવી આંખવાળી ॥ १७. साल पुं.-શલ્ય ॥ १८. ईर्ष्या एव कण्टकानि ईर्ष्याकण्टकानि । ( अव.पू.क. ) अपाराणि च तानि इर्ष्याकण्टकानि च अपारेर्ष्या-कण्टकानि । ( वि. पू. क. ) तैः आकुला अपारेर्ष्याकण्टकाकुला । ( तृ. तत्पु. ) અપાર એવા ઈર્ષ્યારૂપી કાંટાઓથી વ્યાપ્ત ॥ १९. पाटल नपुं.-ગુલાબનું ફૂલ ॥ २०. वर्य वि.- શ્રેષ્ઠ । २१. डुंबडी स्त्री. -ડુંબ જાતિની સ્ત્રી ॥ २२. पलाय्य [परा+अय्] ( सं. भू. कृ ) નાશીને २३. व्याप्रियते વપરાય છે. २४. प्रतारण नपुं.- છેતરવું ॥ २५. प्रातिवेश्मिक पुं.- પાડોશી ॥ २६. उत्सङ्ग पुं. - ખોળો ॥ २७. ईर्ष्या एव अग्निः ईर्ष्याग्निः ( अव. पू. ) तेन दग्धा ईर्ष्याग्निदग्धा । ( तृ. तत्पु. ) ८. नापित पुं.-હજામ ॥ २९. रहस् નપું.-એકાન્ત ॥ ३०. गुप्तं चादः अपवरकं च गुप्तापरकम् । ( वि. पू. क. ) तस्मिन् गुप्तापवरके । અંધારા ઓરડામાં ॥ ३१. तालक. नपुं.- તાળું. ૩૨. रसवतीगृह नपुं.- રસોડું ॥ ३३. राद्ध वि.- પકાવેલ ॥ ३४. भुजिष्य पुं.-દાસ ॥ ३५. क्षुधा क्षमा क्षुत्क्षामा । ( तृ. तत्पु. ) ભૂખથી પીડાતી ॥ ३६. संस्तार संस्थारो ॥ ३७. उपालम्भ पु.- સંથારો ॥ ३८. पु.- ઠપકો ॥ ३९. मिथ्यादुष्कृतदानपरा स्त्री.- 'मिच्छामि दुक्कडम्'- આપવામાં તત્પર ॥

• • •

## [ १५ ]

# ॥ श्रीसुभद्राचरित्रम् ॥

**शीलं पालयतां पुंसा, शुद्धभावेन सन्ततं ।**
**[१]वशीभवन्ति[२] गीर्वाणा, सुभद्राया इवाचिरात् ॥१॥**

वसन्तपुराख्ये नगरे जितशत्रुनामा राजा राज्यं करोति स्म । तस्य नृपस्य जैनधर्मपालको जिनमतिनामा श्रेष्ठी मन्त्रिप्रवरो विद्यते, तस्य च परमार्हती श्राविका [३]तत्त्वमालिनीनाम्नी प्रियास्ति । ततः शुभस्वप्नसूचिता सुभद्राख्या पुत्री बभूव । क्रमण सम्प्राप्तयौवना सा देवाङ्गनेवातिमनोहररूपलावण्यधारिणी यूनां मनांसि व्याकुलयामास । सर्वकलाकलिताऽसौ [४]जैनधर्मैकलीनमानसा सर्वदा देवपूजा, गुरुभक्ति, प्रतिक्रमणादिकार्यदक्षा बभूव । अथ स जिनमतिः श्रेष्ठी तां निजसुतां सुभद्रां केनचिज्जैनधर्मविदा पुरुषेण सह परिणाययितुं समीहते । अथान्यदा चाम्पुपरवास्तव्यो [५]बौद्धधर्मवासितान्तःकरणो बुद्धदासाख्यो युवा व्यापारी व्यापारार्थं तत्र वसन्तपुरनगरे समाययौ । तत्र स विविधक्रयाणक-व्यापारं[६] कुर्वन् भूरिधनं समर्जयति स्म । अथैकदा स बुद्धदासो मार्गे व्रजन्तीं, सखीसमूहोपेतां, रूपनिर्जितसुराङ्गनां च तां सुभद्रां विलोक्य मदनातुरः कञ्चिन्नरं पप्रच्छ, भो पुरुषोत्तम ! कस्येयं पुत्री, सा च विवाहितास्ति, वा कुमारिकास्ति ? तेनोक्तम्, भो बुद्धदास ! इयं जिनमत्यभिधस्य श्रेष्ठिनः सुभद्राख्या तनया वर्तते, किञ्च साद्यापि कुमारिकैवास्ति । तस्य जनकश्च तां जैन[७]धर्मविदा शुद्धश्रावकेण सहैव परिणाययितुं समीहते, नान्यस्य परधर्मिणः कस्यापि पुरुषस्य स निजपुत्रीं दास्यति । तत् श्रुत्वा स बुद्धदासो दध्यौ, अथाहं कथञ्चिदपि जैनीभूयैतां परिणयामि, यतो मे मानसं तस्यामेव विलग्नमस्ति । जैनीभूतं च मां विलोक्य स जिनमतिश्रेष्ठ्यपि सुखेनेमां निजपुत्रीं सुभद्रां दास्यति, इति विचिन्त्य स बुद्धदासो जिनधर्मसम्बन्धिशास्त्राणि पठित्वा सामायिकप्रतिक्रमणदिजैन-धर्मक्रियासु कुशलो बभूव ।

एवं शुद्धां [८]श्राद्धसामाचारीं शिक्षित्वा सुश्राद्धीभूय स जिनदेवपूजां करोति, ततो धर्मशालायां गत्वा जैनमुनिपार्श्वे धर्मशास्त्रश्रवणं करोति । एवं नित्यं धर्मक्रियां कुर्वन्तं तं तादृशं सुश्रावकं विलोक्य स जिनमतिः श्रेष्ठी निजगृहे देवपूजाद्यर्थमाकारयामास । एवं श्रेष्ठिसमाहूतः स बुद्धदासस्तत्र श्रेष्ठिगृहेऽभ्येत्य[९] यतनापूर्वकं निजशरीरं प्रक्षाल्य चन्दनशतपत्रादिभिर्जिनबिम्बानि पूजयामास, ततो मधुरस्वरैर्निजहृदयात् कृत्रिमशुद्धभावं दर्शयन् स जिनेशानां स्तवनं चकार ।

ततश्चात्याग्रहपूर्वकं श्रेष्ठिना भोजनाय निवेशितः स बुद्धदासः भोजनं [१०]परिवेषयतः श्रेष्ठिनो जगौ, भो श्रेष्ठिन् ! अद्य मम विकृतियुतं भोजनं न कल्पते, मयाद्याचाम्लमेव[११] कर्तव्यमस्ति । इति श्रुत्वा श्रेष्ठिना निर्विकृतिकं रुक्षान्नं तस्मै परिवेषितम् । तन्मिताहारं विधाय प्रासुकं जलं च पीत्वा तेन तत्रैव स्थितेन चतुर्विधाहारप्रत्याख्यानं पुनः सूर्योदयावधि विहितम् । एवं तं जैनधर्मकुशलं, क्रियापात्रं, पदे पदे च जीवयतनापरं विलोक्य तस्य तया मायया वञ्चितः श्रेष्ठी चिन्तयामास, अहो ! अयं धर्मात्मा युवा पुरुषो मम पुत्र्याः सुभद्रायाः परिणयनार्थं सर्वथा योग्योऽस्ति । यतः-

**जिनेन्द्रधर्मवेत्तारम्, दातारं विनयान्वितम् ।**
**कर्तारं यतनां सर्व-जीवेषु करुणान्वितम् ॥१॥**
**सरलं [१२]स्ववपूरूप-लक्ष्मीनिर्जितमन्मथम् ।**
**पुत्र्यर्थं विरला एव, लभन्ते वरमङ्गिनः ॥२॥** युग्मम् ॥

इत्यादि विचिन्त्य स्वहृदये प्रमुदितः स श्रेष्ठी तं बुद्धदासं प्रति प्राह, भो बुद्धदास ! त्वं धर्मज्ञो गुणज्ञश्चासि, इयं मे कन्या सुभद्रा साम्प्रतं यौवनाभिमुखा जातास्ति, ततो यदि त्वमेनामङ्गीकुर्यास्तदा लक्ष्मीकृष्णयोरिव, शशिरोहिण्योरिव युवयोरभिन्नप्रेमरसपूर्णः सम्बन्धो भवेत् । एवंविधां श्रेष्ठिनः प्रार्थनां निशम्य निजहृदि हृष्टेन तेन बुद्धदासेनापि तदीयवचः स्वीकृतम् ।

ततो नैमित्तिकैरादिष्टे निकटे शुभदिवसे श्रेष्ठिना महोत्सवपूर्वकं तेन बुद्धदासेन सह निजपुत्र्याः सुशीलायाः सुभद्राया ववाहो विहितः । एवं तां

सुभद्रां परिणीय स तया सह विविधभोगविलासाननुभवन् स्थितः । कियद्दिनानन्तरमुपार्जितभूरिद्रव्यः स बुद्धदासः सकलं श्वशुरादिवर्गमुत्कलाप्य स्वपुरं प्रति [१३]यियासुर्निजपत्न्या सुभद्रया तह ततः प्रस्थानमकरोत् । क्रमेण कुशलेन मार्गमुल्लङ्घयन् स स्वनगरे समेत्य मातापित्रोर्मिलितः । परमानन्दं प्राप्ताभ्यां मातापितृभ्यामपि गृहे महोत्सवः कृतः । सुभद्रापि निजश्वश्रूपादयोः पतित्वा निजविनयं प्रकटीचकार।

अथ द्वितीयदिने प्रातरुत्थाय सुभद्रा [१४]स्नानशूचीभूता जिनेन्द्रभवने गत्वा जिनबिम्बानि प्रणम्य, जैनमुनिभ्यश्चापि वन्दनं विधाय गृहे समागता । तदा श्वश्रूस्तांप्रति जगौ, वत्से ! अस्माकं कुले तु बुद्ध एव देव आराधनीयो विद्यते, अतस्त्वयाथो जिनमन्दिरादिष्वन्यत्र कुत्रापि न गन्तव्यम् । तत् श्रुत्वा वज्राहतेव [१५]दुःखितहृदया सा सुभद्रा दध्यौ । अहो ! कपटं विधायाहमनेन भर्त्रा परिणीता, नूनमेष बौद्धधर्मानुयायी वर्तते, अथ किं कर्तव्यम् ? परं यद्भावि तद्भवतु, मया तु निजहितमेवाचरणीयम्, यतः-

**सर्वथा स्वहितमाचरणीयम्, किं करिष्यति जनो बहुलजल्पः ।**
**विद्यतो स न हि कश्चिदुपायः, सर्वलोकपरितोषकरो यः ॥१॥**

अथ श्वश्रूवचनमवगणय्य सा सुभद्रा तु जिनमन्दिरेषु जिनबिम्बान्येव नन्तुं प्रयाति । जैनमुनिभ्यश्च वन्दनं विदधाति । एवं तां निजाज्ञामवगणयन्तीं निरीक्ष्येर्ष्याभिभूता[१६] श्वश्रूर्यथा तथा वदति, निरपराधां च तां [१७]विगोपयति । तद् दृष्ट्वा बुद्धदासेन सा निजप्रिया सुभद्रा पृथग्गृहे स्थापिता, तत्र च सुखं स्थिता सा जिनेन्द्रं पूजयन्ती, जैनमुनींश्च प्रतिलाभयन्ती धर्मकार्येष्वेव तत्परा बभूव इतोऽन्यदा कश्चिज्जिनकल्पो जैनसाधुर्मासक्षपणपारणे एकाक्येव तस्याः सुभद्राया गृहे भिक्षार्थं समायातः, तं मुनीन्द्रं प्रतिलाभयन्ती सुभद्रा चक्षुःपतिततृणेन पीड्यमानं विलोक्य विचारयामास, अहो अयं जिनकल्पविहारीमुनीन्द्रो निजचक्षुषस्तृणापकर्षणपराङ्मुखो[१८] वर्तते, इदं च तृणं चेत्तस्य चक्षुषि स्थास्यति, तदास्य चक्षुर्गमिष्यत्येव । इति विचार्य तया सुभद्रया यतनापूर्वकं[१९] लाघवेन निजजिह्वया तस्य मुनेर्नेत्रात् तृणं कर्षितं । तदैवं कुर्वन्त्याश्च तस्या

[20]भालस्थमार्द्रकुङ्कुमतिलकं तस्य मुनेर्ललाटे लग्नम् ।

स मुनिस्तु भिक्षां गृहीत्वा ततो निःसृतः । तदा कुङ्कुमतिलकाङ्कितं मुनिभालं निरीक्ष्य छिद्रान्वेषणपरा तस्याः सुभद्रायाः श्वश्रूः साक्षाद्व्यन्तरीव निजभुजे उल्लालयन्ती महता स्वरेण पूत्कारं कुर्वन्ती पारिवेश्मिकजनान् मेलयामास, निजपुत्रं बुद्धदासमपि तत्र समाहूय तं तिलकाङ्कितं मुनिं दर्शयामास। एवं सा तां सुभद्रां विगोपयन्ती निजतनयं प्राह, वत्स ! इदं तव वध्वायाः दुराचारं विलोकय, नूनमियं मुधैव निजात्मानं जैनधर्मपरं प्रकटयन्ती त्वां विप्रतार्यानेन साधुना सह विषयसेवनं करोति । इतस्तत्र सर्वमपि कुटुम्बं मिलितं, वधूचेष्टितं च विलोक्य कुटुम्बजनाः प्रोचुः, नूनमियं वधूः सुभद्रा [21]स्वैरिणी कुलटैव विद्यते, अनयाऽऽत्मनःकुलं कलङ्कितम् । एवं कुटुम्बादि-जनप्रोक्तानि वाक्यानि निशम्य [22]विलक्षीभूतो बुद्धदासोऽपि तस्यां विरक्तो जातः ।

एवं कुटुम्बादिपारिवेश्मिकजनैर्निजभर्त्रा च विडम्ब्यमाना, तिरस्कृता च सुभद्रा दध्यौ, अहो ! साम्प्रतं मम पूर्वकृतं किमपि दुष्कृतं प्रकटीभूतं, यदिदं धर्मकार्यं कुर्वन्त्या ममोपरि मुधैवायं कलङ्कः चटितः, अथ किं करोमि ? कुत्र वा यामि ? मम धर्मस्यैव शरणमस्तु, इत्युक्तवा सा दध्यौ, यावच्छासनदेवी मदीयमेतत्कलङ्कं नोत्तारयिष्यति, तावन्मया कायोत्सर्गो न मोच्यः, इति ध्यात्वा सा सुभद्रा निश्चलमानसा[23] निष्कम्पितशरीरा निजगृहमध्ये कायोत्सर्गध्याने तस्थौ । ततस्तस्याः सत्त्वसाहसेन संतुष्टा शासनदेवी प्रकटीभूय प्राह, हे वत्से । त्वं निर्दोषासि, अथ त्वं कायोत्सर्गं पारय एवं शासनदेव्यादिष्टा सा सुभद्रा कायोत्सर्गं पारयित्वा तां देवीं प्रति प्राह, भो मातः ! यूयं मदीयमिदं कलङ्कं दूरीकुरूत यथा जैनधर्मविगोपनं[24] न स्यात् ।

तत् श्रुत्वा सा शासनदेवी जगौ, भो वत्से ! त्वं खेदं मा कुरु, नूनं यथा प्रातस्तवैतत्कलङ्कं उत्तरिष्यति, तथैवाहं करिष्यामि । अथ यथाहं गगनाङ्गणस्था[25] कथयामि, तथा त्वया कर्तव्यम्, तत् श्रुत्वा सा सुभद्रा हृष्टा, शासनदेव्यप्यदृश्यतां प्राप्ता ।

अथ प्रातरुत्थाय [26]यावन्नगरप्रतोलीपालकाः प्रतोलीरुद्घाटयन्ति,

तावन्मनागपि चतुसृणां प्रतोलीनां कपाट्य नोद्घटन्ति स्म । तत् श्रुत्वा निजहृदि चमत्कृतो नृपः स्वयं तत्रागत्य प्रतोलीद्वारमुद्घाटयितुमुद्यमं करोति स्म । कृत-बहुप्रयत्नोऽपि स नृपः कथमपि तदुद्घाटनसमर्थो न बभूव । ततः कोलाहलपराः सर्वेऽपि लोका व्याकुला बभूवुः । राजादिभिर्लोकैर्मिलित्वा नानाविधानि विधिना शान्तिकार्याणि कारितानी, तथापि प्रतोलीकपाटाः कथञ्चिदपि नोद्घटिताः ततो राजापि विलक्षोऽभूत् ।

इतो दिव्यप्रकाशपूर्वकं गगनमण्डले समागता शासनदेवी नृपादि-सर्वलोकेभ्यः कथयामासा, भो लाका ! नगरमध्ये या स्त्री सती भविष्यति, सा चेदामसूत्रतन्तुनिबद्धया[२७] चालिन्या कूपमध्याज्जलमाकर्ष्य, तज्जलेन प्रतोलीकपाटानाच्छोटयिष्यति, तदैव ते उद्घटिष्यन्ति, अन्यथा केनापि प्रकारेण नोद्घाटिष्यन्ति । तत् श्रुत्वा नृपेण नगरमध्ये पटहोद्घोषणा कारिता, या सती स्त्री देवोक्तविधिना पुरप्रतोलीद्वारोद्घाटनं करिष्यति, तस्यै राजा भूरिसन्मानं दास्यति ।

एवं विधां पटहोद्घोषणां निशम्यानेकपौरमहिला गर्वेण निजसतीत्वं मन्यमाना आमसूत्रतन्तुनिबद्धां चालिनीं गृहीत्वा कूपोपकण्ठं प्राप्ताः क्रमेणैकैका सुन्दरी तथाविधविधिना तत् कार्यं कर्तुं प्रवृत्ता, परं तासां सर्वासां चालिनीबद्धाः सूत्रतन्तव एव कूपोपकण्ठे त्रुटितुं लग्नाः, तदा कूपमध्य-ज्जलाकर्षणं तु दूरमेव स्थितम्, एवं जनैर्विहस्यमानानां तासां स्त्रीणां कापि तत्कार्यकरणसमर्था नाभूत् । प्रान्ते तत्कार्यकरणसोद्यमा नृपराज्ञ्योऽपि [२८]निष्फलीभूतप्रयत्ना जाताः । तद् दृष्ट्वा नृपयुताः सर्वेऽपि लोकाः सचिन्ता अभवन् ।

इतः सा सुभद्रा निजश्वश्रूं प्रत्यवक्, हे मातः ! यदि भवतीभ्यो रोचेते, तदाहं पुरप्रतोलीकपाटोद्घाटनं करोमि । तत् श्रुत्वा राक्षसीव [२९]कोपाकुलहृदया सा जगाद, अरे ! दुष्टे ! भवत्याः सतीत्वं [३०]ह्यस्तनदिने एव मया च सर्वलोकैरपि ज्ञातमस्ति, तत्कलङ्केन नूनमसन्तुष्टेव साम्प्रतं किं राजादीनामपि निजदुराचरणं दर्शयितुं समीहसे ? निजोत्तरीयेण मुखमाच्छाद्य [३१]मुकीभूय गृहकोणे एव तिष्ठ, अथ विशेषत कुटुम्बं मा कलङ्कय, एवं तया निर्भत्सितापि सुभद्रा श्वश्रूं प्रति

सविनयं प्राह, हे मातः ! भवतीभिः पूज्याभिर्यत्किञ्चिज्जल्पयते, तत्प्रमाणं, मया चेत् प्रत्युत्तरो दीयते, तदा मम शोभा न भवेत्। ततो यदि भवतीभिरादेशो दीयते तदाहं भवत्याः प्रसादान्नूनं पुरप्रतोलीकपाटावनुद्घाटयिष्यामि । एवंविधां [३२]नम्रां विनयान्वितां च निजवधूवाचं निशम्याश्चर्यं प्राप्ता। किञ्चित् शान्ता च सा हृदये हसन्ती तिरस्कारपूर्वकं प्राह । अरे ! यद्येवं दुराचारपरापि निजात्मनि सतीत्वं मन्यमानासि, तर्हि द्रुतं पुरप्रतोलीकपाटानुद्घाटय, यथा ते शुद्धं सतीत्वं पश्यामः । एवं [३३]सहास्यव्यङ्ग्योक्त्यापि तस्या अनुमतिं समवाप्य सुभद्रया स पटहः स्पृष्टः-

ततः स्नातपरिहितनिर्मलवस्त्रा सुभद्रा कौतुकार्थिश्वश्रूप्रभृतिपौरनारीगणपरिवृता, सविस्मयं नृपादिपौरव्रजैश्च निरीक्ष्यमाणा कूपोपकण्ठं प्राप्ता । ततस्तया पञ्चपरमेष्ठिनमस्कारं स्मृत्वा, शासनदेवीं च हृदये ध्यात्वा, आमसूत्रतन्तुभिश्चालिनीं बद्ध्वा कूपे च निःक्षिप्य ततो जलमाकर्षितम् । तदा न च सूत्रतन्तवस्त्रुटिताः, न च चालिन्या बिन्दुमात्रमपि जलं गलितम्। राजादयः सर्वे लोकाश्चाश्चर्यशङ्कुना कीलिता इव [३४]स्तंभीभूता विस्फारितनयना विलोकमाना एव तत्र स्थिताः । तस्याः श्वश्रूरपि विलक्षीभूय [३५]श्यामानना तत्सर्वं विलोकयामास ।

ततो जलभृतां तां चालिनीं निजहस्ते धृत्वा नरनारीगणैः परिवृता, [३६]सुवासीनीभिर्गीयमानगुणा [३७]सा सुभद्रा पुरप्रतोलीं प्रति चचाल । तत्रागत्य स्मृतपञ्चनमस्कारासौ तच्चालिनीतोऽञ्जलिना जलमादाय यावत् प्रतोलीकपाटानाच्छोटयति, तावत्तूर्णमेव द्वावपि कपाटौ स्वयमेव ताटकृत्योद्घटितौ, प्रहृष्टैः पौरगणैश्च जयजयारावपूर्वकं तुण्डुलपुष्पादिभिः सा वर्धापिता । अथैवं तया महासत्या सुभद्रया प्रतोलीत्रयकपाटास्तथैव विधिनोद्घाटिताः, ततो गगनाङ्गणस्थितया शासनदेव्या प्रकटीभूय नृपादिपौरसमक्षं सुभद्रायै प्रोक्तम्, भो वत्से ! अथैवंविधा या काचित् सतीत्वगर्वमण्डिता ललना भविष्यति, सा चतुर्थीप्रतोलकपाटावुद्घाटयतु, परमद्यापि कयापि तौ कपाटावनुद्घाटितावेव तत्पुरे दृश्येते । ततस्तया शासनदेव्या लोकेभ्यः प्रोक्तम्, य कोऽप्यस्या सुभद्रायाः सत्या विरुद्धं

चिन्तयिष्यति करिष्यति वा, तस्य मया शिक्षा दास्यते । ततोऽवनीपतिप्रमुखः सर्वोऽपि जनो निजचेतसि चमत्कृतस्तस्याः सतीत्वं स्तुवन् जैनधर्मं स्वीचकार। श्वश्रूरप्युत्थाय तां निजवधूं क्षमयामास । सुभद्रा तु गर्वलेशमप्यदधाना श्वश्रूं नमति स्म । बुद्धदासादिसकलोऽपि कुटुम्बजनो बौद्धधर्मं परिहृत्य जैनधर्म-परायणो बभूव । कियत्कालमेवं सुखेन गार्हस्थ्यधर्मं परिपाल्य सा सुभद्रा सती गुरुपार्श्वे दीक्षां गृहीत्वा, क्रमेण तीव्रतपोऽग्निना[३८] निजकर्मेन्धनानि प्रज्वाल्य मुक्तिपुरं ययौ ।

॥ इति श्रीसुभद्राचरित्रं समाप्तम् ॥

**: अभ्यास :**

प्रश्नः १. सुभद्रां परिणेतुं बुद्धदासः किं कृतवान् ?

२. सुभद्राया धर्मकृत्यं दृष्ट्वा श्वश्रूस्तां किं कथयाञ्चकार ?

३. सुभद्रा दुराचारस्य कलङ्कं कया रीत्या प्राप्तवती ?

४. शासनदेवतया नगरोपरि कीदृशः उपसर्गः कृतः ?

५. शासनदेव्या कलङ्कः केन प्रकारेण दूरीकृतः ?

६. चतुर्थी प्रतोलीकपाटोद्घाटनविषये शासनदेव्या किं प्रोक्तम् ?

**१. अवशा वशा भवन्ति वशीभवन्ति । ( च्वि. स. ) વશ થાય છે ॥ २. गीर्वाण पुं.- દેવ ॥ ३. तत्त्वमालिनी इति नाम यस्याः सा तत्त्वमालिनीनाम्नी । ( ब. व्री. ) ४. लीनं मनः लीनमनः । ( वि. पू. क. ) एकं लीनमनः एकलीनमनः ( वि.पु.क. ) जैनधर्मे एकलीनमनः जैनधर्मैकलीनमनः । ( स.तत्पु. ) तेन जैनधर्मैकलीनमनसा । જૈન ધર્મમાં એક ચિત્તથી ॥ ५. बौद्धानाम् धर्मः बौद्धधर्मः । ( ष. तत्पु. ) तेन वासितम् बोद्धधर्मवासितम् । ( तृ. तत्पु. ) बौद्धधर्मवासितम् अन्तःकरणम् यस्य सः बौद्ध-धर्मवासितान्तकरणः । ( समा. बहु. ) બૌદ્ધ ધર્મથી વાસિત અન્તઃ કરણવાળો ॥ ६. क्रयाणक नपुं.-કરિયાણા ॥ ७. जैनधर्मं वेत्ति जैनधर्मविद् । ( उपपद ) तेन जैनधर्मविदा । જૈનધર્મના જાણકાર સાથે ॥ ८. श्राद्धस्य समाचारी श्राद्धसामाचारी स्त्री.-શ્રાવકના આચાર ॥ ९. अभ्येत्य अभि+आ+इ સંબ ભૂ. કૃ.-આવીને ॥ १०. परिवेषयतः वेष व.कृ. ष.ए.व.- પીરસતાં ॥ ११. आचम्ल नपुं.- આયંબિલ ॥ १२. स्वस्य वपुः स्ववपुः । ( ष. तत्पु. ) तस्य रूपम् स्ववपूरूपम् ।**

( ष. तत्पु. ) स्ववपूरूपन् एव लक्ष्मीः स्ववपूरूपलक्ष्मीः । ( अव. पू. क. ) तया निर्जितः मन्मथः येन सः स्ववपूरूपलक्ष्मीनिर्जितमन्यमथः । तम्-स्ववपूरूप-लक्ष्मीनिर्जितमन्थम् । ( व्यधि. बहु. ) પોતાના શરીરરૂપી લક્ષ્મીથી તિરસ્કાર કરાયો છે કામદેવ જેના વડે એવા તેને ॥ १३. यियासु वि. इच्छादर्शक नाम. જવાની ઇચ્છાવાળો ॥ १४. स्नानेन शुचीभूता स्नानशुचीभूता । ( तृ. तत्पु. ) સ્નાનથી પવિત્ર થયેલી ॥ १५. दुःखितम् हृदयम् यस्याः सा दुःखितहृदया । ( समा. बहु. ) દુઃખીત હૃદયવાળી ॥ १६. ईर्ष्यया अभिभूता इर्ष्याभिभूता । ( तृ. तत्पु. ) ઈર્ષ્યાથી પરિવરેલી ॥ १७. वि+गुप १ ग. पर.- વગોવવું ॥ १८. तृणस्य अपकर्षणम् तृणाप-कर्षणम् । ( ष. तत्पु. ) तस्मिन् पराङ्मुखः तृणापकर्षणपराङ्मुखः । ( स. तत्पु. ) તણખલાને દૂર કરવામાં પણ નિઃસ્પૃહ ॥ १९. यतना स्त्री. ઉપયોગ ॥ २०. आर्द्रं च तत् कुङ्कमं च आर्द्रकुङ्कम् । ( वि. पू. क. ) तस्य तिलकम् आर्द्रकुङ्लमतिलकम् । ( ष. तत्पु. ) ભીનું કુંકુંમનું તિલક ॥ २१. स्वैरिणी स्त्री. - સ્વેચ્છાચારારિણી ॥ २२. अविलक्षः विलक्षः इव भूतः विलक्षीभूतः ( च्वि. स. ) વિલક્ષ થયેલો ॥ २३. निश्चलं मानसं यस्याः सा निश्चलमानसा । ( समा. बहु. ) ॥ २४. विगोपन नपुं.- નિંદા ॥ २५. गगनस्य आङ्गणम् गगनाङ्गणम् । ( ष. तत्पु. ) तस्मिन् तिष्ठति गगनाङ्गणस्था । ( उपपद. ) આકાશમાં રહેલી ॥ २६. प्रतोली स्त्री. - દ્વાર ॥ २७. आमानि च तानि सूत्राणि च आमसूत्राणि वि. पू. क. ) तेषां तन्तवः आमसूत्रतन्तवः । ( षय तत्पु. ) तैः निबद्धा आमसूत्रतन्तुनिबद्धा ॥ ( तृ. तत्पु. ) तया-आमसूत्रतन्तुनिबद्धया । કાચા સૂતરના તંતુઓથી બંધાયેલી વડે ॥ २८. अनिष्फलः निष्फल इव भूतः निष्फलीभूतः ( च्वि. स. ) निष्फलीभूतः प्रयत्नः यासाम् ताः निष्फलीभूतप्रयत्ः । ( समा. बहु. ) નિષ્ફલ થયેલા પ્રયત્નવાળી ॥ २९. कोपेन आकुलम् कोपाकुलम् । ( तृ. तत्पु. ) कोपाकुलं हृदयं यस्याः सा कोपाकुलहृदया । ( समा. बहु. ) કોપથી વ્યાપ્ત હૃદયવાળી ॥ ३०. ह्यस्तन वि. ગયેલ ॥ ३१. अमुका मूका इव भूत्वा मूकीभूय । ( च्वि. स. ) મૂંગી થઈને ॥ ३२. नमति इत्येवंशीला नम्रा । स्त्री.-નમનના સ્વભાવવાળી ॥ ३३. व्यङ्ग्य वि.-કટાક્ષ ॥ ३४. अस्तम्भाः स्तम्भाः इव भूताः स्तम्भीताः ( च्वि. समा. ) સ્થંભ જેવા થયેલા ॥ ३५. श्यामम् आननम् यस्याः सा श्यामानना । ( समा. बहु. ) શ્યામ મુખવાળી ॥ ३६. सुवासिनी स्त्री. સોહાગણ સ્ત્રી ॥ ३७. गीयमानाः गुणाः यस्याः सा गीयमानगुणा ( समा. बहु. ) ગવાતા ગુણોવાળી ॥ ३८. तीव्रं च तत् तपश्च तीव्रतपः । ( वि. पू. क. ) तीव्रतपः एव अग्निः तीव्रतपोऽग्निः । ( अव. पू. क. ) तेन तीव्रतपोऽग्निना । તીવ્ર તપરૂપી અગ્નિવડે ॥

## [ १६ ]

## ॥ श्रीचेल्लणामहासतीचरित्रम् ॥

**पालयन् रुचिरं शीलम्, शुद्धभावेन देहमान् ।**
**चेल्लणेव समाप्नोति, [१]कल्याणकमलां किल ॥१॥**

तथाहि-विशालायां नगर्यां [२]चेटीकृतानेकारातिश्चेटकाभिधो जैनधर्म-धुरन्धरो राजा राज्यं करोति स्म । स च न्यायपुरस्सरं निजराज्यं पालयन् सकलां निजप्रजां सर्वदा प्रीणयामास । तस्य राज्ञः पृथक् पृथक् [३]राज्ञीकुक्षिसमुद्भवाः शुभस्वप्नैश्च सूचिताः सप्त कन्या अभवन् । क्रमात्तासु प्रभावत्यभिधाना प्रथमा पुत्री वीतभयनगरस्वामिन उदायनाख्यभूपतेर्दत्ता १. द्वितीया पद्मावत्यभिधा पुत्री चम्पाधीशस्य दधिवाहनाख्यस्य भूपतेर्दत्ता २. तृतीया मृगावती कौशाम्बी-नाथस्य शतानीकाख्यस्य नृपत्तेर्दत्ता ३. चतुर्थी शिवाख्या तनया उज्जैयिनी-स्वामिनः प्रद्योतनाख्य भूपतेर्दत्ता ४. पञ्चमी ज्येष्ठाख्या पुत्री कुण्डग्रामाधिपस्य श्रीवीरप्रभुज्येष्ठभ्रातुर्नन्दिवर्धनस्य दत्ता ५. षष्ठी सुज्येष्ठा, सप्तमी च चेल्लणा-ऽद्यापि कुमारिके एव राजभुवने तिष्ठतः स्म । ते द्वे अपि कन्ये रतिप्रीतितुल्ये अतुल्यरुपश्रियं[४] धारयन्त्यौ धर्मकार्यकुशले बभूवतुः । सकलकला-कलाप-कुशले[५] ते द्वे अपि मिथः परमप्रीतियुते साक्षात् मूर्तिद्वयरूपे सरस्व-त्याविव रेजतुः अथान्येद्युस्ताभ्यां सुज्येष्ठाचेल्लणाभ्यामलङ्कृते शुद्धान्तः पुरे कापि स्थविरा मिथ्यात्विनी तापसी समागता । सा च तयोरग्रे शिवधर्मोपदेशं दातुं लग्ना, तया च तस्य शिवधर्मस्य महती प्रशंसा कृता । परं जैनधर्मदृढहृदया[६] सुज्येष्ठा तयोक्तम् शिवधर्मं तिरस्कारयामास । यथा-

**कूपे स्यादधमं स्नानम्, वापीस्नानं च मध्यमम् ।**
**तडागे वर्जयेत् स्नानम्, नद्यां स्नानं न शोभनम् ॥१॥**

**गृहे चैवोत्तमं स्नानम्, नदीस्नानं तु मध्ययम् ।**
**कूपे चाप्यधमं स्नानम्, तडागे नैव कारयेत् ॥२॥**

इत्याद्युक्त्वा तया सुज्येष्ठया जिनधर्मे स्थापिते सति क्रुद्धा सा तापसी उल्लण्ठतया यथातथा जल्पितुं लग्ना, जिनधर्मस्य च निन्दां कर्तुं प्रवृत्ता । तदा कोपातुराभ्यां ताभ्यां सा तापसी [७]निजचेटिकापार्श्वादर्धचन्द्रप्रदानेन गले गृहीत्वा निजान्तःपुराद्बहिर्निष्कासिता । ततः फालच्युता व्याघ्रीवातीवकोपातुरा सा तापसी [८]एवमलब्धसन्माना प्राप्तपराभवा च दध्यौ, नूनं सा सुज्येष्ठा निजवैदुष्यगर्विता[९] विद्यते, अथ तामहं केनाप्युपायेन सपत्नी सम्भवे भूरिदुःखे पातयामि, इति ध्यात्वा परमं द्वेषं प्राप्ता सा तापसी तस्याः सुज्येष्ठाया सविशेषं स्वरूपं केनापि कुशलेन चित्रकारेण पट्टे समालेखयामास । ततः सा तं चित्रपट्टं समादाय राजगृहे नगरे समायाता । केनाप्युपायेनासौ तापसी तत्र श्रेणिकनृपं मिलित्वा तं चित्रपट्टं दर्शयामास ।

अथ तत्र चित्रपट्टे समालेखितं तस्याः सुज्येष्ठाया मनोहरं स्वरूपं दृष्ट्वा स श्रेणिकनृपो दध्यौ, किमेषा सुराङ्गना ? किं वा कापि पातालकन्या वर्तते ? इत्यादि विचिन्त्य कामविह्वलः स नृपस्तां तापसीमपृच्छत्, भो तापसि ! अत्र चित्रपट्टे या सुन्दरी त्वया चित्रितास्ति सा किं क्वापि विद्यमानास्ति ? वा त्वया किं कृत्रिममेव स्वरूपं स्वचित्रकलाप्रदर्शनायालेखितमस्ति ? तत् श्रुत्वा तापस्या प्रोक्तं, हे राजन् ! इयमालेखिता सुन्दरी विद्यमानैव मयालेखितास्ति, न चेदं कृत्रिमस्वरूपं वर्तते तत् श्रुत्वा राज्ञा तस्यै पुनः पृष्टम् । तदैषा कस्य पुत्री विद्यते ? तथैव सा किं परिणीता वा कुमारी विद्यते ? तापसी प्राह, राजन् ! वैशालीनगराधीशस्य चेटकाख्यभूपस्येयं सुज्येष्ठाख्या तनया वर्तते, तस्या एव चेदं स्वरूपं मया चित्रितमस्ति । किञ्चेयमद्यापि कुमार्येव वर्तते, नूनं त्वमेव च तामुद्वोढुमर्हसि ।[१०] तत् श्रुत्वा हृष्टोऽसौ श्रेणिकनृपस्तां तापसीं दानेन सन्तोष्य विससर्ज ।

अथ तच्चित्रदर्शनतोऽत्यन्तं [११]मन्मथविह्वलीभूतस्तां सुज्येष्ठामुद्वोढु-कामो नृपः शून्यचित्त इवाजनि । ततोऽसौ चेटकनृपपार्श्वे चतुरमेकं दूतं प्रेष्य ताम् सुज्येष्ठां मार्गयामास परं स चेटकनृपो दुतं जगाद, भो दूत ! अहं मदीयां पुत्रीं सुज्येष्ठां श्रेणिकनृपाय दातुं नेच्छामि । तदा स दूतोऽपि पश्चादागत्य चेटकोक्तं वचनं श्रेणिकभूपाय निवेदयामास । तदाकर्ण्यासौ भृशं खिन्नोऽभूत् ।

अथैवं म्लानमुखं निजजनकं विलोक्येङ्गिताकारेण[१२] च तस्य मनोगतं

भावं विज्ञाभयकुमारो विहिताञ्जलिरवदत् । भो तात ! त्वं खेदं मा कुरु, अहं केनाप्युपायेन भवतां समीहितं साधयिष्यामि । एवं वैनयिक्या बुद्ध्या निजतातं सन्तोष्याभयकुमारो निजगृहे समायातः ।

[१३]निजतातमनोरथपूरणाय चैकं चित्रकलाकुशलं चित्रकारं समाह्वयत्, तं च निजजनकस्य श्रेणिकनृपस्य मनोहरं स्वरूपं चित्रपट्टे चित्रयितुमादिशत्, तदाज्ञानुसारेण स चित्रकारोऽपि स्तोकैरेव दिनैरतीवसुन्दरं श्रेणिकनृपस्वरूपं चित्रपट्टे चित्रयित्वाऽभयकुमाराय समर्पयत् । तन्मनोहरं चित्रितस्वरूपं विलोक्य सन्तुष्टोऽभयकुमारस्तस्मै चित्रकाराय सन्मानपुरस्सरं भूरि द्रव्यं ददौ । अथ स्वकीयवेषपरावर्तनं विधाय वणिग्वेषं च कृत्वा स वैशालीनगर्यां समायातः, तत्र च स भूपान्तःपुरनिकटे भाटकेनैकमापणं[१४] जग्राह । आपणे च विविधसुगन्धि-द्रव्याणि, मनोहरदर्पणान्, सुगन्धितैलानि, [१५]मनोहरचीवरादीनि [१६]महिलागण-हृदयाकर्षणाय स्थापयामास । अथ तत्र क्रयार्थमागतानामन्तःपुरचेटीनां स्वल्पेनैव मूल्येन भूरि सुगन्धिदिव्यतैलादीनि सोऽर्पयामास । तेन सर्वा अप्यन्तःपुरदास्यस्तस्यैवापणात्तानि वस्तूनि जगृहुः । ततः कियद्दिनानन्तरं सोऽभयकुमारः पटे चित्रितं तत्श्रेणिकनृपस्वरूपं निजापणद्वाराग्रे प्रलम्बितं स्थापयामास । इतो वस्तुक्रयार्थं तत्र समागता सुज्येष्ठाया दासी प्रलम्बितं तं मनोहरं चित्रपटं दृष्ट्वा प्राप्तकौतुकाऽभयकुमारं पप्रच्छ, वणिगुत्तम ! कस्येदं मनोहरं स्वरूपं विद्यते ? अभयेनोक्तम्, इदं हि मदीयस्वामिनः श्रेणिकभूपस्य, स्वरूपमालेखितं वर्तते ।

ततो गृहीतसुगन्धिद्रव्यजाता सा दासी सुज्येष्ठायाः समीपे समेत्य[१७] तच्चित्रस्वरूपवार्तामकथयत् । तदा कौतुकोत्ताला[१८] सा सुज्येष्ठापि तच्चित्र-पट्टदर्शनातुरा दासीं प्राह । भो दासि ! विलोकनार्थं तच्चित्रपटं द्रुतं तस्य वणिजः पार्श्वात्त्वं समानय, एवं तयादिष्टा सा दास्यपि द्रुतमभयकुमारपार्श्वे समागत्य निजस्वामिन्या विलोकनार्थं तं चित्रपट्टं मार्गयामास । निजप्रयत्नस्य भावि-साफल्यं मन्यमानोऽभयकुमारोऽपि तस्यै तं चित्रपटमर्पयामास ।

अथ दास्यानीतं चित्रपटं विलोक्य प्रेमैकपरायणा[१९] सुज्येष्ठा व्यचिन्तयत्,

नूनमयं श्रेणिको नृपो विधात्रा कस्मिंश्चिन्निवृतिदिने एव घटितः सम्भाव्यते । एवंविधं [२०]रूपलावण्यादिगुणगणोपेतं स्वरूपं मया कस्यापि पुरुषस्य विलोकितं नास्ति । अथाहं केनाप्युपायेनैनमेव श्रेणिकभूपं परिणेष्यामि । इति ध्यात्वा तया तस्यै दास्यै प्रोक्तम्, भो दासि ! त्वयि मम सम्पूर्णो विश्वासो वर्त्तते, अतस्त्वया मदीयोऽभिलाषः कस्याप्यन्यस्याग्रे न वक्तव्यः, अथ त्वमेनं चित्रपटं तस्मै वणिजे पश्चात्समर्प्य कथयस्व, अथ मम स्वामिनी सुज्येष्ठा श्रेणिकभूपं परिणेतुमिच्छति । अतस्त्वं केनाप्युपायेन तस्या मनोरथं सफलीकुरु ।

एवं सुज्येष्ठादिष्टा सा दासी द्रुतमभयकुमारपार्श्वे समागत्य तं चित्रपटं च तस्मै पश्चात् समर्प्य निजस्वामिनीमनोरथं रहसि कथयामास । तत् श्रुत्वा प्रसन्नवदनेनाभयकुमारेण प्रोक्तम्, भो दासि ! नूनमहं तव स्वामिन्या मनोरथमवसरे पूरयिष्यामि । दास्यापि तदुक्तं निजस्वामिन्यै सुज्येष्ठायै ज्ञापितम् । तत् श्रुत्वा हृष्टा सुज्येष्ठापि तमवसरं विलोकमाना स्थिता । ततोऽभयकुमारेण प्रच्छन्नं तदीयान्तः-पुरावधि पृथ्व्यन्तरेका सुरङ्गा[२१] कारिता, निजजनकाय श्रेणिकाय च ज्ञापितम्, त्वया इतस्तृतीयेऽह्नि प्रच्छन्नमस्यां सुरङ्गायामागन्तव्यम् । तत्रागता सुज्येष्ठा च त्वां परिणेष्यति । ततस्तेन दास्यै प्रोक्तम्, त्वदीया स्वामिनी इतस्तृतीये दिनेऽस्यां सुरङ्गायामागच्छतु, तत्र स्वयमागतः श्रेणिकभूपस्त्वां निजनगरे नेष्यति, अथ परमानन्दं प्राप्तः स श्रेणिकनृपो निजाङ्गरक्षकैर्द्वात्रिंशद्भिः सुलसायाः सुतैर्युतो रथारूढो निश्चितदिने सुरङ्गायां समायातः ।

अथ गमनोत्सुकां चलचित्तां च सुज्येष्ठां विज्ञाय चेल्लणा तामपृच्छत्, भो भगिनि ! अद्य त्वं कथं चलचित्ता विलोक्यसे ? कुत्र गमनोत्सुका जातासि ? तत् श्रुत्वा सुज्येष्ठयाऽलीकं[२२] जल्पितम्, अहं तु कुत्रापि गमनोत्सुका नास्मि, परं [२३]तदीयहृदयभावज्ञानविदग्धा चेल्लणा पुनरपि जगौ, भो भगिनि ! त्वं सत्यं कथयस्व, अद्य यावन्मया त्वत्तः किमपि [२४]गूढं रक्षितं नास्ति, त्वं चैवं मत्तः प्रच्छन्नं किं रक्षसि ? एवं [२५]सनिर्बंधतया पृष्टा सुज्येष्ठा तस्यै निजहृदयाभिलाषं जगौ, तत् श्रुत्वा चेल्लणावदत्, अरे भगिनि ! अहं त्वां विना क्षणमपि स्थातुं समर्था नास्मि । अतोऽहमपि त्वया [२६]त्वत्सार्धमेव रथे

समारोपणीया। इत्युक्त्वा सापि सुज्येष्ठया सममेव सुरङ्गायां प्रविष्टा, श्रेणिकस्य रथे च समारूढा। इतः सुज्येष्ठा चेल्लणामवदत्, मया मदीया रत्नकरण्डिका विस्मृता। अतस्तां समादायाधुनैवाहं पुनरागच्छामि, इत्युक्त्वा सा रत्न-करण्डिकामादातुं पुनरन्तःपुरमध्ये गता।

इतस्तां चेल्लणां रथाधिरूढां सुज्येष्ठामेव मन्यमानैस्तैः सुभटैः श्रेणिकाय प्रोक्तम्। हे स्वामिन्! अत्र वैरिगृहे चिरं स्थातुं न युक्तम्, ततो रथं द्रुतं पश्चाद्वाहय तत् श्रुत्वा [२७]रथस्थचेल्लणायुतः श्रेणिकभूपो द्रुतं रथाश्वान् निजपुरं प्रति घोरान्धकारया सुरङ्गया वाहयामास, इतो रत्नकरण्डिकां समादाय तत्रागता सुज्येष्ठा श्रेणिकरथमप्रेक्ष्य [२८]व्याकुलीभूता, म्लानमुखा, स्वभगिनीवियोगपीडिता च प्रोच्चैस्तरं गाढं पूत्कारं कर्तुं लग्ना। एवं सुज्येष्ठाया रुदनस्वरं श्रुत्वा तत्रागतश्चेटकभूपश्चेलणाया हरणं विज्ञाय स्वयं [२९]सन्नह्य वैरीपृष्टे गन्तुं सुरङ्गायाः पार्श्वे समायातः। इतस्तस्य सैन्याधिपो वैरङ्गिकाभिधो महासुभटस्तत्रागत्य चेटकं प्रत्यवदत्, हे स्वामिन्! अहमेव तस्य वैरिणः पृष्टे गत्वा च अधुनैव तां चेल्लणां पश्चादानेष्यामि, इत्युक्त्वा स रथस्थो भूरिवेगेन श्रेणिकपृष्टे सुरङ्गायां चचाल। ततः सुरङ्गायामेव युद्धं कुर्वता तेन श्रेणिकाङ्गरक्षकाः सुलसाया द्वात्रिंशत्पुत्रा हताः।

इतः श्रेणिकनृपोऽप्यतिवेगेनाश्वौ प्रेरयन् सुरङ्गाया बहिर्निःसृत्य राजगृहं प्रत्यचालीत्। वैरङ्गिकश्च [३०]निष्फलीभूतो म्लानास्यः पश्चात्समायातः। अथ चेल्लणावियोगात् खिन्ना सुज्येष्ठा स्वमनोरथं चालभमाना विषयेभ्यो विरक्ता पितरमापृच्छ्य चन्दनार्यायाः समीपे प्रव्रज्यामुपाददे।

अथ मार्गे सुज्येष्ठाया अभिधानेनाह्वयन्तं श्रेणिकं प्रति चेल्लणावदत्, स्वामिन्! सुज्येष्ठा तु न समायाता, तत्कनिष्ठा भगिनी चेल्लणाभिधानाहं समागतास्मि। तत् श्रुत्वा श्रेणिको व्याजहार, तर्हि मुधैव मम प्रयासोऽभूत्। तदा चेल्लणा जगौ, स्वामिन्! अहमपि तस्या एव कनिष्ठा भगिनी तव वल्लभा जातास्मि। तत् श्रुत्वा श्रेणिकोऽपि तस्याश्चेल्लणाया लाभादपि स्वं कृतार्थं मन्यमानः परमानन्दं प्राप्तः क्रमेण राजगृहे नगरे समायातः, सर्वेषामपि सुलसापुत्राणां च मरणं निशम्य स युगपदेव हर्षविषादाभ्यामालिङ्गितः। ततः

श्रेणिकभूपो महोत्सवेन तां चेल्लणां पर्यणैषीत् ।[३१] अथ निजपुत्राणां मरणं निशम्य सुलसातीव विलापं चकार । परमभयकुमारस्तामनित्यभावनाभिः कोमलवचनामृतैराश्वासयामास । अथ चेल्लणाया विनयादिगुणैरतीवसन्तुष्टः श्रेणिको नृपस्तस्याः कृते [३२]एकस्तम्भमावासं कारयितुं निजपुत्रमभयकुमारं समादिदेश । ततोऽभयाराधितः सुरस्तथैवैकस्तम्भमावासं सर्वर्तुफल-वाटिकायुतं[३३] चकार । अथ तस्मिन्नावासे वसन्ती चेल्लणाराज्ञी एकाग्रचित्ता जिनपूजां कुर्वती धर्मध्यानं करोति स्म । क्रमेण सा चेल्लणा राज्ञी शीलपालन-विषये तथा दृढचित्ताभूत्, यथा जिनाधीश श्रीवीरप्रभुः सुलसाया इव तस्या अपि श्लाघां करोति स्म ।

अथैकदा श्रीमहावीरः प्रभुस्तत्र राजगृहे नगरे उद्याने समवसृतः । श्रेणिकश्च चेल्लणादिपरिवारयुतो जिनवन्दनार्थमुद्याने चचाल । इतो मार्गे कमपि जिनकल्पिसाधुं कायोत्सर्गस्थं चेल्लणायुतः श्रेणिकोऽवन्दत । अथ समवसरणस्थं प्रभुं वन्दित्वा श्रेणिकनृपः परिवारयुतः प्रभोर्धर्मदेशनां शुश्राव । ततो निजस्थाने समेत्य सन्ध्याकार्यं समाप्य नृपतिर्निशायां सुप्तः । इतो निद्राधीना चेल्लणा स्वप्नावस्थायां गतदिने मार्गे कायोत्सर्गस्थं तं साधुं संस्मृत्य मुखतो जगाद, अहो ! अस्मिन् [३४]कराले शीतकाले तस्य काऽवस्था भविष्यतीति । इति श्रुत्वा रुष्टो नृपः प्रातः समवसरणे समागत्य श्रीवीरप्रभुमपृच्छत्, भगवन् ! मम प्रिया सा चेल्लणा किं सती वा असती वर्तते ? भगवानुवाय, भो श्रेणिक ! सा त्वदीया चेल्लणा राज्ञी महासती वर्तते, एवं सर्वा अपि तव पत्न्यः सत्य एव सन्ति तव चेतसि च तस्या वचनतो यः सन्देहः समुत्पन्नस्तत्समाधानं शृणु, ह्यस्तने दिनेऽत्र समागच्छता त्वया तया चेल्लणया राज्ञ्या सह कायोत्सर्गस्थो यो मुनिर्वन्दितस्तमेव मुनिं संस्मृत्य तया केवलं कृपयैव स्वप्नावस्थायां जल्पितम्, अहो ! अस्मिन् कराले शीतकाले तस्य निष्प्रावरणस्य[३५] मुनेः काऽवस्था भविष्यतीति । परं तस्या मनसि कोऽपि दुश्चिन्तनीयो विकारो नास्ति, एवं गतसंशयः [३६]श्रेणिकभूपालो निजावासे समेत्य तां चेल्लणामधिकं सन्मानया-मास । एवं श्रीवीरोक्तं धर्मं चिरमाराध्य सा महासती चेलणा कियता कालेन श्रीवीरप्रभुपार्श्वे दीक्षां गृहीत्वा क्रमेण दुस्तपं तपस्तप्त्वा केवलज्ञानमासाद्य

[३७]प्रक्षीणनिखिलकर्मा मुक्तिं गता। सा सुज्येष्ठा साध्वयपि शुद्धं चारित्रमाराध्य केवलज्ञानयुता मुक्तिं गता।

॥ इति श्रीचेल्लणामहासतीचरित्रं समाप्तम् ॥

: अभ्यास :

१. तापस्या कुत्र गत्वा, कः उपदेशः दत्तः ?
२. श्रेणिक नृपः केन कारणेन सुज्येष्ठा प्रति अनुरागवा अभवत् ?
३. सुज्येष्ठा ग्रहणाय अभयकुमारेण किं कृतम् ?
४. सुज्येष्टाया स्थाने श्रेणिकने सह का आगता ?
५. चेटकराजा सह युद्धे जाते श्रेणिकस्य के योद्धाः मृताः?
६. स्वप्नावस्थायां चेल्लणा किं अवदत्त ?
७. श्रेणिकराजा श्रीवीरप्रभुम् किं अपृच्छत् ?
८. भगवता किं उत्तरं दत्तम् ?

१. कल्याणं एव कमला कल्याणकमला (અવ.ક.) ताम् कल्याणकमलाम् કલ્યાણ રૂપી લક્ષ્મીને ॥ २. अनेके चामी अरातयश्च अनेकारातयः ( विशे. पूर्व. कर्म. ) अचेट्यः चेट्यः इव कृता चेटीकृता ( च्विसमास. ) चेटीकृताः अनेकारातयः येन सः चेटीकृतानेकारातिः અનેક શત્રુઓને દાસ બનાવનાર ॥ ३. राज्ञ्याः कुक्षिः राज्ञीकुक्षिः ( ष. त. ) तस्याः समुद्भवाः राज्ञीकुक्षिसमुद्भवाः ( स.त. ) રાણીની કુક્ષિથી ઉત્પન્ન થયેલી ॥ ४. न तुल्या अतुल्या । ( नञ्. त. ) रूपम् एव श्रीः रूपश्रीः । ( अवधारण ) अतुल्या चासौरूपश्रीश्च ( वि.पू.क. ) अतुल्यरूपश्रीः । ताम् અનુપમ રૂપલક્ષ્મીને ॥ ५. कलाश्च कलापाश्च कलाकलापाः ( इ.उ.न्द्व. ) सकलाश्चामी कलाकलापाश्च सकलकला-कलापाः । वि. पू. क. ) सकलकला-कलापेषु कुशले सकलकलाकलापकुशले ( सप्त. त. ) સમગ્રકળાભાં કુશળ ॥ ६. जैनश्चासौ धर्मश्च जैनधर्मः । ( वि. पू. क. ) दृढं च तद्हृदयञ्च दृढहृदयं ( वि.पू.क. ) जैनधर्मे दृढहृदयं यस्याः सा जैनधर्मदृढह्यदया । ( व्यधि. बहु. ) જૈન ધર્મમાં દૃઢ હૃદયવાળી ॥ ७. निजस्य चेटिका-निज चेटिका । ( ष. त. ) तस्याः पार्श्वः निजचेटिकापार्श्वः ( ष. त. ) तस्मात्ः ॥ ८. अलब्धं सन्मानं यया सा अलब्धसन्माना ( नञ् बहुव्रीहि ) ९. वैदुष्य नपुं.-विद्वानपणुं विदुषः भावः वैदुष्यम् । ( तद्धित ) निजस्य वैदुष्यम्-निजवैदुष्यम् । ( ष. त. ) तेन गर्वितानिजवैर्दुष्यगर्विता । ( तृ. त. ) પોતાની વિદ્વતાથી ગર્વિત થયેલી ॥ १०. उद्+वह-(હે.કૃ.) પરણવા માટે ॥

११. अविह्वल विह्वलः इव भूतः विह्वलीभूतः ( च्वि. ) मन्मथेन विह्वलीभूतः मन्मथविह्वलीभूतः ( तृ. त. ) १२. इङ्गिताकार-पुं.- હૃદયના અભિપ્રાયને જણાવનારી ચેષ્ટા ।। १३. निजस्य तातः-निजतातः ( ष.त. ) तस्य मनोरथाः-निजतातमनोरथाः । ( ष.त. ) निजतातमनोरथनाम् पूरणम् निजतातमनोरथपूरणम् ( ष. त. ) तस्मै પોતાના પિતાના મનોરથોને પૂરવા માટે ।। १४. आपण नपुं.દુકાન ।। १५. चीवर ( नपुं. ) વસ્ત્ર । १६. महिलानां गणः महिलागणः । ( ष.त. ) तेतस्यम् हृदयानि-महिलागणहृदयानि । ( ष. त. ) तेषाम् आकर्षणम्-महिलागणहृदयाकर्षणम् । ( ष. त. ) तस्मै महिलागणहृदयाकर्षणाय મહિલાગણના હૃદયના આકર્ષણ માટે ।। १७. सम्+आ+इ सं.बं. भू. कृ. આવીને ।। १८. कौतुकेन उत्ताला कौतुकोत्ताला (तृ. તત્પુરુષ.) उत्ताल (विशे.) વિહ્વળ ।। १९. प्रेम्नि एकपरायणा [स. त.] प्रेमैकपरायणा । પ્રેમમાં પરાયણ એવી. २०. रूपं च लावण्यं च रूपलावण्ये ( द्वन्द्व ) रूपलावण्ये आदौ येषान्ते रूपलावण्यादयः [ब. वि.] रूपलावण्यादयश्चामी गुणाश्च रूप. लावण्यादिगुण-गणोपेतम् । ( त. तत्पु. ) રૂપલાવણ્યાદિ ગુણોના સમૂહથી યુક્ત २१. सुरङ्गा स्त्री. ભૂગર્ભમાર્ગ. २२. अलीक નપું. જૂઠું. २३. तस्याः इदम् तदीयम् (તદ્ધિત) तदीयम् च तद् हृदयम्-तदीयहृदयम् (ક.ધા.) तस्य भावः (ષ.ત.) तदीयहृदयभावः तस्य ज्ञानम् (ષ.ત.) तदीयहृदयभावज्ञानम् तस्मिन् विदग्धा (સ. ત.) તેના હૃદયના ભાવને જાણવામાં હોશિયાર. २४. गूढ-विशे. રહસ્ય. २५. निर्बंध (ક્રિયા વિશેષણ) આગ્રહપૂર્વક २६. त्वया सार्धम् त्वत्सार्धम् (ત.ત.) २७. रथे तिष्ठति रथस्था ( उपपद ) रथस्था चासौ चेल्लणा च ( वि. पू.क. ) रथस्थचेल्लणा तया युतः । ( तृ. त. ) रथस्थचेल्लणायुतः । રથમાં રહેલી ચેલ્લણાથી યુક્ત ।। २८. अव्याकुला व्याकुला इव भूता व्याकुलीभूता । ( च्वि. ) વ્યાકુળ થયેલી ।। २९. सन्नह्य ( सम् + नह् ) સં.ભુ.કૃ.તૈયાર થઈને (યુદ્ધ માટે) ।। ३०. अनिष्फलः निष्फलः इव भूतः निष्फलीभूतः । ( च्वि. ) નિષ્ફળ થયેલો ।। ३१. परि + नी (અધ.ત્રીજો પુ. એ.વ.) પરણ્યો ।। ३२. एकः स्तम्भः यस्मिन् स एकस्तम्भः तम् ( समा.बहु. ) ।। ३३. सर्वे च ते ऋतवश्चसर्वर्तवः ( वि. पू. क. ) तेषां फलानि सर्वर्तुफलानि ( ष. तत्पु. ) तेषां वाटिका सर्वर्तुफलवाटिका ( ष. तत्पु. ) तया युतः सर्वर्तुफलवाटिकायुतः ( तृ. तत्पु. ) तम् સર્વઋતુનાં ફળોની વાડીથી યુક્ત ।। ३४. कराल-पुं.-કાતિલ ।। ३५. निर्गतं प्रावरणं यस्य सः निष्प्रावरणः तस्य ( प्रादि बहु. ) કપડાં વિનાના ।। ३६. गतः संशयः यस्य सः-गतसंशयः ( बहु. ) દૂર થયેલા સંશયવાળો ।। ३७. प्रकर्षेण क्षीणम्-प्रक्षीणम् । ( प्रादि । तत्पु. ) निखिलञ्च तद् कर्म च-निखिलकर्म ( वि.पू. क. ) प्रक्षीणं निखिलकर्म यस्याः सा प्रक्षीणनिखिलकर्मा समा. बहु. પ્રકૃષ્ટ રીતે ક્ષય થઈ ગયા છે સમસ્ત કર્મ જેના એવી તે ।।

# [ १७ ]

## ॥ श्रीसत्यभामाचरित्रम् ॥

**शीलादिरुचिरं धर्मम्, कुर्वाणो मानवोऽनिशम् ।**
**सत्यभामेव लभते, साधुवादं पदे पदे ॥१॥**

द्वारावत्यां नगर्यां श्रीकृष्णो वासुदेवो राज्यं करोति स्म । अथान्यदा-कलिकुतूहलो [१]नारदर्षिः कृष्णसभायां समायातः । एवं नारदं समागतं दृष्ट्वा हरिः [२]कतिचित्पदानि तत्सन्मुखं गत्वा तं वन्दते स्म । ततो हरिणा तस्य भूरि सत्कारः कृतः, यतः स नारदर्षिस्तस्यास्खलितब्रह्मचर्यव्रतेन जगति सर्वत्रापि सर्वराजसभासु पूज्यते । एवं क्षणवारं कृष्णसभायां स्थित्वा स कुतूहलतस्त-स्यान्तःपुरे ययौ । तस्मिन् समये हरेः पट्टराज्ञी सत्यभामा दर्पणमध्ये निजमुखं विलोकयन्ती स्थितासीत् । तत्रागतं नारदर्षि विलोक्यापि तं विरतिरहितं मन्यमाना सत्यभामा नमस्कारेणापि तस्यादरं नाकरोत्, एवं स्वकीयावज्ञां विज्ञाय मनसि क्रुद्धो नारदो व्यचिन्तयत्, अहो ! देवाधीश्वरस्य पट्टदेव्योऽपि कदापि मदीयावज्ञां न कुर्वन्ति, परमियं सत्यभामा कृष्णस्य पट्टराज्ञीत्वेनाभिमानपर्वतारूढास्ति ।

**यतः[३]-अहंकारे सति प्रौढे, वदत्येवं गुणावली ॐ ।**
**अहंकारे पतिष्यामि समायाता त्वदंतिकम् ॥१॥**

इति चिन्तयन् स नारदर्षिः क्रोधेन तां सत्यभामां गर्विष्ठां मन्यमानः सपत्नीदुःखे ह्येनां पातयामीति धिया द्रुतं ततो निःसृत्य गगनमार्गेण कुण्डिनाभिधं पुरं ययौ । तत्र कुण्डिनपुरे रुक्मिनामा राजा राज्यं करोति स्म । स नारदोऽपि तस्य राजसभायां प्राप्तः । तदा रुक्मिनृपेण समुत्थाय भूरिसन्मान-पूर्वकं स सत्कृतः । क्षणं तत्र स्थित्वा स तस्यान्तःपुरे जगाम । तत्र रुक्मि-नृपस्वस्रा[४] कुमारिकया रुक्मिण्यापि बह्वादरेण स पूजितः, तदा सन्तुष्टोऽसौ नारदस्तस्याः-पुरः श्रीकृष्णस्य सद्गुणान् वर्णयामास । एवं कृष्णगुणान् श्रुत्वा

सा रुक्मिणी कुमारिका कृष्णं प्रत्यनुरागं धारयन्ती तमेव परिणेतुं निश्चयमकरोत्, ततो रुक्मिण्या सत्कृतस्तस्या रूपं चित्रपट्टे समालिख्य नारदस्ततो निःसृत्य द्वारावत्यां कृष्णपार्श्वे समागत्य तच्चित्रपट्टं तस्मै दर्शयामास । तच्चित्रं दृष्ट्वा मदनबाणविद्धस्य[५] कृष्णस्य मनसि तस्यामनुरागोऽभूत् । यतः-

**तावन्महत्त्वं पाण्डित्यम्, कुलीनत्वं विवेकिता ।**
**यावज्जायते नाङ्गेषु, हन्त पञ्चेषुपावकः ॥१॥**

**शम्भुस्वयंभुहरयो[६] हरिणेक्षणानाम्,**
**येनाक्रियन्त सततं गृहकर्मदासा ।**
**वाचामगोचरचरित्रपवित्रिताय,**
**तस्मै नमो बलवते कुसुमायुधाय ॥२॥**

**मत्तेभकुम्भदलने[७] भुवि सन्ति शूराः,**
**केचित्प्रचण्डमृगराजवधेऽपि दक्षाः[८] ।**
**किन्तु ब्रवीमि बलिनां पुरतः प्रसह्य,**
**कन्दर्पदर्पदलने विरला मनुष्याः ॥३॥**

**तावदेव[९] हृदये कृतिनामपि,**
**स्फुरत्येष निर्मलविवेकदीपकः ।**
**यावदत्र न [१०]कुरङ्गचक्षुषां,**
**ताड्यते [११]चटुललोचनाञ्चलैः ॥४॥**

एवं तच्चित्रपट्टं विलोक्य कामविह्वलः कृष्णो नारदं प्रति जगौ, भो नारदर्षे ! कस्याः स्त्रियः स्वरूपमत्र चित्रपट्टे चित्रितमस्ति ? तदा नारदोऽवदत्, भो कृष्ण ! इदं कुण्डिनपुरस्वामिनो रुक्मिनृपस्य लघ्व्याः स्वसुः रुक्मिण्याः स्वरूपं चित्रितमस्ति, सा चाद्यापि कुमारी वर्तते । तत्रान्यदा गतोऽहं तस्याः पुरस्तात्तव गुणानवर्णयम्, तेन च सा त्वां प्रति भृशमनुरागवती जातास्ति, ततश्च

तया त्वामेव परिणेतुं निश्चयः कृतोऽस्ति, अथ तत्र त्वं दूतं सम्प्रेष्य रूक्मिभूपात्तां मार्गयस्व। इत्युक्त्वा नारदस्ततो निःसृत्यान्यत्र जगाम।

अथैवं नारदवचांसि निशम्य प्रहृष्टः कृष्णस्तत्कालं तां रुक्मिणीं मार्गयितुं विचक्षणमेकं दूतं रूक्मिभूपपार्श्वे प्रेषयामास। स दूतोऽपि तत्र गत्त्वा रुक्मिनृपाय कृष्णोक्तं सन्देश कथयामास। रुक्मिणा चोवाय भो दूत! मया पुरैव ममेयं भगिनि रुक्मिणी शिशुपालाय दत्तास्ति, कन्या हि सकृदेव[१२] दीयते। किं च तस्मै कुलहीनाय गोपालाय मे भगिनीं दातुं सर्वथैवाहं नेच्छामि। यतः-

**कुलं च शीलं च सनाथता च,**
**विद्या च वित्तं च वपुर्वयश्च।**
**वरे गुणाः सप्त विलोकनीय-**
**स्ततः परं भाग्यवशा हि कन्या ॥१॥**

किं च स गोपालः कृष्णो बहुपत्नीको वर्तते। अतोऽहं मम स्वसारं सपत्नीनां कष्टे पातयितुं न वाञ्छामि यतः-

**वरं रंककलत्रत्वम्, वरं वैधव्यवेदना।**
**वरं नरकावासो वा, मा सपत्न्या पराभवः ॥१॥**

अतः स शिशुपालनृप एव तस्या योग्यो वरोऽस्ति, तेन सह परिणीता च सा भृशं शोभां प्राप्स्यति, यतः-

**हेमं[१३] रत्नाश्रितं भाति, ज्योत्स्ना चन्द्राश्रिता पुनः।**
**नागवल्ल्या मुखं यद्व-त्तथेयं तेन निश्चितम् ॥१॥**

इत्याद्युक्त्वा रुक्मिनृपेण स कृष्णदूतः पश्चाद्वालितः, एवं निराशीभूतः स दूतस्ततो निःसृत्य द्रुतं श्रीकृष्णपार्श्वे समागत्य रुक्मिनृपोक्तं सर्वं वृत्तान्तं कथयामास।

इतो रुक्मिण्याः पितृस्वसा तत्कृष्णयाचनस्वरूपं विज्ञाय तं वृत्तान्तं रुक्मिण्यै कथयामास, यथा तव भ्राता विष्णुना याचितामपि त्वां तस्मै दातुं न

समीहते, तेन त्वां निश्चयेन शिशुपालाय दास्यति । तत् श्रुत्वा रुक्मिणी जगौ, मया तु मनसा विष्णुरेव पतित्वेनाङ्गीकृतोस्ति, अतोऽहं तं विनान्यस्य कस्यापि पाणिग्रहणं न करिष्ये । एवं तां रुक्मिणी विष्णावेवासक्तां विज्ञाय सा तत्पितृस्वसा द्रुतं तं वृत्तान्तं कृष्णं प्रति ज्ञापयामास । यथा रुक्मिणी त्वय्येव सानुरागा वर्तते, कथमपि शिशुपालं परिणेतुं नैव वाञ्छति, तेन गुप्तवृत्त्या त्वयात्र नगरोद्याने समागन्तव्यं माघाष्टमीदिने च नागपूजामहोत्सवमिषेणाहं[१४] रुक्मिणीमुद्याने चानेष्यामि, पूर्वतश्चागतेन त्वया सा तत्राङ्गीकर्तव्या ।

इतश्च विहितवैवाहिकमहोत्सवः शिशुपालोऽपि रुक्मिण्याः पाणिग्रहणोत्सुकश्चपलः तत्र परिवारयुतः कुण्डिनपुरनगरे समायातः । अथ कलिप्रियनारदर्षेर्मुखात्तत्र शिशुपालागमनं विज्ञाय बलदेववासुदेवावपि निजनिजरथारूढौ द्रुतं तत्र कुण्डिनपुरोद्याने समागतौ । तदा सा पितृस्वसा तां रुक्मिणीं प्राह, भो भद्रे ! तवेप्सितो भर्ता श्रीकृष्ण उद्याने समायातोऽस्ति, अतः साम्प्रतं त्वं विलम्बं मा कुरु, तूर्णं रथमारुह्यावां नागपूजामिषेणोद्यानं गच्छावः । तत् श्रुत्वा सा रुक्मिण्यपि [१५]सज्जीकृते रथे तया पितृस्वस्रा सह समारुह्योद्याने समायाता, कृष्णस्य मिलिता च । ततः कृष्णोऽपि प्रेमभरेण तां निजरथे समारोपयत् । अथ [१६]स्त्रीचातुर्यप्रविणा सा पितृस्वसा श्रीकृष्णं केनाप्यजीयमानवैभवं विज्ञाय स्वोपरि [१७]समागच्छद्दोषापहारायोच्चैः पुच्चकार, भो भो सुभटाः ! धावत ! धावत ! इयं रुक्मिणी हरिणा बलात्कारेणापह्रियते । इतो वासुदेवोऽपि स्वं मनोरथं परिपूर्णं विज्ञाय हर्षात् स्वं पाञ्चजन्यं शङ्खं पूरयित्वा रुक्मिणीयुतो निजं रथं वेगेन निजपुरं प्रति चालयामास । बलदेवोऽपि तत्पृष्ठे निजं रथं प्रेरयति स्म । अथैवं हरिणा ह्रीयमाणां रुक्मिणीं विज्ञाय क्रोधोद्धतौ दमघोषरुक्मिनृपौ भूरिसैन्ययुतौ वाजित्रनादैश्च दिग्गणं पूरयन्तौ तत्पृष्टे दधावतुः । एवं पृष्टे भूरिसैन्यं समागच्छन्तं विलोक्य मनसि विह्वलीभूता रुक्मिणी श्रीकृष्णं प्रति प्राह-

**युवामेकाकिनौ नाथ, तौ त्वसङ्ख्यबलान्वितौ ।**
**मत्कृतेऽयमपायोऽभू[१८]-द्युवयोराकुलास्मि तत् ॥१॥**

एवंविधानि रुक्मिण्या वचांसि श्रुत्वा, तां च व्याकुलीभूतां विज्ञाय हरिराश्वासयामास । हे प्रिये ! त्वं भयं मा कुरु, सर्वमप्येतन्महत्सैन्यमावयोरग्रे काकनाशं[19] पलाय्य दूरं यास्यति । एवमाश्वासिता रुक्मिणी निजस्वामिनं कृष्णं प्रति प्राह, हे स्वामिन् ! युद्धं कुर्वद्भ्यां युवाभ्यां कथञ्चनापि रुक्मिनृपो रक्षणीयः तस्य वधो नैव कार्यः । अथ तत्सैन्यं निकटे समागतं निरीक्ष्य तौ द्वावपि भ्रातरौ तेन सह युद्धं कर्तुं प्रवृत्तौ । हलमुशलादिशस्त्रैस्तौ द्वौ युद्धं कुर्वन्तौ विद्विषां रथवाजिगजसुभटान् चूर्णयामासतुः ।

एवं तयोर्द्वयोर्भ्रात्रोरतुलं बलं विज्ञाय रथस्था[20] रुक्मिणी विस्मयं प्राप्ता । इतो युद्धं कुर्वता [21]नारायणेन रुक्मिण्यां पश्यन्त्यामेव शिशुपालशिरःकमलनालवच्छिन्नम् ।[22] इतो बलदेवो रुक्मिनृपं बद्ध्वा प्रोवाच, भो रुक्मिभूप ! रुक्मिणीवधूवचनात्त्वां जीवन्तं मुञ्चामि । इत्युकत्वा मुक्तबन्धनं तं स मुमोच । सलज्जो[23] रुक्मिभूपोऽपि तत्रैव नगरं निवेश्य तस्थौ ।

एवं लब्धजयौ तौ द्वावपि भ्रातरौ ततश्चलितौ, क्रमेण द्वारिकाया बहिरुद्याने समायातौ [24]स्वर्गपुरसोदरां तां द्वारिकापुरीं दूरादेव दृष्ट्वा रुक्मिणी निजं स्वामिनं प्राह, हे स्वामिन् ! इयं नगरी नूनमतीवमनोहरा दृश्यते, परमहं त्वया छलेनानीतास्मि, अतः सपत्नगणेऽहं हास्यास्पदं भविष्यामि । तत् श्रुत्वा कृष्णस्तां जगाद, भो प्रिये ! एतद्विषये त्वया मनागपि खेदो न कार्यः, अहं त्वां सर्वासु मदीयराज्ञीषु मुख्यां पट्टराज्ञीमेव करिष्यामि, तेन तासां मध्यात्कापि तव मनागपि हास्यचेष्टां न करिष्यति । इत्युक्त्वा कृष्णस्तत्रैवोद्याने तां गान्धर्व-विवाहेन पर्यणयत् । अथ तत्रैवोद्याने लक्ष्म्या देव्या एकं मन्दिरमासीत्, तत्र मन्दिरे च मानुष्याकारप्रमाणोपेता लक्ष्मीमूर्तिः स्थापिता बभूव ।

तां मूर्तिमुत्थाप्य हरिस्तत्र तां रुक्मिणीपुमापावेशयत्, ततः सा कृष्णेनोक्ता हे प्रिये ! सत्यभामाद्या मदीयाग्रमहिष्यो मया प्रेषिता अत्र लक्ष्मीदेवीं वन्दनार्थं समागमिष्यन्ति । तस्मिन्नवसरे त्वया क्षणं स्थैर्यभावेनैव स्थातव्यम्, लक्ष्मीमूर्तिबुद्ध्या च ताः सर्वा अपि किङ्कर्य[25] इव तव चरणयोः प्रणामं करिष्यन्ति । तत्प्रणामानन्तरं च त्वया स्वात्मानं प्रकटीकृत्य[26] ताभिः

सह हास्यविनोदः कर्तव्यः एवं च ताभिः प्रणता त्वं सर्वासु राज्ञीष्वग्रमहिषी भविष्यसि। एवं कृष्णेनोक्ता सा रुक्मिण्यपि तत्कुतूहलकरणमङ्गीचकार।

अथैवं तां रुक्मिणीं तत्रोद्याने लक्ष्मीमन्दिरे मुक्त्वा कृष्णो बलभद्रयुतो नगरमध्ये निजावासे जगाम । एवं रुक्मिणीरहितं कृष्णं गृहे समागतं वीक्ष्य स्त्रीस्वभावतो मनागीर्ष्याभिभूता सत्यभामा जगाद, हे स्वामिन्! त्वया कीदृशी प्रियाऽऽनीतास्ति, क्व च स्थापितास्ति, अहं तां नः[२७] सपत्नीं विलोकयितुमिच्छामि।

तत् श्रुत्वा कुतूहलप्रियः कृष्णो मनाग् विहस्य प्राह, भो सत्यभामे! सा निजरूपयौवनमदोन्मत्ता मयोपवने लक्ष्मीमन्दिरे स्थापितास्ति।

यदि ते तद्विलोकनेच्छा तदा त्वं तत्र वज्र,[२८] एवमुक्ता सत्यभामा स्त्रीचपलस्वभावतस्तस्या रूपविलोकनार्थं भृशमुत्कण्ठिता बभूव यतः -

**यदि स्थिरा भवेद्विद्युत्तिष्ठन्ति यदि वायवः ।**
**दैवात्तथापि नारीणाम्, न स्थेम्ना[२९] स्थीयते मनः ॥१॥**

एवं रुक्मिणीविलोकनार्थं भृशमुत्कण्ठिता सत्यभामा, पद्मावत्यादि-कृष्णाग्रमहिषीयुता रथारूढा द्रुतं तत्रोद्याने लक्ष्मीमन्दिरे प्राप्ता । अथ तत्रासनोपविष्टां स्थिरदेहां तां रुक्मिणीं लक्ष्मीमूर्तिमेव मन्यमानाः सत्य-भामाद्यास्ताः सर्वा अपि कृष्णाग्रमहिष्यस्तस्याः पादयोः प्रथमं प्रणामं चक्रुः । ततो रुक्मिणीविलोकनार्थं यावत्ता अग्रे गन्तुं प्रवृत्तास्तावत्सा रुक्मिणी [२५]द्रुतमासनादुत्थाय [३०]दत्तकरताला विस्मितास्ताः सर्वा अपि विनोदयामास।

राजभृत्यैश्च द्रुतं तत्रासने पुनः सा लक्ष्मीमूर्तिः स्थापिता । अथ निजस्वामिनस्तां कपटकलां विज्ञाय मनस्सु दूनाः सत्यभामाद्यास्ताः सर्वा अपि अग्रमहिष्यस्ततः पश्चाद्वलित्वा गृहे समागताः । इतस्तत्रागतं श्रीकृष्णं सत्यभामा प्राह, हे स्वामिन्! वयं मुग्धास्त्वया सम्यग् वञ्चिताः, यद्रुक्मिण्याः पादयोः पातिताः ।

तत् श्रुत्वा हास्यं विधाय कृष्णो जगौ, भो सत्यभामे! युष्माभिः सा यदा लक्ष्मीबुद्ध्या वन्दिता, ततोऽतःपरं सैव पट्टराज्ञ्यस्तु । तदा क्रुद्धया

सत्यभामया प्रोक्तं, स्वामिन् ! तां रुक्मिणीमेव पट्टराज्ञीं[३१] [३२]विधित्सया त्वया नूनमहं छलिता, ततोऽतःपरं सैव ते पट्टराज्ञ्यस्तु। इत्युक्त्वा क्रुधा मुखं मोटयन्ती सत्यभामा ततो निःसृत्य निजवासे जगाम। एवं तां रुक्मिणीमेव पट्टराणी विधाय श्रीकृष्णः सुखेन राज्यं करोति स्म। एवं च तस्य श्रीकृष्णवसुदेवस्य पद्मावती, गौरी, गान्धारी, लक्ष्मणा, सुसीमा, जम्बूवती, सत्यभामा, रुक्मिणीत्य-भिधाना अष्टौ पट्टराज्ञ्योऽभवन्।

अथैकदा श्रीसमुद्रविजयांगजो[३३] नेमिकुमार राज्यादितृणवत्त्यक्त्वा, वर्षं यावच्च दानं दत्त्वा गिरनारगिरिं गत्वा संयमं जग्राह। क्रमेण स केवलज्ञानं प्रपेदे। स श्रीनेमिजिनो भव्यजीवान् प्रतिबोधयन्नन्यदा द्वारिकाया नगर्या बहिरुद्याने समवासार्षीत्। देवैश्च समवसरणं विहितम्। तदोद्यानपालेन [३४]तूर्णं गत्वा श्रीकृष्णाय निवेदितम्, हे स्वामिन् ! नगर्या बहिरुद्याने श्रीनेमिप्रभुः समवसृतोऽस्ति, देवैश्च समवसरणं कृतमस्ति।

तत् श्रुत्वा हृष्टः कृष्णस्तस्मै उद्यानपालाय पारितोषिकं दत्त्वा समुद्र-विजयवसुदेवादिपरिवारयुतः प्रभोर्वन्दनार्थं नगर्या बहिरुद्याने जगाम। तत्र च प्रभुं त्रिःप्रदक्षिणीकृत्य तन्मुखाद्धर्मोपदेशं श्रोतुमुचितस्थाने स समुपविष्टः। प्रभुणापि धर्मोपदेशो दत्तः, यथा-

**स्वर्गस्तस्य गृहाङ्गणे सहचरी साम्राज्यलक्ष्मीः शुभा,**
**सौभाग्यादिगुणावलिर्विलसति स्वैरं वपुर्वेश्मनि।[३५]**
**संसारः [३६]सुतरः शिवं करतलक्रोडे लुठत्यञ्जसा,[३७]**
**यः श्रद्धाभरभाजनं जिनपतेः पूजां विधत्ते जनः ॥१॥**

**रत्नानामिव रोहणक्षितिधरः खं[३८] तारकाणामिव,**
**स्वर्गः कल्पमहीरुहामिव सरः पङ्केरुहाणामिव।**
**पाथोधिः पयसामिवेन्दुमहसां स्थानं गुणानामसा-**
**वित्यालोच्य विरच्यतां भगवतः श्रीसङ्घपूजाविधिः ॥२॥**

सर्वज्ञो हृदि वाचि तद्गुणगणः कायेन देशव्रतम्,
धर्मे तत्परता परः परिणतो बोधो बुधश्लाघ्यता ।
प्रीतिः साधुषु बन्धुता बुधजने जैने रतिः शासने,
यस्यैवं भवभेदको गुणगणः स श्रावकः पुण्यभाक् ॥३॥

कृत्वार्हत्पदपूजनं यतिजनं नत्वा विदित्वागमम्,
हित्वा सङ्गमधर्मकर्मठधियां पात्रेषु दत्त्वा धनम् ।
गत्वा पद्धतिमुत्तमक्रमजुषां जित्वान्तरारिव्रजम्,
स्मृत्वा पञ्चनमस्क्रियां कुरु करक्रोडस्थमिष्टं सुखम् ॥४॥

इत्यादिधर्मोपदेशश्रवणानन्तरं श्रीकृष्णः प्रभुं प्रणम्य पप्रच्छ, हे स्वामिन्! ममैता अग्रमहिष्यः सत्यो वा न? भगवानाह भो कृष्ण! सर्वा अपि तवैता अग्रमहिष्यः सत्यः सन्ति । तद्विषये मनागपि त्वया संशयो न विधेयः । ततः कृष्णेन पुनः पृष्टम्, हे भगवन्! वर्षमध्ये का तिथिः सर्वोत्कृष्टा वर्तते? प्रभुराह, हे कृष्ण! मार्गशीर्षस्य शुद्धैकादशी तिथिः सर्वोत्कृष्टा वर्तते, यतस्तस्यां तिथौ पञ्चसु भरतेषु, पञ्चसु चैरवतेषु तीर्थकराणां पञ्च पञ्च कल्याणकानि जातानि ।

एवं तत्र तिथौ सर्वाणि मिलित्वा पञ्चाशत् (५०) कल्याणकानि जातानि सन्ति । अतः कारणात् सा तिथिर्वर्षमध्ये सर्वोत्कृष्टा वर्तते । तेन तस्यां तिथौ सविशेषं तपः कार्यं, तपो हि सर्वकर्मक्षयं विधाय मोक्षसुखं यच्छति, यतः-

विरज्य विषयेभ्यो यै-स्तेपे मोक्षफलं तपः ।
तैरेव फलमङ्गस्य, जगृहे तत्त्ववेदिभिः ॥१॥

यद् दूरं यद् दुराराध्यम्, यच्च दूरे व्यवस्थितम् ।
तत्सर्वं तपसा साध्यम्, तपो हि दुरतिक्रमम् ॥२॥

यस्माद्विघ्नपरम्परा विघटते दास्यं सुराः कुर्वते,
कामः शाम्यति दाम्यतीन्द्रियगणः कल्याणमुत्सर्पति ।

**उन्मीलन्ति महर्द्धयः कलयति ध्वंसं च यत्कर्मणाम्,**
**स्वाधीनं त्रिदिवं करोति चपलं श्लाघ्यं तपस्तन्न किम् ॥३॥**

**सो अ तवो कायव्वो, जेण मणो अमंगुलं न चिंतेइ ।**
**जेण न इंदियहाणी, जेण य जोगा न हायंति ॥४॥**

एवं प्रभुमुखादेकादशीतपोमाहत्म्यं श्रुत्वा श्रीकृष्णो निजाग्रमहीषीभिः सह ततःप्रभृतिभिस्तां तिथिमाराधयमास। तद् दृष्ट्वा सर्वे लोका अपि तां तिथिं तपसाराधयमासुः, ताः सत्यभामादयः कृष्णाग्रमहिष्यस्तत्तप आराधयन्त्यो विहितभूरिप्रयत्नैर्देवैरपि तत्तपसः कथमपि न चालिताः ततः क्रमेण ताः सत्यभामारूक्मिण्यादयोऽष्टावप्यग्रमहिष्यो नेमिप्रभुपार्श्वे दीक्षां जगृहुः ततस्ताः सर्वा अपि निरन्तरं षष्टाष्टमादि विविधतपांसि कर्तुं प्रवृत्ताः क्रमेण च क्षीणसर्वकर्माः केवलज्ञानमवाप्य श्रीशत्रुञ्जयगिरौ गत्वाऽनशनपूर्वकं स्वायुःक्षये मुक्ति ययुः ।

**॥ इति सत्यभामाचरित्रं सम्पूर्णम् ॥**

**: अभ्यास :**

१. सत्यभामा किं कारेणन नारदं नादृतवती ?
२. नारदेन रुक्मिणीपार्श्वे कस्य वर्णनं कृतम् ?
३. कृष्णस्य रुक्मिण्याः उपरि किं दृष्ट्वा अनुरागो जातः ?
४. रुक्मिराज्ञा रुक्मिणीस्वसा कृष्णाय दातुं केन कारणेन निषिद्धा ?
५. कस्याः सहकारेण रुक्मिणी कृष्णेन सह गता ?
६. कृष्णेन केनोपायेन रुक्मिणी पट्टराज्ञी कृता ?
७. कृष्णस्य पट्टराज्ञ्यः कति ? तासां अभिधानानी कथ्यताम् ?
८. कृष्णः भगवन्तं नेमिनाथं किं पृष्टवान् ? भगवान् किं उवाच ?
९. भगवता कस्याः तिथेः महिमा दर्शितः ?

**१. नारदश्चासौ ऋषिश्च-नारदर्षिः ।( वि. पू. क. ) નારદઋષિ ॥ २. कतिचिद् (અવ્યય) કેટલાક ॥ ૩. અહંકાર વધવાથી માણસ આ પ્રમાણે બોલે છે કે, હું તારી પાસે આવવાની ઇચ્છાવાળો કારાગ્રહમાં પડીશ (અહંકારમાં રહેલો માણસ હકીકતમાં**

અંધકારમાં પડે છે.) ॥ ૪. स्वसृ-સ્ત્રી. બહેન ॥ ૫. मदनस्य बाणः मदनबाणः । ( ष. त. ) तेन विद्धः मदनबाणविद्धः तस्य । ( तृ.त. ) કામબાણથી વિંધાયેલા ॥ ૬. જેના વડે શંભુસ્વયંભુ-વિષ્ણુ વગેરે સ્ત્રીઓના ઘરકામ કરનાર દાસ બને છે, તે વાણીને અગોચર ચરિત્રથી મહાન બળવાન કામદેવને નમસ્કાર થાઓ. ॥ ૭. મદોન્મત્ત હાથીના કુંભસ્થળને તોડનાર શૂરવીર પુરુષો આ પૃથ્વી પર હોય છે. ભયંકર સિંહનો વધ કરનારા હોશિયાર માણસો હોય છે. ભયંકર બળવાનની આગળ હું છાતી ઠોકીને કહું છું કે, કામના અભિમાનને હણનાર તો કોઈ વિરલ જ હોય છે. ૮. दक्ष वि. હોશિયાર ॥ ૯. જ્યાં સુધી મૃગ જેવી આંખવાળી સ્ત્રી પોતાની ચપળ આંખ વડે કટાક્ષ કરતી નથી ત્યાં સુધી જ વિદ્વાન પુરુષના હૃદયમાં નિર્મલ દીપરૂપી દીવો ઝગમગે છે. ॥ ૧૦. कुरङ्ग- पुं. હરણ ॥ ૧૧. चटुले च ते लोचने च चटुललोचने । तयोः अञ्चलानि-चटुललोचनाञ्चलानि । तैः ॥ ૧૨. सकृत् અ. એકવાર ॥ ૧૩. हेम-नपुं. સુવર્ણ ॥ ૧૪. मिष-पुं. બહાનું ॥ ૧૫. न सज्जः असज्जः । असज्जः सज्जः इव कृतः सज्जीकृतः । ( च्वि. ) तस्मिन्-सज्जीकृते । તૈયાર કરાયેલા (માં) ॥ ૧૬. स्त्रीया श्चातुर्यं स्त्रीचातुर्यं ( ष.त. ) स्त्रीचातुर्ये प्रविणा स्त्रीचातुर्यप्रविणा ॥ ૧૭. समागच्छंश्चासौ दोषः समागच्छद्दोषः । समागच्छद्दोषस्य अपहारः समागच्छद्दोषापहारः तस्मै આવતાં એવા દોષને દૂર કરવા ॥ ૧૮. अपाय पुं.વિઘ્ન ॥ ૧૯. काकनाशं-ક્રિ. વિશેષણ-કાગડા નાસે તેમ ॥ ૨૦. रथे तिष्ठति रथस्था । ( उपपद ) રથમાં રહેલી ॥ ૨૧. नारायण-पुं. કૃષ્ણ, હરિ ॥ ૨૨. कमलस्य नालः कमलनालः । ( ष. त. ) कमलनालस्य इव कमलनालवत् કમળના નાળની જેમ ॥ ૨૩. लज्जया सह वर्तते यः सः सलज्जः । ( बहु. ) લજ્જા સહિત. લજ્જાવાળો ॥ ૨૪. स्वर्गस्य पुरम्-स्वर्गपुरम् । ( ष.त. ) स्वर्गपुरस्य सोदरा इव ( उपमान ) स्वर्गपुरसोदरा ताम्-સ્વર્ગપુરીની બેન જેવી ॥ ૨૫. किंकरी-स्त्री.-દાસી ॥ ૨૬. न प्रकटः अप्रकटः ( नञ् त. ) अप्रकटः प्रकटः इव कृत्वा प्रकटीकृत्य ( च्वि. ) પ્રગટ કરીને ॥ ૨૭. नः अष्मद्-सर्व. ( ष.ब. ) અમારી ॥ ૨૮. व्रज - ૨ ગણ પરસ્મૈ.આજ્ઞા બીજો પું.એક વ. જા ॥ ૨૯. स्थेमन्-पु.-તૃ. એ. વ. સ્થિરતાથી ॥ ૩૦. दत्तः करतालो यया सा दत्तकरताला-તાળી વગાડીને ॥ ૩૧. दु-૫ મો ગણ કર્તરિ ભૂ.કૃ. - ખેદ પામવો ॥ ૩૨. वि + धा-ઇચ્છાદર્શક કૃ. તૃ. એ.વ.ધારણ કરવાની ઇચ્છાથી ॥ ૩૩. अंगज-पुं. પુત્ર ॥ ૩૪. तूर्णं-અ. જલદી ॥ ૩૫. वपुः एव वेश्म ( अव. पू. क. ) वपुर्वेश्म । तस्मिन् ॥ ૩૬. सुखेन तीर्यते सुतरः । ( उपपद ) સુખેથી તરાય તે ॥ ૩૭. अञ्जसा-અવ્યય. જલદી ॥ ૩૮. खं-नपुं.-આકાશ ॥

●●●

## [ १८ ]

# ॥ श्रीनर्मदासुदरीचरित्रम् ॥

**नंदउ नमयसुन्दरी सा सुचिरं जीए पालिअं सीलं ।**
**गीहत्थणं पि काउं सहिया य विडंबणा विविहा ॥१॥**

व्याख्या-सा नर्मदासुन्दरी चिरकालं यावन्नन्दतु यया कृत्रिमं ग्रैथिल्यं [१]कृत्वा विविधा नानाप्रकारा विडम्बना: कदर्थना: सहिता: निर्मलं शीलं च पालितम् ॥१॥

तस्या कथा चेत्थम्-वर्द्धमानाभिधनगरे सम्प्रतिनामा राजा, ऋषभसेनाभिधश्च सार्थवाह: परिवसति । तस्य भार्या वीरमती, तस्या: सहदेववीरदासाख्यौ द्वौ पुत्रौ, ऋषिदत्ताभिधाना च पुत्री, क्रमेण सा [२]युवजनस्पृहणीययौवनावस्थां प्राप्ता, बहुभिर्व्यापारिधनिकपुत्रैर्मार्गिताऽपि [३]मिथ्यात्वतिमिरान्धभूतेभ्यस्तेभ्य: सा तत्पितृभ्यां[४] न ददे ।

अन्यदा चन्द्रपुनगराद् रुद्रदत्ताभिध: कश्चित् श्रेष्ठी तन्नगरे समाययौ । अन्यदा तेन रुद्रदत्तेन असत्यमपि प्रमाणविदां दययेव व्योमाम्बुजोदाहरणं निजवदनाम्भोजेन सत्यीकुर्वन्ती निजप्रासादगवाक्षस्था सा ऋषिदत्ता दृष्टा, तां दृष्ट्वा मन्मथशरविद्धो रुद्रदत्तो गतचैतन्य[५] इव बभूव । ततस्तेन स्वकीयमित्राय कुबेरदत्ताय स्वकीयाभिप्रायं निवेद्य पृष्टम्, भो मित्र ! रूपनिर्जितनिर्जराङ्गनेयं कस्य पुत्री ? तेनोक्तम् मित्र ! इयं जिनधर्मैकतत्परस्य ऋषभसेनसार्थवाहस्याङ्गजाऽस्ति, किञ्च जैनं विना सोऽन्यस्मै कस्मैचिदपि निजाङ्गजां नैव दास्यति, तत् श्रुत्वा स कपटश्रावकीभूय[६] नित्यं जिनपूजासाधुवन्दनाऽऽवश्यकादिक्रियापर: समजनि । अथ ऋषभसेनस्तं जिनधर्मपरायणं निजसाधर्मिकं ज्ञात्वा तस्मै निजतनयां ददौ । अथायं रुद्रदत्त: श्वसुरमापृच्छय ऋषिदत्तामादाय चन्द्रपुरनगरे समायात:, त्यक्तश्च तेन तत्र जिनधर्म: । क्रमेण ऋषिदत्ताऽपि भर्तृस्नेहत: संसर्गदोषेण जिनधर्मे शिथिला जाता । क्रमेणैषा

गर्भिणी जाता, सम्पूर्णसमये तस्या महेश्वरनामा पुत्रो जातः, क्रमेण सकल-विद्याभ्यासं कृत्वा स यौवनवयः सम्प्राप्तः ।

इतश्च ऋषिदत्ताया वृद्धभ्राता सहदेवाभिध आसीत् । तस्य सुन्दर्याख्या भार्या बभूव, तस्या एकदा नर्मदायां स्नानकरणार्थं दोहदः समुत्पन्नः, ततः सहदेवसार्थवाहः [७]क्रयाणकानि समादाय सुन्दरीसहितो नर्मदोपकण्ठे समागत्य तस्या दोहदं पूरयामास । तत्र च व्यापारे बहुलाभं विज्ञाय ते नर्मदापुरीत्यभिधानं नगरं संस्थाप्यैकं जैनमन्दिरमपि निर्मापितम् । क्रमेण सम्पूर्णसमये तयैका पुत्री जनिता, श्रेष्ठिना पुत्रवत्तस्या जन्ममहोत्सवं कृत्वा नर्मदासुन्दरीति नाम दत्तं, अथ क्रमेण शशिलेखेव[८] वर्द्धमाना सकलकलाकलापबन्धुरा सा यौवनं प्राप्ता ।

अथैकदा ऋषिदत्तया तस्या अवर्णनीयरूपलवणिमादिगुणान् श्रुत्वा चिन्तितम्, चेदेषा मम पुत्रस्य महेश्वरस्य पाणिग्रहणं कुर्यात् तदा मे मनोऽभिलाषः सफलीभवेत्, परं मां जिनधर्मपराङ्मुखीं विज्ञाय मम भ्राता तां निजतनयां मम पुत्राय नैव दास्यतीति चिन्तयन्ती सा विलापं कर्तु लग्ना, तावद्रुद्रदत्तेन तत्कारणं पृष्टा सा निजहृदयगताभिलाषं कथयामास । तत् श्रुत्वा सोऽपि चिन्ताध्वान्तचित्तः समभवत् । अथ पार्श्वस्थेन महेश्वरेण तद्वृत्तान्तं कर्णगोचरीकृत्योक्तम्, हे पितरौ युवां विषादं मा कुरुताम्, अहमेव तत्र गत्वा केनाप्युपायेन तां परिणीय समागमिष्यामीत्युक्त्वा स शीघ्रमेव तत्रागत्य [९]मातुलाय मिलितः, ततः क्रमेण तेन विनयादिगुणगणैर्मातुलादीनां मनस्तथाऽऽवर्जितं यथा ते सर्वेऽपि तस्योपरि हर्षोल्लासितहृदयाः सञ्जाताः, महेश्वरोऽपि नित्यं निजशुद्धभावेन देवगुरुवन्द-नाश्यकादिक्रियाभिर्जिनधर्माराधकः समभूत्, अथ तं तथाविधं जिनधर्मपरायणं विज्ञाय मातुलेन तस्मै नर्मदासुन्दरी परिणायिता । कियत्कालं तत्र स्थित्वा स श्वशुराज्ञया तामादाय निजनगरे समायातः । वधूसहितं निजतनयं समागतं दृष्ट्वा पितरावत्यन्तं प्रमोदं प्राप्तौ । क्रमेण नर्मदासुन्दर्या श्वशुरादीन् प्रतिबोध्य [१०]मिथ्यात्व घोरसागरे निमज्जतः समुद्धृत्य सर्वेऽपि ते [११]जिनधर्मैकयानपात्रे समारोपिताः ।

अथैकदा सा नर्मदासुन्दरी गवाक्षस्था निजवदनतो दिवाऽपि[१२] नगरजनानां चन्द्रोदयभ्रमं कारयन्ती ताम्बूलं चर्वन्ती निष्ठीवनं[१३] चकार ।

अकस्माच्च तन्निष्ठीवनं पथि गच्छतो जैनमुनेरेकस्य मस्तकोपरि पतितम्, मुनिनोक्तम्, यद्येवं त्वं मुनीनामाशातनां करोषि, तेन तव भर्तुर्वियोगो भविष्यतीति श्रुत्वा भयसहितं विषादं दधाना सा [१४]तूर्णमेव गवाक्षादुत्तीर्य मुनेश्चरणयोर्मनमस्कृत्यानुपयोगतो विहितं निजापराधं क्षमयामास। मुनिनोक्तम्-भो महानुभावे! मम हृदये मनागपि क्रोधो नास्ति [१५]मन्मुखादेतद्वाक्यं वृथैव निर्गतं तेन त्वं खेदं मा कुरु। अथ नर्मदासुन्दरी स्वकर्मणामेव दोषं ददती गृहे समागता। अथैकदा महेश्वरदत्तो व्यापारार्थं द्वीपान्तरं प्रति प्रस्थितः, तदा मोहाकुलमानसया स्त्रिया भणितम्, हे स्वामिन्नहमपि भवता सार्धमेव समागमिष्यामि। यतो भवद्वियोगं सोढुमहमशक्तैव, तस्या अत्याग्रहं विज्ञाय सोऽपि तया सह प्रवहणारूढो[१६] द्वीपान्तरं प्रति चलितोऽवगाहितश्च तेन भूयान् पन्थाः।

अथैकदा रात्रौ प्रवहणमध्ये केनचित्पुरुषेण गायनं कर्त्तुं प्रारब्धं तत् श्रुत्वा नर्मदया भर्तुरग्रे कथितम्, हे स्वामिन्। योऽयं पुरुषो गायति, तस्य शब्दानुसारेणाहं जानामि, यदयं पुरुषो श्यामवर्णः स्थूलहस्तपादो दुर्बलदेहो [१७]मषाङ्कितगुह्यस्थानो द्वाविंशतिवर्षप्रमाणो विशालहृदयश्चास्ति, तत् श्रुत्वा भर्त्रा चिन्तितम्, नूनमियमसती वर्त्तते, नो चेदियमेतादृशी[१८] वार्त्ता कथं जानीयात्, अथ प्रभाते तेन स पुरुषो दृष्टः पृष्टश्च तदा तत्सर्वमपि यथोक्तं मिलितम्। अथ श्रेष्ठिना निजहृदयोद्भूतक्रोधानलमवसरे क्षणभस्मनाच्छाद्यस्थितं। इतः कतिचिद्दिवसानन्तरं राक्षसद्वीपमासाद्य नाविकैः कथितम्, भो लोका! अहमत्र प्रवहणं स्थिरीकरोमि, अयं राक्षसद्वीपः समायातः, यः कोऽपि [१९]जलेन्धनादि-ग्रहणेच्छुर्भवेत् तेन तत् शीघ्रमेव ग्राह्यमित्युक्त्वा तेन प्रवहणं स्थिरीकृतं। सर्वेऽपि लोकास्तत्र शनैः शनैरुत्तीर्य जलेन्धनादिसञ्चयं चक्रु। अथ महेश्वरेणापि तया सहोत्तीर्य चिन्तितम्, किमहमेतां दुःशीलां जलधौ निधानीकरोमि[२०] वा विषं दत्वा [२१]यमकिङ्करित्वं प्रापयामीति विचारयन् स तया सह क्रीडामिषेण कदलीकानने समागतः सुप्तश्च क्षणं [२२]कदलीदलकोमलशय्यायां, अथ तत्र नर्मदासुन्दरी [२३]आन्दोलितकदलीदलालिभिः सुरभिवनवातैस्तूर्णं निद्रां प्राप्ता, एवं सुखसुप्तां तां तत्रैव विमुच्य महेश्वरदत्तस्तूर्णं ततः समुत्थाय रत्नाकरतट-

मागत्य प्रवहणोपरि समारूढः कथितं च तेन कपटकुटिलचेतसा नाविकादि-लोकानां पुरो यन्मम महिला राक्षसैर्भक्षिता । अहं च कथमपि [२४]प्रपलाय्या-गतोस्मि । निशाचरप्रकराश्च[२५] पृष्ठे समागच्छन्ति, तत इतस्तूर्णं प्रवहणं सज्जीकृत्य वाहयत इति श्रुत्वा भयाकुलचेतसो नाविका द्रुतं ततः पोतं वाहयामासुः । अथ पोतस्थितेन महेश्वरेण चिन्तितं सम्यग्जातं यद्व्यपगत-लोकापवादं मयैषा दुःशीला त्यक्ता । अथ पवनप्रेरितः पोतोऽयं यवनद्वीपे प्राप्तः ।

कियत्कालानन्तरं स श्रेष्ठी ततो बहुधनमुपार्ज्य निजगृहे समायातः । कथितं च तेन निजपरिवाराय राक्षसभक्षणादिनिजभार्यास्वरूपं । शुचं प्राप्तेन परिवारेण च तस्याः प्रेतकार्यादिकृतं । महेश्वरश्चान्यां भार्यां परिणीतवान् ।

अथ तत्र सुप्तोत्थिता नर्मदासुन्दरी तत्र निजभर्त्तारमदृष्ट्वा [२६]हृदया-स्फोटं पूत्कारं कुर्वन्ती विविधविलापैर्वनवासिजन्तूनपि रोदयन्ती हा नाथ ! मामिहैकाकिनीं मुक्त्वा त्वं कथमव्रजः ? इति पुनः पुनः प्रजल्पन्ती, नयना-श्रुजलैर्वनवृक्षसञ्चयान् सिञ्चयन्ती, वदनतो [२७]दीर्घोष्णनिःश्वासान्निष्कासय-न्तीतस्ततोऽटन्ती, तटिनीपतेस्तटमागता । परं तत्रापि प्रवहणमनालोक्य हृदयोद्भूतातीवदुःखतो मूर्च्छां प्राप्ता, सुरभिशीतलानिलतः [२८]पुनःसचेतनीभूय नानाविलापमुखरीकृतकाननैषा चिन्तयामास अथानन्यशरणाया ममात्मघात एव शरणं । पुनस्तया चिन्तितम्, [२९]संसारसागरतरणैकयानपात्रनिभजिनागमे प्रतिषिद्धबालमरणकरणतो न ममात्मनः कापि श्रेयोऽर्थप्राप्तिः । किञ्च न जानेऽमहत्र भर्त्रा कथमेकाकिनी त्यक्ता, नूनं मया तदा या जैनमुनेराशातना कृता तन्मे दुष्कर्म उदयमागतमेव इति विचार्य सा मृत्तिकातः एकां श्रीजिनप्रतिमां कृत्वा सर्वदा तत्र पूजयति वनफलादि च भक्षयति, इत्थं सा नमस्कार-ध्यानपरायणा स्वकर्मनिन्दनतत्परा धर्मप्रभावतो वनवासिक्रूरप्राणिभिरनुपद्रुता निजसमयं गमयाञ्चकार । अथैकदा तस्याः पितृव्यो वीरदासाभिधानो बब्बरकुलं प्रति गच्छन् जलेन्धनाद्यर्थं प्रवहणस्थस्तत्र समागत, तेन रत्नाकरोपकण्ठे भ्रमन्ती नर्मदासुन्दरी दृष्टोपलक्षिता[३०] च । विस्मयमापन्नेन तेन पृष्टम्, हे पुत्री !

त्वमत्रैकाकिनी कथं समागतासि, इत्युक्ता सा नयनाभ्यामश्रूणि मुञ्चन्ती सकलमपि निजवृत्तान्तमादितः कथयामास । अथ वीरदासस्तामाश्वास्य निजप्रवहणमध्ये समारोप्याग्रे चलितः । क्रमेण बब्बरकुले समागत्य राज्ञश्च [३१]प्राभृतं दत्त्वा स सुखेन तत्र व्यापारे समुद्यतोऽभवत् । नर्मदासुन्दर्यपि तत्र सुखेन तिष्ठति, अथ तस्यां नगर्यामेका हरिण्यभिधाना [३२]रूपजितनिर्जराङ्गना वाराङ्गना वसति । तस्यै सन्तुष्टेन राज्ञैवं वरो दत्तोऽस्ति, यद्यः कोऽपि नूतन-व्यापारी अत्र समागच्छेत् स तस्यै वाराङ्गनायै दीनारसहस्रमर्पयेत् । अथ वीरदासं तत्रायातं श्रुत्वा तस्या वाराङ्गनाया दासी तद्दीनारसहस्रं ग्रहीतुं तत्पार्श्वे समायाता । तत्र [३३]रूपलवणिमादिभिर्निखिलनगरनारीगर्वतिरस्कारिणीं नर्मदा-सुन्दरीं विलोक्य विस्मयमापन्ना गृहे समागत्य सा हरिणीं प्रति कथयामास, हे स्वामिनि ! मयाऽद्य वीरदासगृहे [३४]निखिलनागरपुरुषवशीकरणैकलवणिमा[३५] एका प्रमदा विलोकिता । सा चेदस्मदगृहे भवेत् तदा नूनं कल्पवल्लयेव गृहाङ्गणे प्रफुल्लिता ज्ञातव्या ।

इतो वीरदासो हरिण्यै दीनारसहस्रं समर्पयितुं तद्गृहे समागतः । हरिण्या च दीनारसहस्रं गृहीत्वा मिष्टवचनसत्कारादिभिस्तस्य मनो वशीकृत्य तत्पार्श्वात्तन्नामाङ्किता मुद्रिकाऽधिगता । अथ वीरदासस्ततो निःसृत्य व्यापारार्थमन्येषां व्यापारिणां गृहे गतः तदवसरं प्राप्य कपटपेटया हिरण्या दास्यै कथितम्, त्वमेतन्मुद्रिकाभिज्ञानं[३६] दर्शयित्वा तत्पितृव्याकरणछद्मना तां युवतीं द्रुतमत्रानय । अथ सैषा [३७]कपटपाटवोपेता चेट्यपि तथैव कृत्वा नर्मदासुन्दरीं तत्रानयामास । वेश्यया च सा भूमिगृहे गुप्तीकृता । अथ निजस्थानं समागतेन वीरदासेन नर्मदामनालोक्य व्याकुलीभूय नगरमध्ये सा [३८]गवेषिता परं तां निर्भाग्यो लक्ष्मीमिव कुत्राप्यलब्ध्वा स हरिणीगृहे समागतः, तेन तस्यै बहुधा पृष्टं परमनृतैकखन्या[३९] तया सत्यं न जल्पितम्, भूरि दिवसानन्तरं नर्मदा-गवेषणश्रान्तः, शोकाकुलमानसः स ततो निःसृत्य भृगुकच्छपुरे समायातः ।

अथ तत्रैको जिनदासाभिधानः [४०]परोपकारैकदक्षः श्राद्धवर्यो वसति, तत्पुरतो दुःखितेन वीरदासेन निजसकलोऽपि वृत्तान्तः कथितः, तदा तेनोक्तम्-हे

बन्धो ! त्वं खेदं मा कुरु, अहं बुद्धिप्रयोगेण निश्चितं नर्मदां समानयिष्या-मीत्युक्त्वा [४१]दयार्द्रान्तःकरणेन तेन क्रयाणकैः प्रवहणानि पूरितानि, प्रस्थितश्च स बब्बरकुलं प्रति ।

इतो वीरदासगमनानन्तरं वाराङ्गनया सा नर्मदा भूमिगृहाद् बहि-र्निष्कासिता । कथितं च तस्यै त्वमथ वाराङ्गनाचारमङ्गीकुरु, भुङ्क्ष्व च वियोगरहितानि विषयसुखानि । नर्मदया तु तत्कथमपि नाङ्गीकृतम्, वेश्यया पञ्चशतकशाप्रहारैस्ताडितापि सा स्वकीयशीलभङ्गं कर्त्तुं मनसाऽपि नेच्छेत्, इतः दैवयोगेन[४२] नर्मदाशीलमाहात्म्यतस्तद्दिने एव हरिणी मृता । तदा भीताभि-रन्याभिस्तत्परिवारवेश्याभिः सा नर्मदा गृहान्निष्कासिता । इतश्च राज्ञा तद्रूपादि श्रुत्वा तदानयनार्थं निजप्रधानपुरुषप्रेषणपूर्वकं सुखासनिका मुक्ता । अथ नर्मदा स्वशीलरक्षणार्थं बुद्धिमुपार्ज्य कृत्रिमग्रथिलत्वमङ्गीकृत्य सुखासनिकाम-वगणय्य तैः सार्द्धं चलिता । मार्गे च ग्रथिलेवानेकविधानि कुतूहलानि कुर्वन्ती पङ्किलमेकं [४३]पल्वलं दृष्ट्वा तत्र पतित्वा शरीरे च कर्दमलेपं कृत्वा लोकानां पुरः कथयति । भो लोका ! यूयं पश्यताहं मम शरीरे कस्तूरिकालेपं करोमि, किं च यः कोऽपि जनः समीपे समायाति, तं प्रति सा कद्र्दममुच्छालयति हस्ताभ्यां च धूलिमुत्पाट्य स्वशिरसि निःक्षिपति लोकांश्चैवं धूलिधूसरान् विदधाति, ततः प्रधानपुरुषै राज्ञोऽग्रे तस्या ग्रथिलत्वं ज्ञापितं, राज्ञा [४४]मान्त्रि-कानाहूय नानाप्रकारमन्त्रतन्त्रादिप्रयोगः कारितः, तेन त्वेषा सविशेषं स्वकीयग्रथिलतां प्रकटीकृत्य धूलिपाषाणादीनक्षिपत् । अथ तां ग्रथिला ज्ञात्वा राज्ञाऽपि सा त्यक्ता, अथ सा नागरडिम्भादिभिरुपद्रुता[४५] निजग्रथिलतां प्रकटयन्ती नगरमध्ये परिभ्रमति ।

इतोऽसौ जिनदासश्रेष्ठी प्रवहणयुतो बब्बरकुले समागत एव डिम्भगणैः परिवेष्टितां जिनस्तवनान्युच्चारयन्तीं इतस्ततः परिभ्रमन्तीं ग्रथिलां नर्मदां विलोकयामास, श्रेष्ठिना चिन्तितम्, नूनमेषा ग्रथिला नास्ति, श्रेष्ठिना तस्यै प्रोक्तम्, हे पुत्रि ! त्वं मा भयं कुरु, इति श्रुत्वा नर्मदया शिशवो [४६]भापयित्वा दूरं निष्कासिताः, तदा श्रेष्ठिना पृष्टम्, हे पुत्रि ! केयं तेऽवस्था, तव पितृव्य-

वीरदासकथनतोऽहं भृगुकच्छनगरवास्तव्यो जिनदासनामा श्रेष्ठी ते शुद्ध्यर्थमेवात्रायातोऽस्मि, तत् श्रुत्वा हृष्टा नर्मदा निजोदन्तकथनपूर्वकं बभाण, हे तात! मामस्मात् सङ्कटान्निष्कासय, जिनदासेनोक्तम्, अथ त्वया राजमार्गे नगरनारीपानीयघटाः कर्करादिप्रयोगेण भञ्जनीयाः, अथ तत्सङ्केतपुरस्सरं तौ द्वावपि नगरमध्ये समागतौ तत्र नर्मदा हास्यादिविविधकुतूहलानि कुर्वन्ती नगरनारीशिरःस्थान् कूपोद्धृतजलभृतघटान् [४७]कर्करादिभिर्बभञ्ज, गतश्च राज्ञोऽग्रे नागरजनकृतस्तत्पूत्कारः, राज्ञोक्तमस्ति कोऽपीदृशो नरो य एतां पुरमध्याद्बहिर्निष्कासयेत्, वेश्यामरणतो भीतानां नागराणां मध्ये केनापि तत्कार्यं नाङ्गीकृतम्, तदा जिनदासेनागत्योक्तम्-स्वामिश्चेत्तवाज्ञा तर्हि द्वीपान्तरगमनोत्सुकोऽहमेनां प्रवहणे समारोप्य द्वीपान्तरे नयामि, राज्ञा तु हर्षेण नगरजनप्रियं तत्कार्यं तस्मै समर्पितम्।

अथ जिनदासेन नृपाज्ञया लोकानां दर्शनाय बलात्कारेण तस्याश्चरणौ हस्तौ च बद्ध्वा [४८]निगडितौ सा प्रवहणमध्ये मुक्ता। वाहितानि च प्रवहणानि, पथि तया सर्वग्रथिलतां त्यक्त्वा स्नानं कृत्वा जिनदासदत्तवस्त्राभूषणानि परिहितानि, क्रमेण प्रवहणानि भृगुकच्छे प्राप्तानि मीलिता च नर्मदा निजपितृव्याय। पितृव्योऽपि हृष्टः सन् जिनदासस्य महोपकारं मन्यमानस्तया सह नर्मदापुर्यां समागतः। तां दृष्ट्वा सर्वमपि कुटुम्बं प्रमुदितम्, तयाऽपि सर्वं निजविडम्बनं कुटुम्बाग्रे प्रकटीकृतम्।

अथैकदा ज्ञानी मुनिरेकस्तत्र समायातः, तं प्रति वन्दनार्थं सर्वे गताः। देशनान्ते नर्मदापित्रा पृष्टम्, हे भगवन्! केन कर्मणा नर्मदा दुःखिनी जाता, मुनिनोक्तम्-सा पूर्वभवे नर्मदा नद्यधिष्ठायिका देव्यासीत्। एकदा शीतादिपरिषहसहनार्थं साधुरेकस्तत्र समायातः, तं दृष्ट्वा मिथ्यात्वभावेन तया तस्योपसर्गाः कृताः, परं साधुं निश्चलं ज्ञात्वा तं क्षामयित्वा सम्यक्त्वमङ्गीकृतम्। ततश्च्युत्वेयं तव तनया नर्मदासुन्दरी जाता, भवान्तराभ्यासतस्तद्गर्भोत्पत्तिसमये तस्या मातुर्नर्मदानदीस्नानदोहदो जातः, साधूपसर्गकरणतस्तया च दुःखं प्राप्तम्, इति श्रुत्वा नर्मदया जातिस्मरणं प्राप्य दीक्षा गृहीता, एकादशाङ्गानि

[४९]अधीत्य विविधतपसा शरीरशोषं विधायैकदा सा परिवारयुता चन्द्रपुरी समागता, महेश्वरदत्तोपाश्रये च स्थिता श्वश्रूश्वसुरभर्त्रादीनुपलक्ष्य धर्मं श्रावयति, परं ते तां नोपलक्षयन्ति, अथैकदा तया महासत्या स्वरलक्षणादीनि ज्ञायन्ते, तत् श्रुत्वा महेश्वरेण चिन्तितम्, यद्येवंविधं वर्णनं शास्त्रमध्ये वर्त्तते, तदा नूनं मया सा निरपराधा प्रिया परित्यक्ता, इति चिन्ताकुलहृदयेन तेन पृष्टम्, हे महासति ! उक्तज्ञानयुक्ता मयैका निर्दोषा मम स्त्री परित्यक्ता। साऽथ कीदृशी भविष्यति। साध्व्योक्तम्, त्वं खेदं मा कुरु, सैवैषाहं नर्मदासुन्दर्यस्मीत्युक्त्वा [५०]प्रतीत्यर्थं तया सर्वोऽपि सङ्केतितवृत्तान्तः कथितः, अथ तामुपलक्ष्य महेश्वरेण क्षमा याचिता, साध्व्योक्तम्–नैष तव दोषः, मम कर्मणामेवायं दोषः, ततो महेश्वरऋषिदत्ते वैराग्यतो दीक्षां जगृहतुः, क्रमेण ते त्रयोऽप्यनशनं कृत्वा देवलोके गताः। भवेनैकेन च मोक्षं गमिष्यन्ति।

**॥ इति श्री शीलकुलके नर्मदासुन्दरी कथा सम्पूर्णा ॥**

**: अभ्यास :**

प्रश्न. १. ऋद्रदत्तेन किदृशी स्त्री दृष्टा ?

२. सुन्दर्याः को दोहदो जातः ?

३. ऋषिदत्ता किं चिन्तयन्ती विलापं कर्तुं लग्ना ?

४. पथि गच्छतः कस्योपरि तस्याः निष्ठीवनं पतितं तेन किं उक्तं ?

५. केन कारणेन महेश्वरदत्तस्य नर्मदोपरि शंका जाता ?

६. नर्मदासुन्दरी वने किदृशं पुच्चकार ?

७. वारांगनया केन छद्मना नर्मदासुन्दरी स्वगृहे आनीता ?

८. नर्मदया शीलरक्षार्थं किं कृतम् ? नर्मदा केन कर्मणा दुखिनी जाता ?

९. नर्मदासाध्व्यामहेश्वरदत्तस्य अग्रे किं व्याख्यातम् ?

१. ग्रैथिल्यं-नपुं.-ઢીલાપણ ॥ २. युवांश्चासौ जनश्च युवजनः (वि.पू.क.)। युवजनैः स्पृहणीयं युवजनस्पृहणीयं (तृ.त.पु.) युवजनस्पृहणीयं च तद् यौवनम् (क.धा.) युवजनस्पृहणीययौवनम् तस्य अवस्था (ष.त.) युवजनस्पृहणीययौवनावस्था ताम्। ३. मिथ्यात्वम् एव तिमिरः मिथ्यात्वतिमिरः। (અવધા. पू.क.) मिथ्यात्वतिमिरेण

अन्धभूताः मिथ्यात्वतिमिरान्धभूताः (तृ.त.पु.) तेभ्यः मिथ्यात्वतिमिरान्धभूतेभ्यः । મિથ્યાત્વરૂપી તિમિરથી અંધ થયેલાઓને । ४. माता च पिता च पितरौ (એકશેષ) तस्याः पितरौ तत्पितरौ (षष्ठी. त.) ताभ्याम् - तत्पितृभ्याम् । તેના માતાપિતા વડે. ५. चेतनस्य भावः-चैतन्यम् (तद्धित.) गतम् चैतन्यम् यस्य सः गचतैचन्य (બહુ.) ६. अश्रावकः श्रावकः इव भूत्वा श्रावकीभूय । ( च्वि. ) कपटेन श्रावकीभूय कपटश्रावकीभूय (तृ.त.) કપટથી શ્રાવક થઈને । ७. क्रयाणक-નપું.કરીયાણું । ८. शशिनः लेखा शशिलेखा । (ष.त.) ચંદ્રની કળા. ९. मातुल-પું. મામા । १०. घोरश्चासौ सागरश्च घोरसागरः (वि.પૂ.ક.) मिथ्यात्वम् एव घोरसागरः मिथ्यात्वघोरसागरः (અવ.પૂ.ક.) तस्मिन्-मिथ्यात्वघोरसागरे । (મિથ્યાત્વરૂપી ઘોરસાગરમાં ११. जिनेन प्रोक्तः धर्मः जिनधर्मः । (મ.લો.સ.) एकं च तद् यानपात्रं च एकयानपात्रम् । (वि.પૂ.ક.) जिनधर्मः एव एकयानपात्रम् जिनधर्मैकयानपात्रम्- (અવ.પૂ.) तस्मिन् । જિનધર્મરૂપ એક યાનપાત્રમાં १२. दिवा અવ્ય-दिवसे । १३. निष्ठीवनं નપું-થૂંક । १४. तूर्णम्- અવ્ય- જલદી ॥ १५. मम मुखम् मन्मुखम् (वि.પૂ.ક.) तस्मात् मन्मुखात् । મારા મુખમાંથી ॥ १६. प्रवहणम् आरूढः प्रवहणारूढः । (द्वि.त.) વહાણ પર ચડેલો (પ્રાપ્તિ અર્થમાં દ્વિતીયા) ॥ १७. मषेण अङ्कितम् मषाङ्कितम् (तृ.त.) गुह्यञ्च तद् स्थानञ्चगुह्यस्थानम् । (वि.પૂ.ક.) मषाङ्कितम् गुह्यस्थानम् यस्य सः-मषाङ्कित गुह्यस्थानः । મષથી અંકિત ગુહ્યસ્થાનવાળો ॥ १८. एतादश् वि.-એવા પ્રકારની ॥ १९. जलानि च इन्धनानि च जलेन्धनानि । (ઇ.દ્વ.) जलेन्धनानि आदौ येषान्ते-जलेन्धनादयः । (બ.હુ.) जलेन्धनादीनाम् ग्रहणम् जलेन्धनादिग्रहणम् (ष.त.) जलेन्धनादिग्रहणस्य इच्छुं (ष.त.) जलेन्धनादिग्रहणेच्छुः । પાણી ઈન્ધનાદિ ગ્રહણ કરવાની ઈચ્છાવાળો ॥ २०. अनिधानं निधानं इव करोमि निधानीकरोमि ( च्वि. ) ॥ २१. यमस्य किङ्करि यमकिङ्करि (षष्ठी) तस्याः भावाः यमकिङ्करित्वम् । (तद्धित) યમરાજનું દાસપણું ॥ २३. कदलीनाम् दलानि कदलीदलानि । (ष.त.) कोमला चासौ शय्या च कोमलशय्या (वि.પૂ.) कदलीदलानाम् कोमलशय्या कदलीदलकोमलशय्या । (ष.त.) तस्याम् કેળનાં પાંદડાંની કોમલ શય્યામાં ॥ २३. आन्दोलितकदली-दलालिभिः-કેળના પાંડાંદાનાં સમૂહને ડોલાવનાર ॥ २४. प्र + पल ધાતુ प्रपलाय्य- ભાગીને (સં.ભૂ.કૃ.) ॥ २५. निशायाम् चरतीति निशाचरः- પું. રાક્ષસ ॥ २६. हृदयस्य आस्फोटः हृदयास्फोटः । (ष.त.) हृदयास्फोटम् यथा स्यात् तथा (કિ.વિ.) છાતી કૂટવાપૂર્વક ॥ २७. दीर्घाश्च उष्णाश्च - दीर्घोष्णाः । (ઇ.દ્વ.) दीर्घोष्णाश्चामी निश्वासाश्च ( वि.पू.क. ) दीर्घोष्णनिश्वासाः । तान् લાંબા અને ગરમ નિસાસાને ॥ २८. चेतना सह वर्तते या सा सचेतना । (બહુ.) असचेतना सचेतना इव भूत्वा । (च्वि.) सचेतनीभूय ચેતનવાળી થઈને. २९. संसारः एव सागरः संसारसागरः ।

(અવધારણ) संसारसागरस्य तरणम् संसारसागरतरणम् (ष.त.) एकञ्चतद्यानपात्रञ्च एकयानपात्रम् । (वि.પૂ.ક.) संसारसागरतरणे एकयानपात्रम् - (ष.त.) संसारसागर-तरणैकयानपात्रं तेन निभः संसारसागरतरणैकयानपात्रनिभः । आगम्यते आत्मा अनेन आगमः । जिनस्य आगमः जिनागमः संसारसागरतरणैकयानपात्रनिभश्चासौ जिनागमश्च संसारसागरतरणैकयानपात्रनिभजिनागमः । तस्मिन् । સંસારરૂપી સાગરને તરવા માટે યાન પાત્રસમાન જિનાગમમાં. ३०. आदौ दृष्टा पश्चात् उपलक्षिता दृष्टोपलक्षिता । પહેલાં જોવાઈ પછી ઓળખાઈ ॥ ३१. प्राभृत-નપું. ભેટણું ॥ ३२. रूपेण जिताः रूपजिताः । निर्गता जरा यस्य सः निर्जरः । निर्जरस्य अङ्गनाः निर्जराङ्गनाः । रूपजिताः निर्जराङ्गनाः यया सा रूपजितनिर्जराङ्गना । રૂપથી જીતી છે દેવાંગનાઓને જેણે. ॥ ३३. लवणिमा-સ્ત્રી લાવણ્ય. ॥ ३४. नगरे भवाः-नागराः (तिद्धि) नागराश्चामी पुरुषाश्च नागरपुरुषाः (वि.પૂ.ક.) तेषाम् वशीकरणम् निखिलनागरपुरुषवशीकरणम् । लवणस्य भावः लवणिमा । एकश्चासौ लवणिमा च एकलवणिमा । निखिलनागरपुरुषवशीकरणे एकलवणिमा यस्याः सा निखिलनागरपुरुषवशीकरणैकलवणिमा સમસ્ત નગરના પુરુષોને વશ કરવા માટે શ્રેષ્ઠ સૌંદર્યવાળી ॥ ३५. एक- વિ. શ્રેષ્ઠ. ३६. मुद्रिकया अभिज्ञानम् - मुद्रिकाभिज्ञानम् વીંટી વડે ઓળખાણ. ३७. पटोः भावः पाटवम् कपटस्य पाटवम् कपटपाटम् (ष.त.) तेन उपेता-कपटपाटवोपेता । (तृ.त.) કપટની હોશિયારીથી યુક્ત એવી ॥ ३८.गवेष् - ૧૦મો ગણ (ક.ભૂ.) શોધવું ॥ ३९. एका चासौ खनी च - एकखनी अनृतस्य एकखनी अनृतैकखनी । (ष.त.) तया અસત્યની જ ખાણ ॥ ४०. परोपकारे एकदक्षः - परोपकारैकदक्षः । (स.त.) પરોપકારમાં હોંશિયાર ॥ ४१. दयया आर्द्रम् - दयार्द्रम् । दयार्द्रम् अन्तःकरणम् यस्य सः दयार्द्रान्तःकरणः (બહુ.) तेन । દયાથી ભીના હૃદયવાળો ॥ ४२. दैवस्य योगः-दैवयोगः तेन । ભાગ્ય યોગે ॥ ४३. पल्वल-નપુ. ખાબોચિયું. ४४. माम् त्रायते मन्त्रम् । मन्त्राणि वेत्ति-मान्त्रिकाः । तान् મન્ત્ર જાણનારાઓને ॥ ४५. डिम्भ-પું. બાળ ॥ ४६. भा ધાતુ ૩જો ગણ પરસ્મૈ પ્રેરકસંબં. ભૂ.કૃ. બીવડાવીને । ४७. कर्कर-પું.કાંકરો ॥ ४८. निगडित-ભૂ.કૃ.બેડી પહેરાવી. ४९. अधि + इ - ૨જો ગણ આત્મને. સંબં. ભૂ.કૃ. ભણીને ॥ ५०. प्रतीति स्त्री.- ખાતરી ॥

• • •

## [ १९ ]

# ॥ श्रीअक्षयतृतीया कथा ॥

प्रणिपत्य प्रभुं पार्श्वं श्रीचिन्तामणिसञ्ज्ञकम् ।
अक्षयादितृतीयाया व्याख्यानं[1] लिख्यते मया ॥१॥

उसभस्सयपारणए, इक्खुरसो आसि लोगनाहस्स ।
सेसाणं परमान्नं,[2] अमियरससरिसोवमं आसी ॥२॥

इहादौ श्रीऋषभस्वामिसम्बन्ध उच्यते, श्रीऋषभस्वामी सर्वार्थ-सिद्धविमानात् च्युत्वा आषाढवदिचतुर्थ्यां श्रीमरुदेवाकुक्षावुत्पन्नः, नवमासान् चतुर्दिनाधिकान् गर्भे स्थित्वा चैत्रवद्यष्टम्यामर्धरात्रे जन्म सम्प्राप्तः, विंशति-पूर्वलक्षाणि कुमारपदं भुक्त्वा त्रिषष्टिपूर्वलक्षवर्षं राज्यं प्रपाल्य चैत्रवद्यष्टम्यां दीक्षां जग्राह, तदा हस्तिनापुरे श्रीबाहुबलिपुत्रस्य श्रीसोमयशोनृपस्य पुत्रः श्रेयांस आसीद् । अथ भगवान् प्राक्तनकर्मोदयाद् वर्षं यावद् आहारालाभाद् निराहारो विहरन् हस्तिनागपुरे समाययौ, तस्यां रात्रौ श्रेयांसादिभिः त्रिभिस्त्रयः स्वप्ना लब्धाः, तथाहि-श्यामीभूतं मेरुममृतघटैः प्रक्षाल्याहमुज्ज्वलमकार्षमिति श्रेयांसो लब्धवान् १, तथा सूर्यबिम्बात् च्युतं किरणसहस्रं श्रेयांसेन सूर्यबिम्बे स्थापितमिति स्वप्नं सुबुद्धिनामा श्रेष्ठी लब्धवान् २, तथा एकः शूरो बहुभिः वैरिभिः रुद्धः, श्रेयांससाहाय्याद् जयं प्राप्तवान् इति स्वप्नं च सोमयशाः राजा लब्धवान्[3], प्रातः सभायां सर्वेऽपि मिलिताः स्वं स्वं स्वप्नमुक्तवन्तश्च, ततः स्वप्नविचारं कृत्वा नृपादिभिः सर्वैरपि उक्तम्-अद्य श्रेयांसस्य कश्चिदपूर्वो महान् लाभो भविष्यतीति ।

तदा भगवान् भिक्षार्थम् इतस्ततो भ्रमन् श्रेयांसगृहमाययौ, श्रेयांसः स्वामिनं दृष्ट्वा हर्षं प्राप्तः, लोकास्तु पूर्वं साधुमुद्राया अदर्शनेन अन्नदान-विधेरज्ञानाद् भगवन्तं मणिस्वर्णगजाश्वादिभिर्निमन्त्रयामासुः, भगवांस्तु

तैर्दीयमानं वस्तु किमपि न गृह्णाति स्म, तदा भगवानस्माकमुपरिअतीव रुष्टोऽस्ति, येनास्माकं किमपि वस्तु न गृहित इति ते लोका: कोलाहलं चक्रुः। एवमेक: [३]संवत्सरो व्यतिक्रान्तः।

तस्मिन्नवसरे श्रेयांसो भगवन्मुद्रां विलोक्य 'अहो दृष्टं मया ईदृग्रूपं कदाचिद्' इति ऊहापोहं कुर्वाणो जातिस्मरणं ज्ञानं प्राप्य भगवता सह स्वस्याष्टभवसम्बन्धं च ज्ञात्वा प्राक् स्वयमनुभूतं साधुभावं स्मृत्वा चिन्तयति स्म-अहो अज्ञानविजृम्भतमेतत् संसारिजीवानां येनैते एवं कुर्वन्ति यतः त्रैलोक्यराज्यं तृणाय मन्यमानो भगवान् विषयतृष्णां त्यक्त्वा सांसारिकसुखं च किम्पाकफलतुल्यं गणयन् साधुत्वमङ्गीकृत्य मोक्षसुखार्थं यतमानोऽनेकानर्थ-मूलकारणं परमाणुमात्रमपि परिग्रहं न वाञ्छति किं पुनः मणिस्वर्णकन्याश्व-गजमौक्तिकादिकमिति सम्यग् विचार्य [४]गवाक्षादुत्तीर्य यत्र श्रीऋषभदेवस्तत्र समागत्य हर्षभरेण पुलकितशरीरो भगवन्तं [५]त्रिःप्रदक्षिणीकृत्य वन्दित्वा उवाच-हे भगवन् ! प्रसन्नो भव, अष्टादशकोटाकोटिसागरोपमाणि यावद् विच्छिन्नस्य [६]प्रासुकाहारदानविधेः सम्यक् प्रदर्शनेन भव्यजन्तून् निस्तारय, गृहाण च मद्गृहे प्राभृतार्थं समागतान् शतसङ्ख्यान् इक्षुघटान् इति।

अथ स्वामिनाऽपि चतुर्ज्ञानयुक्तेन द्रव्यक्षेत्रादिसामग्रीं सम्यग् ज्ञात्वा इक्षुरसग्रहणाय करद्वयं प्रसारितम्, तदा श्रेयांसो रत्नपात्रतुल्याय श्रीमद्भगवते त्रिकरणशुद्ध्या इक्षुरसरूपं निर्दुष्टमाहारं ददानो हर्षभरेण स्वचित्ते शरीरे च न ममौ, आत्मानं धन्यं मन्यमानः त्रिजगत्पूज्येन भगवता आहारग्रहणेनानु-गृहीतोऽहमिति चिन्तयन् यावत् स्वहस्तेन इक्षुरसभृतैर्घटैर्भगवन्तं प्रीणयन् तिष्ठति, तावद् देवैर्हर्षफरेणाकाशे पञ्च दिव्यानि प्रकटीकृतानि।

एतदेवाह श्रुतकेवली भगवान् भद्रबाहुः 'उसभस्स उ पारणए'इत्यादि, गाथा पूर्वं दर्शिता, अथ गाथार्थः-ऋषभस्य लोकनाथस्य प्रथमतीर्थंकरस्य प्रथमपारणके इक्षुरस आसीद्, एतच्च भगवतः पारणकं श्रेयांसगृहे वैशाखशुक्लतृतीयायामभूद्। तद्दानस्य अक्षयसुखजनकत्वेन तद्दिनस्याक्षय-तृतीया इति प्रसिद्धिर्बभूव, शेषाणामजितादित्रयोविंशतितीर्थकराणाम-

मृतरससदृशोपमममृतरसतुल्यं परमान्नं[७] घृतखण्डमिश्रितक्षैरेयीरूपं भोजनकं पारणके आसीद् इति प्रथमगाथार्थः। अथ पञ्चदिव्यानि एव आह-

**घुट्ठं च अहो दाणं, दिव्वाणि य आहयाणि तूराणि।**
**देवा वि सन्निवइया, वसुहारा चेव वुट्ठा य ॥२॥**

गाथार्थः- यदा श्रेयांसगृहे भगवता पारणकं कृतं तदा देवैः अहोदानमहोदानमिति घुष्टम्-उद्घोषणा कृता, तथा देववृन्देन दिव्यानि [८]तूर्याणि वादित्राणि[९] आहतानि-वादितानि, आकाशे [१०]बधिरितदिक्चक्र देवदुन्दुभयो नेदुरित्यर्थः, तथा देवाः-तिर्यग्जृम्भकादयोऽपि सन्निपतिताः-आगता, तथा वसुधारा च वृष्टा सार्धद्वादशकोटिमितसौवर्णिकादिवृष्टिरभूदित्यर्थः। उपलक्षणात् सुगन्धिजलवृष्टिः सुगन्धपुष्पवृष्टिश्चाभूदिति ज्ञेयम्, एतदेव स्पष्यति-

**भवणं धणेण भुवणं, जसेण भयवं रसेण पडिहत्थो।**
**अप्पा निरुवमसुखं, सुपत्तदाणं महग्घवियम् ॥३॥ इति।**

गाथार्थः-दानावसरे भवनं-श्रेयांसगृहं धनेन-स्वर्णरत्नादिमयेन भृतमिति शेषः, भुवनम्-स्वर्गमृत्युपाताललोकरूपं यशसा भृतम्-अहो! श्रेयांसकुमारेण त्रिजगत्पतये केनाऽप्यदत्तपूर्वं दानं दत्तमिति त्रिलोकीव्यापिनी तस्य कीर्तिरभूदिति भावः, भगवान् ऋषभस्वामी इक्षुरसेन प्रतिहस्तः-लाभभागभूद्, संयमलाभस्य इक्षुरसाहारपूर्वकत्वाद्, आत्मा श्रेयांसजीवो निरुपमं सुखं प्राप्तवान्, अतः सुपात्रादानं महाप्रशस्यम्।

**रिसहेस समं पत्तं, निरवज्जं इख्खुरससमं-दाणं।**
**सेयांससमो भावो हविज्ज जई मग्गियं हुज्जा ॥४॥**

इयं गाथा स्पष्टार्था।

ननु त्रैलोक्यपूज्यस्यापि भगवतः कथमेतावान् अन्तरायोऽजनिष्ट ? तत्रोच्यते-[११]प्राक्कृतकर्मोदयाद्, तथाहि-कस्मिंश्चित् प्राग्भवे ऋषभस्वामिजीवेन पथि व्रजता धान्यखले[१२] धान्यं भक्षयतो बलीवर्दान् तोदनेन[१३] [१४]कर्षु-

कैस्ताड्यमानान् विलोक्य चिन्तितम्, एते मूढा वृषभमुखेषु शिक्यबन्धनं[१५] न जानते तस्मिन् क्षणे स्वयं तत्र स्थित्वा स्वहस्तेन वृषभमुखेषु तद्बन्धनोपदेशश्चक्रे, तदानीं च बलीवर्दैः निःश्वासानां षष्ट्यधिकत्रिशती (३६०) मुमुचे, तस्मिन् कर्माणि उदिते सति भगवानत्र भवे वर्षमेकं यावद् आहारविघ्नं लेभे, तस्मिन् कर्मणि क्षयोपशमं च प्रापिते श्रेयांसदत्तमाहारं लब्धवान्, श्रेयांसश्च तद्दानफलेन मुक्तिसुखभाग् बभूव, तद्दिनादेव साधुभ्यः प्रासुकाहारदानविधिः सर्वैरपि लोकैरज्ञायि । ततश्च भगवान्, ऋषभदेवो वर्षाणामेकसहस्रं यावत् छाद्मस्थ्येन विहृत्य तपस्तप्त्वा घातिकर्मचतुष्टयं क्षपयित्वा केवलज्ञानं प्राप्य वर्षसहस्रोन-पूर्वलक्षं यावदार्यक्षेत्रेषु विहृत्य बहुभव्यान् प्रतिबोध्य मोक्षं जगाम इति श्रुत्वा भो भव्याः ! रत्नत्रयात्मके मोक्षमार्गे बह्वादरेण यतध्वम् इति श्रेयः ॥

**अक्षयादितृतीयाया, व्याख्यानं वीक्ष्य प्राक्तनम् ।**
**अलेखि सुगमं कृत्वा, क्षमाकल्याणपाठकैः ॥१॥**

**इति अक्षयतृतीयाव्याख्यानं सम्पूर्णम् ॥**

**: अभ्यास :**

प्रश्नः १. श्रेयांसादिभिः त्रिभिः के त्रयः स्वप्नाः दृष्टाः ?

२. भगवान् ऋषभदेवः कस्मात् कारणात् उपवासमकरोत् ?

३. श्रेयांसेन केन द्रव्येण भगवान् प्रतिलाभितः,
भगवता च कथं भिक्षा गृहीता ?

४. पञ्च दिव्यानि कानि ?

५. केन कारणेन भगवता आहारं न लब्धम् ?

१. અહીં અક્ષયાદિમાં જે આદિ લખ્યું છે તે પ્રસ્તુત ચરિત્ર કર્તાશ્રીએ આ સાથે અન્ય પણ કથાઓને લખવાની ભાવના સાથે શરૂ કર્યું હશે તેથી આદિ લખ્યું જણાય છે. २. परमान्न नपुं-ખીર ॥ ३. संवत्सर पुं.-वर्ष ॥ ४. गवाक्ष पुं. ઝરૂખો ॥ ५. अप्रदक्षिणां प्रदक्षिणां कृत्वा प्रदक्षिणीकृत्य (च्वि) પ્રદક્ષિણા કરીને ॥ ६. प्रासुक पुं. શુદ્ધ ॥ ७. घृतञ्च खण्डञ्च घृतखण्डे । [द्वन्द्व]घृतखण्डाभ्यां मिश्रिता घृतखण्ड-

मिश्रिता । [तृ. तत्पुं.] घृतखण्डमिश्रिता क्षैरेयी घृतखण्डमिश्रितक्षैरेयी । [वि. पू. कर्म] घृतखण्डमिश्रिताक्षैरेयी रूपं यस्मिन् तद् घृतखण्डमिश्रितक्षैरेयीरूपं । [ब्र.वी.] घी खांडथी मिश्रितखीर२३५ ॥ ८. तूर्य नपुं.-वार्जित्र ॥ ९. आहत वि-वगाडायेल. वगाडायुं. १०. दिशाञ्चक्रम् दिक्चक्रम् । [ष. तत्पु.] बधिरितं दिक्चक्रुं याभिः ताः बधिरितदिक्चक्रः । [सभा. બહુ.]११. प्राक् कृतम् प्राक्कृतम् । [वि. पू. कर्म] प्राक्कृतञ्च तद् कर्म च प्राकृतकर्म । [वि. पू. कर्म.] प्राक्कृतकर्मणः उदयः प्राक्कृतकर्मोदयः । तस्मात् प्राक्कृतकर्मोदयात् । [ष. तत्पु.] પહેલાં કરાયેલા કર્મના ઉદયથી ॥ १२. धान्यखल नपुं.-અનાજને રાખવાના ખળા [જગ્યા]॥ १३. तोदन नपुं. લાકડી, પરોણો ॥ १४. कर्षुक पुं.-ખેડૂત. १५. शिक्य नपुं. - शीકું ॥

• • •

# [ २० ]

## ॥ श्रीचैत्रीपूर्णिका कथा ॥

**तीर्थराजं नमस्कृत्य, श्रीसिद्धाचलसञ्ज्ञकम् ।**
**चैत्रशुक्लपूर्णिमाया, व्याख्यानं क्रियते मया ॥१॥**

**सिज्झो विज्झायरचक्की, नमिविनमिमुणी, पुण्डरीओ मुणिन्दो,**
**वाली पुज्जुम्नसंबो, भरहसुकमुणी सेलगो पंथगो य ।**
**रामो कोडीयपंच, द्रविडनरवइ, नारओ पण्डुपुत्ता,**
**मुत्ता एवं अणेगे, विमलगिरिमहं, तित्थमेयं नमामि ॥२॥**

व्याख्या-अहमेतत् तीर्थं नमामि यत्रानेके प्राणिनः सिद्धा बभुवुः, ते के ? तानाह-यत्र विमलाचले विद्याधरादिचक्रवर्तिनः सिद्धाः-मुक्ति प्राप्ताः, पुनर्युगादिदेवस्य पोषकपुत्रौ नमिविनमिनामानौ मुक्ति गतौ, तत्सम्बन्धोऽयम्- अयोध्यायां नगर्यां भगवान् ऋषभदेवः स्वज्येष्ठपुत्राय भरताय राज्यं दत्त्वाऽन्येषामपि यथायोग्यं देशं विभज्य स्वयं दीक्षां गृहीतवान्, तदा नमिविनमिनामानौ कस्मैचित् कार्याय कुत्रचित् प्रदेशे गतावभूताम्, भगवता तु, [१]राज्यविभागावसरे तौ विस्मृतौ दीक्षाग्रहणानन्तरमयोध्यायां समागतौ भरतं पप्रच्छतुः-ऋषभदेवोऽस्माकं पिता क्वास्ति ? भरतेनोक्तं स्वामिना दीक्षा गृहीता, युवाभ्यां मम सेवा कर्तव्या, अहं युवाभ्यां देशग्रासं[२] दास्यामि, तदा तौ भरतमपमान्य राज्यार्थं स्वामिसमीपे आगत्य विहारं कुर्वतो भगवतोऽग्रे कण्टकादिकं मार्गाद् निवारयन्तौ कायोत्सर्गे स्थितस्य भगवतो दंशमशकादीन् उड्डापयन्तौ प्रातर्वन्दनापूर्वकं, स्वामिन् ! राज्यप्रदो भव इत्युक्तवन्तौ नित्यं तिष्ठतः स्म ।

एकदा वन्दनार्थमागतेन धरणेन्द्रेण तयोरुपरि महतीं कृपां विधाय भगवद्रूपं कृत्वा ताभ्यामष्टचत्वारिंशत्सहस्रपठितसिद्धाविद्याः[३] प्रदत्ताः, षोडश-

विद्यादेव्याः[४] समाराधनं च दत्तम्, वैताढ्यपर्वते दक्षिणश्रेण्यां रथनूपुरचक्रवाल-प्रमुखाणि पञ्चाशन्नगराणि, उत्तरश्रेण्यां च गगनवल्लभप्रमुखाणि षष्टिनगराणि वासयित्वा प्रदत्तानि, तत्र विद्याबलेन लोकान् वासयित्वा यावन्ति नगराणि तावतो देशान् संस्थाप्य तौ पृथक्पृथक् नमिविनमी तत्र राज्यं पालयामासतुः। तौ चिरकालं राज्यसुखमनुभूय प्रान्ते सर्वसङ्गं परित्यज्य दीक्षां गृहीत्वा श्रीविमलाचले समागत्य श्रीदेवाधिदेवं युगादिदेवं भावेनाऽभिनम्य तत्रैव तीर्थे मुक्तिं प्रापतुः, इति नमिविनमिसम्बन्धः

अथ श्रीऋषभदेवस्य प्रथमगणधरः पुण्डरीकनामाऽत्रैव मुक्तिं प्राप्तस्तत्सम्बन्धश्चायम् ।

श्री आदिनाथपुत्रो भरतः, तस्य पुत्रः पुण्डरीकः श्रीप्रभोः पार्श्वे धर्मं श्रुत्वा प्रतिबुद्धः सन् दीक्षां गृहीत्वा प्रथमगणधरो जातः, पञ्चकोटिसाधुपरिवृतः गणधरो ग्रामानुग्रामं विहरन् सौराष्ट्रदेशे समागतः, तदागमनं श्रुत्वाऽनेकभूप-मण्डलीकसामन्तश्रेष्ठि-नरनारी-गणा वन्दनार्थमाययुः, गुरुरपि यथायोग्यं धर्मदेशनां ददाति स्म । तस्मिन्नवसरे एका सबाष्पजला[५] सशोका चिन्तासागरसम्प्रविष्टा दीना महिला समागता, तया सार्धं विधवा दौर्भाग्ययुक्ता एका कन्याऽपि समागता । श्रीपुण्डरीकगणधरं नमस्कृत्यावसरं प्राप्य कन्यया सह सा स्त्री इति पप्रच्छ हे भगवन् ! अनया कन्यया पूर्वभवे किं पापं कृतं येन विवाहसमये [६]करमोचनवेलायामेवास्याः पतिर्मरणं प्राप ? इति प्रश्ने कृते सति गणधरः प्राह-हे भद्रे ! अशुभकर्मणोऽशुभमेव फलम् ।

तथाहि-जन्बूद्विपे पूर्वमहाविदेहे मनोरमं विश्वविख्यातं [७]कैलासपर्वता-कारतुङ्गप्राकारवेष्टितं[८] नानादेशोद्भवजनाकुलं [९]विशालशालगृहैर्मण्डितं चन्द्रकान्तनामकं नगरं बभूव । तत्र श्रियो धाम [१०]सकलकलागुणगणग्रामो जगति प्रसिद्धः समरसिंहो नाम महीपतिरभूद् । तस्य शीलालङ्कारधारिणी धारिणीनाम्नी वल्लभा बभूव । तत्र नगरे महाधनाढ्यः परमश्राद्धो जिनभक्ति-रतोऽनेकगुणसागरो धनावहनामा श्रेष्ठी बभूव । तस्य कर्मयोगाद् द्वे भार्ये बभूवतुः, एका कनकश्रीर्द्वितीया मित्रश्रीस्ताभ्यां भार्याभ्यां सह स श्रेष्ठी सुखेन

कालं गमयति स्म।

अथैकदा [११]मदनपरवशात् कनकश्रीर्मित्रश्रियो वारकं समुल्लङ्घ्य भर्तुः समीपे समागता, तदा भर्त्रा प्रोक्तम्-अद्य वारकं तव नास्ति कथं त्वया मर्यादा लङ्घिता ? सा कामविह्वला भर्तारं प्रत्युवाच केयं मर्यादा ? तदा भर्त्रा प्रोक्तम् कुलोद्भवानां मर्यादोल्लङ्घनं न युक्तं समुद्रोऽपि मर्यादां न मुञ्चति सत्पुरुषः स्वमर्यादया न चलति।

ततः सा सन्तोषरहिता कलुषवदना मित्रश्रियं प्रति द्वेषमुद्वहन्ती स्वगृहे समागता, सपत्न्या सह पतिसम्बन्धवियोगमिच्छंन्ती कनकश्रीः विषय-प्रमादव्याकुला सती मन्त्रतन्त्रयन्त्रोपायकार्मणादिसामग्रीं विधाय तस्याः शरीरं भूतप्रेत-शाकिनी-डाकिनीप्रवेशं कारितवती, साऽपि कर्मयोगात् पारवश्यं[१२] प्राप्ता।

अथ कनकश्रीः सपत्नीशरीरं कुचेष्टितं ज्ञात्वा जहर्ष, पुनः स्ववशी-करणबलेन भर्तारं स्ववशीचक्रे भर्ताऽपि लघुपत्नी दृष्ट्वा पूर्वकर्मफलं विचिन्त्य तत्याज, तदा कनकश्रीर्हर्षिता। धनवाहश्रेष्ठी कनकश्रिया सह विषयसुखं भुञ्जानः सन् कालं निनाय। कियति काले गते सति सा कनकश्रीर्मृता त्वत्पुत्री जाता, सपत्नीपतिवियोगकरणेन विषकन्याकर्मविपाकं [१३]पतिविरहपीडापीडितं भोगसुखरहितं कर्मोपार्जितं, तेन कारणेन तव पुत्री महादुःखेन दुःखिताऽस्ति, कर्मणां विचित्रा गतिरस्ति।

तदा तज्जननी प्राह-हे गुरो ! इयं पतिविरहेण पीडिता वृक्षशाखाया पाशं बद्ध्वा मरणाय समुद्यता, तावद् मया एतत्स्वरूपं दृष्ट्वा पाशं छित्त्वा भवत्समीपे समानीता भवद्भिर्दीक्षा प्रदीयताम्, तदा गणधरः प्राह-हे भद्रे ! एषा तव पुत्री दीक्षायोग्या नास्ति, [१४]नितरां चञ्चलस्वभावा बाला वर्तते इति गुरुवचनं श्रुत्वा तन्माता प्राह-अस्या योग्यं धर्मकृत्यं कथ्यतां येन दुष्कर्मविपाको [१५]दूरीभवेद्। गुरुरपि ज्ञानबलेन तस्या योग्यं व्रतं कथयति स्म हे भद्रे ! चैत्रशुक्लपूर्णिमाऽऽराधनं कुरु, तस्या आराधनेऽस्याः पूर्वकर्मविनाशो भविष्यति, इति श्रुत्वा तस्याः कन्याया अपि गुरुज्ञानयोगाद् रुचिः समुत्पन्ना,

तदा सा [१६]सावधानीभूय गुरुवाणीमश्रुणोद्, तदा गणधरेणोक्तम्-

श्रीसिद्धाचलतीर्थं शाश्वतमस्ति, तत्रानन्तानन्तकालेनानन्ता जीवाः सिद्धाः, सकलतीर्थेषु मुख्यम्, तस्य चैकविंशतिर्नामानि सन्ति, तै र्ध्यानं विधेयम् चैत्रीपूर्णिमादिने शुद्धभावेनोपवासं कृत्वा श्रीजिनालये स्नात्रपूजा महोत्सवादि करणीयम्, सर्वजिनानां पूजा विधेया, सद्गुरुमुखाच्च तस्मिन् दिने चैत्रीव्याख्यानश्रवणं कार्यं [१७]दीनहीनजनेभ्यो दानं देयं, शीलं च पालनीयं, जीवरक्षा विधेया, विधिपूर्वकं विमलगिरिपट्टमुच्चैः स्थापयित्वा मुक्ता-फलैस्तन्दुलादिभिश्च महतीं पूजां विधाय गुरुसमक्षं पञ्चशक्रस्तवादिभिर्देवान् वन्दित्वा शुभध्यानेन दिनरात्रीकृत्यं विधाय पारणवेलायां मुनिभ्यो दानं दत्त्वा पारणकं विधेयम्, पञ्चदश वर्षाणि यावदेवं प्रतिवर्षं व्रतमाराधनीयम्, पश्चादुद्यापनं यथाशक्ति समाचरणीयम्।

तेन निर्धनो धनी भवेद्। पुत्र-कलत्र-सौभाग्य-कीर्तिदेवसुखं शिवपदप्राप्तिश्च भवेद्, तथा स्त्रीणां पतिवियोगो न भवति, रोगशोक-वैधव्य[१८]दौर्भाग्य-मृतवत्सा-परवशतादि सर्वं कर्मफलं नश्यति। अस्या आराधने स्त्री पतिवल्लभा भवति। विषकन्या-भूत-प्रेत-शाकिन्यादि-ग्रहादिकष्टं विलयं याति बहुना किं ? भावेनाऽऽराधिता चैत्रीपूर्णिमा मुक्तिं ददाति। इति गणधरमुखाच्छ्रुत्वा सा बाला हर्षं प्राप उक्तवती चाहमेतद् व्रतं करिष्यामि।

तदा जनन्या सह सा बाला गुरुं नत्वा गृहे गत्वाऽवसरे चैत्रीपूर्णिमा-ऽऽराधनं कृतवती, तदा सा सुखिनी जाता, विषयविकारस्यापि शान्तिः सञ्जाता, परमपदे मनोऽभूद्, प्रतिवर्षं व्रतं कुर्वत्या पूर्णे व्रते शुभभावेनोद्यापनं कृतम्, पुण्डरीकगणधरध्यानेन श्रीसिद्धाचलयात्राकरणेन श्रीऋषभदेवस्य जापेन प्रान्तेऽनशनं विधाय कालं कृत्वा सौधर्मदेवलोके देवत्वेनोत्पन्ना।

तत्र देवसम्बन्धिनो भोगान् भुक्त्वा महाविदेहे क्षेत्रे सुकच्छविजये वसन्तपुरे नरचन्द्रस्य राज्ञो राज्ये ताराचन्द्रश्रेष्ठिनो गृहे तारानाम्न्या भार्यायाः कुक्षौ पुत्रत्वेन स जीव उत्पन्नः नाम्ना पूर्णचन्द्रो द्वासप्ततिकलाकुशलो जातः पञ्चदशकोटिद्रव्यं पञ्चदश भार्याः पञ्चदश पुत्रा इत्यादि सर्वं सुखं प्राप्तवान्,

तद्भवे पुनः स चैत्रशुक्लपूर्णिमाऽऽराधनं कृत्वा, प्रान्ते श्रीजयसमुद्रगुरुपार्श्वे दीक्षां गृहीत्वा, तत्र च शुभध्यानेन केवलज्ञानं प्राप्य मुक्तिं गतः ।

एवं चैत्र्याराधने बहवो जनाः परमानन्दं प्राप्ताः । पुनरपि विमलाचले वालिनामा महामुनिर्मोक्षं प्राप्तः । श्रीकृष्णपुत्रौ शाम्बप्रद्युम्ननामानौ मुनी सिद्धिं गतौ । दशरथपुत्रो भरतोऽपि तत्रैव शिवं प्राप्तः । शुकनामा मुनिः शैलकाचार्य-पन्थकौ च मुक्तिं प्राप्तौ । रामभरत-द्राविडनरपतिनारदाद्या मुनयोऽप्यत्रैव मुक्तिं प्राप्ताः, पाण्डवप्रमुखाः सत्पुरुषा अपि श्रीसिद्धाचले मुक्तिं प्रापुः ।

चैत्रीपूर्णिमादिने उपवासं कृत्वा श्रीसिद्धाचलतीर्थे गत्वा पूजाध्यान-दानादीन् यो प्राणिनः कुर्वन्ति ते नरकतिर्यग्गतिविच्छेदं[19] कुर्वन्ति, इत्यादि पर्वाराधनस्वरूपं प्रोक्तम् । तद्दिने श्रीगुरुपार्श्वाद् मन्त्राक्षरपूतं[20] स्नात्रजलं गृहीत्वा गृहादौ सेचनीयम्, तेन मरकोपद्रवादि भयं याति, सदाऽऽनन्दश्च भवति, ऋद्धि वृद्धि सुखं च जनः प्राप्नोति । अस्मिन् पर्वाणि समागते केचिद् दानं ददति, केऽपि शीलं पालयन्ति, केचिद् भावं भावयन्ति, वक्तॄणां श्रोतॄणां सदा श्रेयो भवतु ।

**नन्द-रस-सिद्धिचन्द्र ( १८६९ ) प्रमिते वत्सरे वरे ।**
**इयं व्याख्या गुणग्राह्या, चैत्रशुक्लाष्टमीतिथौ ।।१।।**
**दुर्गे जेसलमेरौ च, कृतवासेन धीमता ।**
**गणिनाऽमरचन्द्रेण, वाचकेन सुसाधुना ।।२।।**
**तच्छिष्यजीवराजेन, कृता व्याख्या मनोरमा ।**
**चैत्रशुक्लपूर्णिमायाः, कीर्तिरत्नसहायतः ।।३।।**

इति चैत्रशुक्लपूर्णिमाव्याख्यानं समाप्तम् ।

## : अभ्यास :

प्रश्नः

१. नमिविनमि नामानौ युगादिदेवस्य पोषकपुत्रौ कथं प्रभुं असेवेताम् ?

२. कनकश्रियः अपरभवे पतिवियोगः कथं बभूव ?

३. गणधरेण दर्शिता चैत्रीपूर्णिमाया विधिः वर्ण्यताम् ?

४. सा बाला चैत्रीपूर्णिमायाः आराधनया किम् फलं प्राप ?

५. श्रीसिद्धाचले के के सत्पुरुषाः मुक्ति प्रापुः ?

६. अस्माभिः एतद् दिने किं कर्तव्यम् ?

१. राज्यस्य विभागः राज्यविभागः । [ष. तत्पु.] राज्यविभागस्य अवसरः राज्यविभागावसरः तस्मिन् - राज्यविभागावसरे ॥ [ष. तत्पु.] રાજ્યના વિભાગના અવસરોમાં ॥ २. ग्रास - पुं.ભાગ ॥ ३. पठितसिद्धविद्याः ભણતાં જ સિદ્ધ થાય એવી વિદ્યાઓ ॥ ४. सम्यक् च तद् आराधनम् च समाराधनम् । [वि.पू.કર્મ] ५. बाष्पेण सह सबाष्पम् । [सहार्थ बहु.]सबाष्पं जलं यस्याः सा सबाष्पजला । [समा. बहु.] આંસુ રૂપ જલવાળી ॥ ६. करमोचन नपुं. લગ્ન ॥ ७. तुङ्ग वि. ઊંચું ॥ ८. प्राकार पुं. કિલ્લો ९. शाल पुं. દિવાખાનું ॥ १०. सकलाश्चामूः कलाश्च सकलकलाः । [वि. पू. कर्म.] गुणानाम् गणाः गुणगणाः ( ष. तत्पु. ) । सकलकलाश्च गुणगणाश्च सकलकला-गुणगणाः [द्वन्द्व] सकलकलागुणगणानां ग्रामः यस्मिन् सः सकलकलागुणगण-ग्रामः । ( व्यधि. बहु. ) સકલકલાઓ અને ગુણોના સમુદાયોનો સમૂહ જેમાં છે તે. (એવો રાજા) ॥ ११. मदन पुं. કામદેવ. १२. पारवश्य नपुं. પરવશપણું. १३. पत्यु विरहः पतिविरहः । [ष. तत्पु.] पतिविरहस्य पीडा पतिविरहपीडा । ( ष. तत्पु. ) पतिविरहपीड्या पीडितम् पतिविरहपीडापीडितम् तद् । [तृ. तत्पु.] १४. नितरां ( अव्यय ) અતિશય. १५. अदूरः दूरः इव भवेद् दूरीभवेद् । [च्वि.] १६. असावधाना सावधाना इव भूत्वा सावधानीभूय । [च्वि.] १७. दीनाश्च हीनाश्च-दीनहीनाः । [द्वन्द्व] दीनहीनाश्चामी जनाश्च दीनहीनजनाः । [वि. पू. कर्म.] तेभ्यः दीनहीनजनेभ्यः । દીનહીનમાણસોને. १८. वैधव्य नपुं. વિધવાપણું. १९. विच्छेद पुं. નાશ. ॥ २०. पूत वि. પવિત્ર.

• • •

# [ २१ ]

## ॥ श्रीमेरुत्रयोदशीकथा ॥

**मारुदेवं[१] जिनं नत्वा, स्मृत्वा सद्गुरुभारतीम् ।**
**मेरुत्रयोदशोघस्त्र[२]-व्याख्यानं लिख्यते मया ॥१॥**

इहाष्टमहाप्रातिहार्याविराजितेन [३]जगद्गुरुणा श्रीवर्धमानस्वामिना श्रीगौतमादीनामग्रे यथा माघवदित्रयोदश्या माहात्म्यमुक्तं तथा परम्परयाऽऽयातमस्माभिरुच्यते, श्रीऋषभदेवा-ऽजितनाथयोरन्तरे पञ्चाशल्लक्षकोटि-सागरोपमाणि व्यतिक्रान्तानि, तन्मध्ये अयोध्यायां नगर्याम् इक्ष्वाकुवंशयः काश्यपगोत्रीयोऽनन्तवीर्यो नाम राजा बभूव, स च बहुलहस्त्यश्वरथ-पदात्यादिसेनानायकः । तस्य च राज्ञः पञ्चशतानि राज्य आसन्, तन्मध्ये प्रियमती नाम पट्टराज्ञी बभूव, धनञ्जयो नाम चतुर्बुद्धिनिधिर्महामात्यश्च आसीत् । सुखेन राज्यं पालयतो राज्ञ एकदा मनसि महाचिन्ता समुत्पन्ना यदुत्तमो ममैकोऽपि पुत्रो नास्ति, क एतद्राज्यस्य भोक्ता भविष्यति ? पुत्रं विना गृहं शून्यप्रायमिति ।

ततो राज्ञा अनेके उपायाः कृताः परं पुत्रोत्पत्तिर्न जाता । तस्मिन्नवसरे एकदा एकः कोणकनामा साधुराहारार्थं राज्ञो गृहे समागतः, तदा नृपराज्यौ उत्थाय विधिना वन्दित्वा शुद्धाहारेण प्रतिलाभ्य करद्वयं संयोज्य मुनिं पप्रच्छतुः स्वामिन् ! अस्माकं पुत्रो नास्ति स कदापि भविष्यति न वा ? मुनिरुवाच-ज्योतिष्कनिमित्तादिकं मुनिर्न भाषते तदा नृपराज्ञीभ्यां पुनःपुनः प्रार्थनायां कृतायां मनसि दयां धृत्वा मुनिना उक्तम् हे राजन् ! तव पुत्रस्तु भावी परं पङ्गुर्भविष्यति एतदुक्त्वा मुनिर्गतः, तदा भूप-राज्ञीभ्यां चिन्तितम् अस्माकं पङ्गुरपि पुत्रस्तु भावी ।

क्रमेण राज्ञी सगर्भा जाता, पूर्णे काले पङ्गुं पुत्रं प्रासूत । राजा पुत्रजन्म श्रुत्वा हर्षितः सन् महोत्सवं चकार, द्वादशे दिवसे सर्वमपि कुटुम्बं भोजायित्वा

कुमारस्य पिङ्गलराय इति नाम कृतवान्, ततस्तमन्तःपुरे एव ररक्षतुः बहिर्न प्रकटं चक्रतुः । यदा पुनः लोकाः पप्रच्छुस्तदा एवमूचतुः कुमारस्य रूपमत्यद्भुतं वर्तते, मा कदाचिद् [४]दृष्टिदोषो भवेद् इति न [५]प्रादुष्क्रियते । तदा सर्वस्मिन्नपि नगरे एषा प्रवृत्तिः प्रादुर्भूता । यदुत पिङ्गलरायकुमारतुल्यः पृथिव्यामपरः कोऽपि रूपसौन्दर्यवान् नास्तीति ।

अथैवं क्रमेण कुमारो वृद्धिं प्राप्तः । अस्मिन्नवसरे अयोध्यानगरीतः सपादशत (१२५) योजनेषु मलयनामा देशोऽस्ति, तत्र ब्रह्मपुरं नाम नगरम्, तत्र च इक्ष्वाकुवंश्यः काश्यपगोत्रीयः शतरथो नाम राजा तस्य च इन्दुमती नाम्नी पट्टराज्ञी । तत्कुक्षिसम्भवा गुणसुन्दरी नाम पुत्री, सा चातिशयरूपलावण्य-सौभाग्यादिगुणयुक्ताऽभूत् । तस्य राज्ञः पुत्रो नास्ति सैवैका पुत्री आसीद् । अतस्तेन मातापित्रोरतिवल्लभा आसीद् । अत पुत्रीं वरयोग्यां ज्ञात्वा तद्योग्य-वरालाभाच्च राजा [६]तद्विविवाहचिन्तातुरो बभूव ।

तस्मिन्वसरे तन्नगरवासिव्यापारिणः शकटेषु विविधानि क्रयाणकानि भृत्वा देशान्तरं चालितास्तदा राज्ञा तेभ्य उक्तम्-देशान्तरभ्रमद्भिर्भवद्भि-र्गुणसुन्दरीयोग्यवरप्राप्तौ सत्यां विवाहसम्बन्धः कार्यः, इति नृपवचनं श्रुत्वा तथेति प्रतिपद्य ते चलिताः क्रमेण बहूनि नगराणि विलोकयन्तोऽयोध्यां नगरीं प्राप्ताः, तत्र च क्रयाणकानि सर्वाण्यपि विक्रीतानि भूयान् लाभः सञ्जातः, अपराणि तत्रत्यानि क्रयाणकानि सङ्गृहीतानि । यदा ते चलनार्थमुद्यता जातास्तदा स्वनृपवचनं संस्मृत्य तन्नगरवासिलोकानां मुखात् कुमारस्याद्भुतं रूपं श्रुत्वा नृपसमीपं गत्वा कुमारेण सह गुणसुन्दर्या विवाहसम्बन्धं चक्रुः, राज्ञाऽपि शुल्क(कर)मोचनादिना तेषां बह्वादरश्चक्रे ततस्ते हर्षिताः सन्तः स्वदेशं प्रति चेलुः, क्रमेण स्वनगरं गत्वा राज्ञोऽग्रे सर्वं वृत्तान्तं कथयामासुः ।

राजाऽपि कुमारस्याद्भुतरूपसौभाग्यादिगुणान् श्रुत्वा सन्तोषं प्राप्तः अथ यदा कन्या वरयोग्या जाता तदा कुमारस्य आकरणार्थं राज्ञा स्वसेवकाः प्रेषिताः तेऽपि अयोध्यां गत्वा अनन्तवीर्यनृपं प्रोचुः-हे महाराज ! विवाहार्थं कुमारः सत्वरं प्रेषणीयः, इति श्रुत्वा राजा उद्विग्नचित्तः सञ्जातः, ततः सद्यः

उत्थाय स्वमन्दिरे एकान्तदेशे गत्वा राज्ञ्याः प्रधानस्य चाग्रे इत्थमुवाच-अथ किं कर्तव्यम् ? पुत्रस्तु पङ्गुर्वर्तते एतस्य कथं भविष्यति ? पङ्गवे कः स्वकन्यां प्रदास्यति ?

तदा प्रधानमन्त्री किञ्चिद् विचार्य तान् सेवकान् आहूय इत्युवाच-साम्प्रतमिह कुमारो नास्ति [७] तन्मातुलगृहे वर्तते । मातुलगृहं तु इतो द्विशतयोजनेषु मुहनीपत्तने समस्ति तेन साम्प्रतं लग्नं न भवेत्, पश्चाद् ज्ञास्यते । एतत् श्रुत्वा सेवकाः प्रोचुः हे स्वामिन् ! पन्था दूरे वर्तते, लग्नं निर्धार्य देयं स्वयमपि लग्नोपरि समागन्तव्यम् । एतत् सेवकवचनं श्रुत्वा मासषोडशकानन्तरं लग्नं भविष्यति इति निर्धारितम् । ततो लग्नं गृहीत्वा सेवका मलयदेशं गताः ।

अथ राजा अनन्तवीर्यश्चिन्तातुरः सन्नुवाच-अथाऽत्र क उपायः कर्तव्यः ? षोडशमासास्तु सत्वरमेव यास्यन्ति । तदा नृप-राज्ञीप्रधानैर्बह्वी चिन्ता कृत्वा परं कोऽप्युपायो न लब्ध । अस्मिन्नवसरे नगर्युद्याने [८]साधु-पञ्चशतीपरिवृतश्चतुर्ज्ञानधरो गाङ्गिलनामा साधुः समवसृतः, वनपालकेन प्रतिपत्तिं[९] कृत्वा नगरमध्ये गत्वाऽनन्तवीर्यराजाय वर्धापनिका दत्ता राजा तन्मुखात् साध्वागमनं श्रुत्वा तं सन्तोष्य हस्त्यश्वादिबहुऋद्धिसमेतो वन्दनार्थं निःसृतः । क्रमेण तत्र गत्वा विधिना मुनीन् अभिवन्द्याग्रे उपविष्टः, पर्षदः मीलिता, मुनिरुपदेशं ददौ । स च इत्थम्-

**जीवदयाइ रमिज्जइ, इन्दियवग्गो दमिज्जइ सयावि ।**
**सच्चं चेव वदिज्जइ, धम्मस्स रहस्सं इणं चेव ॥१॥**

**जयणा उ धम्मजणणी, जयणा धम्मस्स पालणी चेव ।**
**तह वुड्ढिकरी जयणा, एगंतसुहावहा जयणा ॥२॥**

**आरंभे नत्थि दया, महिलासंगेण नासए बंभं ।**
**संकाए सम्मत्तं नासई, पवज्जा अत्थगहणेण ॥३॥**

**जे बम्भचेरभट्टा, पाए पाडंति बम्भयारीणं ।**
**ते हुंति [१०]टुंटमुंटा, बोही पुण दुलहा तेसिं ।।४।।**

तथा धर्मस्य मूलं दया, पापस्य मूलं हिंसा, एको हिंसां करोति, अन्यः कारयति अपरोऽनुमन्यते एते त्रयोऽपि [११]सदृशपापभाजः । पुनर्यो हिंसां कुर्वन् मनसि त्रासं न प्राप्नोति तस्य हृदये दया नास्ति, यो जीवो निर्दयः सन् बहून् एकेन्द्रियान् विनाशयति स परभवे वातपित्तादिरोगभाग् भवति । यः पुनर्द्वीन्द्रियान् विनाशयति स परत्र मूकः, मुखरोगी, दुर्गन्धनिश्वासश्च भवति, यश्च त्रीन्द्रियाणां विनाशकः स नासिकारोगी भवेत् । चतुरिन्द्रियनविनाशकस्तु अक्ष्णा काणः अन्धो वा, क्लिन्ननेत्रो वा भवेत् । यस्तु पञ्चेन्द्रियविनाशकः स परत्र बधिरो भवति, यः पुनः पञ्चप्रकारानपि जीवान् विनाशयति स भवान्तरे पञ्चापीन्द्रियाणि पटूनि न प्राप्नोति, तस्माद् भो भव्याः ! हिंसाऽनृतादिकं सर्वथा त्याज्यमित्यादिधर्मोपदेशं श्रुत्वा राजा गुरुं पप्रच्छ-स्वामिन् ! मत्पुत्रः केन कर्मणा पङ्गुर्जातः ? तदा गाङ्गिलमुनिरुवाच अस्य प्राग्भावं श्रृणु ।

अस्मिन् जम्बूद्वीपे ऐरवतक्षेत्रे अचलपुरनाम्नि नगरे महेन्द्रध्वजो नाम राजा, उमया पटराज्ञी तयोः सामन्तसिंहो नाम पुत्रोऽभूत् । स च लेखनशालायां पठनाय गच्छन् [१२]द्यूतकृत्सङ्गाद् द्यूतं शिक्षितवान्, क्रमेण सप्तव्यसन-सेवनतत्परोऽभूत् । राज्ञा बहुधा निषिद्धोऽपि यदा व्यसन सप्तकं न तत्याज तदा अयोग्यं ज्ञात्वा स्वदेशाद् बहिर्निष्कासितवान् । ततोऽपि व्यसनमत्यजन् देशाटनं कुर्वन् सुरपुरनगरे समागतः, तत्र चम्पकश्रेष्ठिना सुन्दराकारं विलोक्य उत्तमपुरुषोऽयमिति ज्ञात्वा सुकुमारोऽयम्, अस्मात् कार्यान्तरं न भविष्यतीति च विचिन्त्य स्वगृहपार्श्ववर्तिजिनगृहरक्षार्थं स सामन्तसिंहः स्वगृहे स्थापितः । अथ स दुष्टात्मा जिनाग्रे ढौकितानि [१३]तन्दुलपूगीफलादीनि प्रच्छन्नं गृहीत्वा द्यूतकीडार्थं ययौ । कियद्भिर्दिनैः श्रेष्ठिना तद् ज्ञात्वा तस्मै उक्तम्-हे भद्र ! यः पुमान् देवद्रव्यादिकं भुङ्क्ते सोऽनन्तकालं संसारपरिभ्रमणं करोति, तस्मात् त्वया अतः परमेतत् कार्यं न कर्तव्यम् ।

इत्थं बहुधोपदेशो दत्तस्तथापि स दुष्टो मिथ्यात्वज्ञानतीव्रकर्मोदयाद् न

ततोऽपि विरमति स्म। एकदा [१४]प्रभोश्छत्राद्याभरणानि गृहीत्वा क्वचिद् अनाचारं सेवितवान्, तदा श्रेष्ठिना तत्स्वरूपं ज्ञात्वा गृहाद् बहिर्निष्कासितः ततो वनमध्ये भ्रमन् आखेटकसङ्गेन बहून् मृग-शशकादीन् जन्तून् विनाशयन्नुदरपूर्तिं चकार।

अथ तत्रैव वने तापसाश्रमो विद्यते तत्र बहवस्तापसास्तपस्यां कुर्वन्ति मृगा अपि तत्राऽऽगत्य उपविशन्ति। एकदा एका सगर्भा मृगी तत्राऽऽगच्छन्ती तेन सामन्तसिंहेन तीक्ष्णशस्त्रेण पादेषु प्रहृता तस्याश्चत्वारोऽपि पादाः छिन्नाः, सा अधः पतिता तापसैर्दृष्टा। ततस्तैः सद्यस्तत्राऽऽगत्य धर्मः श्रावितः, सा मृत्वा सद्गतिं[१५] प्राप्ता। ततस्तापसाः सामन्तसिंह प्रत्येवमुक्तवन्तः रे दुष्ट! यथा त्वयाऽस्माकं मृग्याः पादाश्छिन्नास्तथा त्वमपि परत्र पङ्गुत्वं प्राप्नुयाः। इत्थं शापं दत्त्वा ते स्वाश्रमं जग्मुः॥

सामन्तसिंहोऽपि तापसान् क्रुद्धान् दृष्ट्वा भीतः सन् नंष्ट्वा वनं गतः, दुष्कर्मयोगात् सम्मुखं सिंहो मिलितः, सद्यस्तेन सिंहेन हतः, स मृत्वा नरकं गतः। ततश्च्युत्वाऽसंख्येयान् तिर्यग्नरकादिभवान् कृत्वाऽकामनिर्जरया बहूनि कर्माणि क्षपयित्वा महाविदेहे कुसुमपुरनगरे विशालकीर्तिनृपस्य गृहेशिवा-नामदास्याः पुत्रत्वेनोत्पन्नः। तया वज्र इति स्थापितं नाम, क्रमेण तरुणो जातः। नृपसेवा करोति स्म परं प्राक्कृतकर्मोदयात् तच्छरीरे गलत्कृष्ठरोग उत्पन्नः। हस्तौ, पादौ च गलित्वा पतितौ पङ्गुर्जातः।

अत मरणसमये शिवादास्या नमस्कारमन्त्रः श्रावितः, ततः समाधिना मृत्वा वन्यन्तरो जातः ततश्च्युत्वा जम्बूद्वीपे भरतक्षेत्रे सौहार्दपुरनगरे सूरदास-श्रेष्ठिगृहे वसन्ततिलकाभार्यायाः स्वयंप्रभो नाम पुत्रो जातः। स च गुणवान्, विवेकवान्, परं चरणे व्रणरोगयुक्त[१६] एवोत्पन्नस्तेन चलितुं न शशाक। क्रमेण अष्टवर्षवया[१७] अभूत्, एकपुत्रत्वात् पितरौ तद्दुःखदुःखितावभूताम्। तस्मिन् समये श्रीशत्रुञ्जयतीर्थयात्रार्थं संघोऽगमद्, तदा तत् श्रुत्वा श्रेष्ठी अपि सरोगपुत्रसहितः सङ्घमध्ये चचाल।

क्रमेण सिद्धक्षेत्रे सङ्घः समागतः, ततो विधिवा गिरिमारुह्य श्रीऋषभ-देवभक्तिं चकार, तदा सूरदासश्रेष्ठी अपि सभार्यः पुत्रमादाय उपरि गत्वा

सूर्यकुण्डजलेन पुत्रं स्नापयामास। परं तज्जलं देवताऽधिष्ठतमस्ति स्वयंप्रभस्य च न तत्कर्माद्यापि क्षीणं तेन तज्जलं पादौ न स्पृशति। तद् दृष्ट्वा सर्वेऽपि सङ्घलोकाः स्विस्मिता जाताः, तदा सर्वैरपि मुनीश्वरः पृष्टः स्वामिन् किमत्र कारणम् ?, मुनिरूचे अनेन बहुभवेभ्यः प्राग् देवद्रव्यं भक्षितमास्ति, तथा एकस्या मृग्याश्चत्वारोऽपि पादाश्छिन्नाः तत्कर्म बहु क्षीणं किञ्चिदद्यापि अवशिष्टं[१८] वर्तते, तेन तीर्थजलं न स्पृशति, तीव्रकर्मणां भुक्तिं विना क्षयाभावात्। एतद् मुनिवचनं श्रुत्वा माता, पिता, पुत्रश्च त्रयोऽपि वैराग्यं प्राप्ताः। ततः श्रीऋषभदेवचरणान् अभिवन्द्य गृहमागत्य 'धर्मकरणोद्यता बभूवुः। इत्थं षोडशसहस्रवर्षाणि कुष्ठव्रणादिपीडामनुभूय तत्कर्मालोच्य कालं कृत्वा प्रथमदेवलोके देवत्वेनोत्पन्नः, ततश्च्युत्वा हे राजन्! अनन्तवीर्योऽयं तव पुत्रः पिङ्गल रायनामा सञ्जातः। इत्थं गाङ्गिलमुनिः कुमारस्य प्राग्भवमुक्त्वा पुनरुवाच-

**मद्यपानाद् यथा जीवो, न जानाति हिताऽहिते।**
**धर्माऽधर्मौ न जानाति, तथा मिथ्यात्वमोहितः ॥१॥**

**मिथ्यात्वेनालीढचित्ता[१९] नितान्तं,**
**तत्त्वातत्त्वं जानते नैव जीवाः।**
**किं जात्यन्धाः कुत्रचिद्वस्तुजाते,**
**रम्यारम्यव्यक्तिमासादयेयुः ? ॥२॥**

**अभव्याश्रितमिथ्यात्वे-ऽनाद्यनन्ता स्थितिर्भवेद्।**
**सा भव्याश्रितमिथ्यात्वे-ऽनादिसान्ता पुनर्मता ॥३॥**

इदृग्-मिथ्यात्वोदयाद् जीवाः कर्माणि बध्नन्ति, त्वत्पुत्रेणापीत्थमेव दुष्कर्मोपार्जितं तेन पङ्गुर्जात। एतद् मुनिवचः श्रुत्वा राजा उवाच - हे स्वामिन्! एतत् कर्म केन पुण्येन नश्यति ? मुनिना उक्तम् हे राजन्! तृतीयारके प्रान्ते सार्धाष्टमासयुक्तवर्षत्रये[२०] शेषे सति माधवदित्रयोदश्यां श्रीऋषभदेव-

स्वामिनो निर्वाणकल्याणकमभूत्, तेन तद्दिनं श्रेष्ठमस्ति । तद्दिने चतुर्विधाहार-त्यागेन उपावसं कृत्वा रत्नमयं मेरुपञ्चकं श्रीजिनाग्रे ढौकनीयम्-मध्ये एको महामेरुः, चतुर्दिक्ष चत्वारो लघवः, तदग्रे चतुर्दिक्षु चत्वारो नन्द्यावर्ताः कर्तव्याः । दीपधूपादिपूर्वकं बहुविधाः पूजा कर्ताव्याः ।

एवं मासत्रयोदशकं मासत्रयोदशकं यावत्, अथवा वर्षत्रयोदशकं यावत् कर्तव्यम् । तथा 'ॐ ह्री श्रीऋषभदेवपारङ्गताय[२१] नमः' एतत् पदं द्विसहस्रवारान् जनीयम्, एवं प्रतिमासं कुर्वतः सकलरोगक्षयो भवति, इह परतर् च सुखं सम्पद्यते । यदि त्रयोदश्यां पौषधं कुर्यात् तर्हि प्रागुक्तं कर्तव्यं सर्वं पारणकदिने कृत्वा गुरुं प्रति अतिथिसंविभागं विधाय पारणकं कुर्याद् । इत्थं गुरुवचः श्रुत्वाऽनन्तवीर्यो राजा व्रतमङ्गीकृत्य गुरुन् नत्वा स्वस्थानं ययौ ।

अथ पिङ्गलरायकुमारः प्रथममाघवदित्रयोदश्यां प्रथमं व्रतं कृतवान् तावता चरणाङ्कुरौ प्रादुर्भूतौ, एवं त्रयोदशमासान् यावत् कुर्वतः सुन्दररूपपाणि-पादं प्रकटीभूतम् । राजाऽतीव हर्षं प्राप्तः, धर्मस्य महिमानं विलोक्य उल्लसितः सन् विशेषतो धर्मं कर्तुं प्रवृत्तः । ततः षोडशमासे कुमारेण गुणसुन्दरी परिणीता, अन्यासामपि बहूनां राजकन्यानां पाणिग्रहणं चक्रे । ततोऽनन्तवीर्येण राज्ञा कुमाराय राज्यं दत्त्वा गाङ्गिलमुनिपार्श्वे चारित्रं गृहीत्वा निरतिचारं तत् प्रतिपाल्य श्रीशत्रुञ्जयेऽनशनं कृत्वा शिवपदं प्राप्तम् ।

ततः पिङ्गलरायनृपः [२२]सन्नीत्या प्रजां पालयन् पुनः-त्रयोदशवर्षाणि यावद् मेरुत्रयोदशीमाराध्य प्रान्ते उद्यापनं चकार । तत्र त्रयोदशजिनगृहाणि कारयामास, त्रयोदश स्वर्णमयीः प्रतिमाः, त्रयोदश रूप्यमयीः, त्रयोदश रत्नमयीश्च निर्मापयामास[२३] । त्रयोदशविधै रत्नैर्मेरुपञ्चकं निर्माप्य ढौकयामास । त्रयोदशवारान् श्रीसङ्घेन सह तीर्थयात्रां चकार । त्रयोदश साधर्मिकवात्सल्यान् कृतवान्, एवं बहुधा ज्ञानभक्तिमपि चकार . ततः कियन्ति पूर्वाणि व्रतसल्यान् कृतान्, एवं बहुधा ज्ञानभक्तिमपि चकार । ततः कियन्ति पूर्वाणि व्रतसहितं राज्यं प्रपाल्य स्वकीयमहसेनकुमाराय राज्यं दत्त्वा श्रीसुव्रताचार्यसमीपे बहुभिरन्यपुरुषैः सह दीक्षां जग्राह । द्वादशाङ्गीमधीत्य चतुर्दशपूर्वधरः सञ्जातः

क्रमेण आचार्यपदे च सम्प्राप्तः, ततः क्षपकश्रेण्यारोहणार्थमष्टमगुणस्थाने शुक्लध्यानं ध्यातुमुद्यतो बभूव ।

ततः कर्मेण कर्माणि क्षपयन् द्वादशगुणस्थानान्त्यप्रसमये घातिकर्मचतुष्टयं शुक्लध्यानेन क्षपयित्वा त्रयोदशगुणस्थानप्रथमसमये केवलज्ञानं प्राप्य बहून् भव्यान् प्रतिबोधयन् पृथिव्यां विजहार । ततः द्विसप्ततिपूर्वलक्षाणि सर्वायुः प्रपाल्य चतुर्दशे गुणस्थाने पञ्चह्रस्वाक्षरोच्चारणकालमाने योगनिरोधं कृत्वा शेषकर्मचतुष्टयं क्षपयित्वा मुक्तिं प्राप्तः इह शरीरं त्यक्त्वा पूर्वप्रयोगबन्धच्छेदादिना सिद्धशिलोपरि योजनान्ते सिद्धक्षेत्रे एकस्मिन् समये गत्वा [२४]साद्यनन्तस्थित्या स्थितवान् । इत्थं पिङ्गलरायतो मेरुत्रयोदश्या महिमा प्रवृत्तः । पूर्वं रत्नमया मेरवो ढौकिताः, पश्चात् कियत्कालं यावत् स्वर्णमयाः, ततः पश्चाद्रूप्यमयाः, अस्मिन् काले घृतमया मेरवः प्रवृत्ताः सन्ति, इत्थं मेरुत्रयोदश्या महिमानं श्रुत्वा भो भव्याः ! शुद्धभावेन विधिना एतद् व्रतं कर्तव्यं येन इह परत्र च सर्वप्रकारसुखसम्पत्तिः प्रादुर्भवेदिति ॥

**संवद्व्योमरसाष्टेन्दु १८६० मिते फाल्गुनमासके ।**
**असितैकादशीतिथ्यां बीकानेराख्यसत्पुरे ॥१॥**

**व्याख्यानं प्राक्तनं वीक्ष्य निबद्धं लोकभाषया ।**
**अलेखि संस्कृतीकृत्य क्षमाकल्याणपाठकैः ॥२॥**

**संविग्नवाचनाचार्यपदस्थानं सुधीमताम् ।**
**श्रीयुक्तामृतधर्माणां शिष्यैरामोदतस्त्वदः ॥३॥** त्रिभिर्विशेषकम् ॥

**॥ इति मेरुत्रयोदशीव्याख्यानं सम्पूर्णम् ॥**

**: अभ्यास :**

१. अनन्तवीर्यनृपस्य का चिन्ता कथं बभूव ?
२. गुणसुन्दर्याः विवाहसम्बन्धः केन सह सञ्जातः ?
३. अनन्तवीर्यनृपेण स्वपुत्रस्य विवाहः कथं विलम्बितः ?

४. मुनिना जयणामाहात्म्यं किं वर्णितम् ?

५. चतुरिन्द्रिय विनाशकस्य का गति र्भवति ?

६. सामन्तसिंहेन देवाग्रस्थितसर्वपदार्थानि गृहीत्वा किं कृतम् ?

७. पिङ्गलरायः केन कर्मणा पङ्गुः जातः ?

८. पिङ्गलरायस्य पङ्गुत्वं केन प्रकारेण अपनीतम् ?

९. पिङ्गलरायनृपेण कृता मेरुत्रयोदश्याराधना ज्ञापयत ?

१०. अस्य कथानकस्य कर्ता कः ?

१. मारुदेव - पुं. આદિનાથ ભગવાન ॥ २. घस्र - पुं- દિવસ. ३. महान्ति च अमूनि प्रातिहार्याणि च महाप्रातिहार्याणि [वि. पू. कर्म.]महाप्रातिहार्यैः विराजितः महाप्रातिहार्यविराजितः तेन - महाप्रातिहार्यविराजितेन । (तृ.तत्पु.) ॥ ४. दृष्टिदोष - पुं. નજર લાગવી તે ॥ ५. प्रादुम् + कृ ८. ग. उ. પ્રકટ કરવું । ६. तस्याः विवाहः तद्विवाह । [ष. त.] तद्विवाहस्य चिन्ता तद्विवाहचिन्ता । [ष. त.]तद्विवाहचिन्तया आतुरः तद्विवाहचिन्तातुरः । [तृ. तत्पु.] તેણીના વિવાહની ચિંતાથી આતુર ॥ ७. मातुल पुं.- મામા ॥ ८. पञ्चानां शतानां समाहारः पञ्चशती [समाहार द्विगु] साधूनां पञ्चशती साधुपञ्चशती [ष.त.]साधुपञ्चशतीभीः परिवृत्तः साधुपञ्चशतीपरिवृतः । (तृ. तत्पु.) ॥ ९. प्रतिपत्ति स्त्री. સેવા, ભક્તિ ॥ १०. टुंटामुंटा पुं. પાંગળા । ११. समानमिव दृश्यन्ते सदृशानि [उपपद]सदृशानि च तानि पापानि च सदृशपांपानि । [वि.पू. कर्म.]तानि भजन्ति सदृशपापभाजः ( उपपद ) ॥ १२. द्यूतं करोति द्यूतकृत् । ( उपपद ) द्यूतकृतः सङ्गः द्यूतकृत्सङ्गः [ष.तत्पु.]तस्मात् - द्यूतकृत्सङ्गात् । જુગાર કરનારના સંગથી ॥ १३. पूगीफल नपुं. - સોપારી ॥ १४. छत्रम् आदौ येषां तानि छत्रादीनि । ( व्याधि बहु. ) छत्रादीनि तानि आभरणानि च छत्राद्याभरणानि तानि । (वि.ઉ.કર્મ) ॥ १५. सती गतिः सद्गतिम् ताम् सद्गतिम् । (वि.पू.કર્મ.) ॥ १६. व्रणरोगः पुं.-ગૂમડું ॥ १७. अष्टानां वर्षाणां समाहारः अष्टवर्षम् । ( समाहार द्विगु ) अष्टवर्ष वयः यस्य सः अष्टवर्षवयाः ( समा. बहु. ) १८. अवशिष्ट वि. બાકી રહેલ ॥ १९. आलीढं चित्तं येषां ते आलीढचित्ताः ( समा. बहु. ) २०. ત્રણ વર્ષ ને સાડા આઠ માસ ॥ २१. पारङ्गत वि. મોક્ષમાં ગયેલ ॥ २२. सम्यक् नीतिः सन्नीतिः तया- सन्नीत्या [कर्म]સારી નીતિપૂર્વક ॥ २३. निर् + मा ३. गण आत्म । પ્રેરક પરોક્ષ રૂપ ॥ २४ सादिश्चासौ अनन्ता च साद्यनन्ता [वि. पू. कर्म.]साद्यनन्ता चासौ स्थितिश्च साद्यनन्तस्थितिः [वि. पू. कर्म.]तया साद्यनन्त स्थित्या । સાદિ અનન્ત સ્થિતિએ ॥

## [ २२ ]

# ॥ सौभाग्यपञ्चमीकथा ॥

## ॥ ज्ञानपञ्चमीव्याख्यानम् ॥

श्रीमत्पार्श्वजिनाधीशं सुराऽसुरनमस्कृतम्[१] ।
प्रणम्य परया भक्त्या सर्वाभीष्टार्थसाधकम् ॥१॥
कार्त्तिकशुल्कपञ्चम्या माहात्म्यं वर्ण्यते मया ।
भव्यानामुपकाराय यथोक्तं पूर्वसूरिभिः ॥२॥ युग्मम् ॥
भुवने हि परं ज्ञानं ज्ञानं सर्वार्थसाधकम् ।
अनिष्टवस्तुविस्तारवारकं ज्ञानमीरितम्[२] ॥३॥
ज्ञानादासद्यते मुक्तिर्ज्ञानात् स्वर्गोद्भवं[३] सुखम् ।
लभन्ते प्राणिनो यस्मात् तज्ज्ञानं [४]स्वर्द्रुमोपमम् ॥४॥
भव्यैरासाद्यते ज्ञानं पञ्चम्याराधनाद् ध्रुवम् ।
अतः [५]प्रमादमुत्सृज्याऽऽराध्या सा विधिना तथा ॥५॥
मञ्जरीवरदत्ताभ्यां[६] यथैवाराधिता किल ।
पञ्चमी भावतोऽथात्र दृष्टान्तः प्रोच्यते तयोः ॥६॥ युग्मम् ॥

अस्त्यत्र जम्बूद्वीपे दक्षिणार्धभरतक्षेत्रे पद्मपुराभिधं नगरम्, तत्र भुवि विश्रुतोऽजितसेनो नृपो बभूव, तस्य यशोमती पट्टराज्ञी, तयोः रूपलावण्यशोभनो वरदत्तनामा पुत्रो बभूव । सोऽष्टवर्षप्रमाणः[७] पित्रा [८]बुधान्तिके विद्याग्रहणहेतवे स्थापितः । परमक्षरमात्रं तस्य मुखे न चटतिं, [९]अध्यापकस्योद्यमो निष्फलोऽभूत् । क्रमात् स यौवनं प्राप्तः पूर्वकर्मोदयात् कुष्ठेन विनष्टदेहत्वात् कुत्रापि रतिं

न प्राप। इतश्च तत्रैव पुरे सप्तकोटीसुवर्णाधीशो[१०] जिनधर्मरतः प्रसिद्धिभाक् सिंहदासो नाम श्रेष्ठी, तस्य गृहे गुणोचिता [११]तिलकानाम्नी भार्या, तयोः पुत्री गुणमञ्जरी आजन्मतो रोगैरुपद्रुता[१२] वचनेन मूकतां[१३] प्राप्ता बभूव। विविधैरोषधैरपि तस्या रोगशान्तिर्न जायते न च यौवने तां कोऽप्युद्वहति[१४]। तस्याः षोडशवार्षिक्या दुःखेन मातापित्रादिः सकलस्वजनो दुःखितः समजायत। तत्रैव पुरे एकदा श्रीविजयसेनसूरयश्चतुर्ज्ञानधरा गुरवः समाजग्मुः। तदा सर्वोऽपि नागरिकलोकः[१५] सपुत्रो भूपतिः सकुटुम्बः सिंहदासः श्रेष्ठी सर्वे वन्दनार्थमुपगता गुरुणा च धर्मदेशना प्रारब्धा-

**ज्ञानस्याराधने यत्नोऽध्ययनश्रवणादिभिः।**
**भव्यैर्विधेयः सततं निर्वाणपदमिच्छुभिः ॥१॥**

**विराधयन्ति ये ज्ञानं मनसा ते भवान्तरे।**
**नराः स्युः शून्यमनसो विवेकपरिवर्जिताः ॥२॥**

**विराधयन्ति ये ज्ञानं वचसापि हि दुर्धियः।**
**मूकत्वमुखरोगित्वदोषास्तेषामसंशयम् ॥३॥**

**विराधयन्ति ये ज्ञानं कायेनायत्नवर्तिना।**
**दुष्टकुष्ठादिरोगाः[१६] स्युस्तेषां देहे विगर्हिते[१७] ॥४॥**

**मनोवाक्काययोगैर्ये ज्ञानस्याऽऽशातनां सदा।**
**कुर्वते मूढमतयः कारयन्ति परानपि ॥५॥**

**तेषां परभवे पुत्रकलत्रसुहृदां[१८] क्षयः।**
**धनधान्यविनाशश्च तथाऽऽधिव्याधिसम्भवः ॥६॥ युग्मम् ॥**

इत्यादिदेशनां श्रुत्वा सिंहदासश्रेष्ठी मुनिं जगौ-भगवन्! केन कर्मणा मम सुतातनौ रोगा जाताः? गुरुणा ऊचे-महाभाग! कर्मणा किं न सम्भवेत्? अत्र श्रेष्ठिन्! अस्याः पूर्वभवः श्रूयताम् धातकीखण्डमध्यस्थभरते खेटकनाम

नगरम्, तत्र जिनदेवनामा श्रेष्ठी। सुन्दरीनाम्नी च तस्य गेहिनी, तयोः पञ्च पुत्राः-आशपालः, तेजपालः, गुणपालः, धर्मपालः, धनसार इतिनामानोऽभूवन्। तथा लीलावती, शीलावती, रङ्गावती, मङ्गावती इतिनामानश्चतस्रश्च पुत्र्योऽभूवन्।

अथ एकदा जिनदेवेन पञ्चापि तनयाः पण्डितसमीपे विद्याकलाग्रहणार्थं स्थापिताः। ते च चापल्यं[१९] कुर्वते परन्तु अध्यननं न कुर्वन्ति, यदा पण्डितस्तान् [२०] कम्बया ताडयति तदा ते रुदन्तो गृहमागत्य मातुः समीपे दुःखं निवेदयन्ति- माता उवाच-पठनेन किं प्रयोजनम्? यतः-

**पठितेनाऽपि मर्तव्यं शठेनाऽपि तथैव च।**
**उभयोर्मरणं दृष्ट्वा कण्ठशोषं करोति कः? ॥१॥**

पण्डितस्यापि उपालम्भं[२१] दत्ते ईर्ष्यया च पुस्तिकां प्रज्वालयामास। पुत्रान् वक्ति पठनार्थं भवद्भिर्न गन्तव्यम्। श्रेष्ठी एतद् व्यतिकरं ज्ञात्वा प्रोवाच- हे भद्रे! जडानां पुत्राणां कः कन्याः प्रदास्यति? कथं चैते व्यवसायं करिष्यन्ति? यतः-

**माता शत्रु पिता वैरी बालो येन न पाठितः।**
**न शोभते सभामध्ये हंसमध्ये बको यथा ॥१॥**

**विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।**
**स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥२॥**

इति श्रेष्ठिवचनं श्रुत्वा सा प्रोवाच-यूयं किं न पाठयथ? अत्र मम को दोषः? इत्युक्ते श्रेष्ठी [२२]हक्कितः सन् मौनं चकार। अथ अनुक्रमेण ते पञ्चापि तयोः पुत्रा यौवनं प्रापुः परं न कोऽपि तेभ्यः कन्यां दत्ते, मूर्खत्वात्, ततः श्रेष्ठी स्त्रीं प्रति जगौ-पापिष्ठे! त्वया पुत्रा मूर्खा एव रक्षिताः, कोऽपि कन्यां न ददाति, सा उवाच - तव पिता पापिष्ठः येनैवं मूढमतिना शिक्षितोऽसि यतः-

**आः! किं सुन्दरि! सुन्दरं न कुरुषे? किं नो करोषि स्वयं?**
**आः! पापे! प्रतिजल्पसि प्रतिपदं? पापस्त्वदीयः पिता।**

**धिक् त्वां [२३]क्रोधमुखीमलीकमुखरां त्वत्तोऽपि कः कोपनो,**
**दम्पत्योरिति नित्यदन्तकलहक्लेशार्तयोः[२४] किं सुखम् ? ।।१।।**

एतद्वचनमाकर्ण्य रुष्टेन जिनदेवेन [२५]उपलेन सा शिरोमर्मणि जघ्ने, तदा सा मृता सा च तव पुत्री समजायत । अनया ज्ञानस्याऽऽशातना पूर्वभवे चक्रे तेन रोगोत्पत्तिर्जज्ञे, यतः-

**कृतकर्मक्षयो नास्ति कल्पकोटिशतैरपि ।**
**अवष्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।।१।।**

इति गुरोर्वचनं श्रुत्वा सा गुणमञ्जरी [२६]जातजातिस्मृत्या पूर्वभवं ददर्श । ततो गुरुं प्रति सा सत्यमिति प्रोवाच । श्रेष्ठिना गुरुः पृष्टः- भगवन् ! अस्या रोगाः कथं प्रयास्यन्ति ? गुरुणाऽभाणि-श्रेष्ठिन् ! ज्ञानस्याऽऽराधनतः सर्वं सुखं सम्पद्यते दुःखं च विलयं[२७] याति । ज्ञानस्य चाराधनमित्थम् -

विधिना शुक्लपञ्चमीदिने उपवासो विधीयते, पुस्तिकां पट्टे संस्थाप्य पुरः स्वस्तिकः क्रियते, [२८]पञ्चवर्तिमयो दीपश्च क्रियते, पञ्चफलानि [२९]पञ्चवर्णकं च धान्यं ढौक्यन्ते, पञ्चवर्षाणि पञ्च मासान् यावत् अनया रीत्या मनोवाक्काय-शुद्ध्या समाराधनीया । यदि मासे मासे कर्तुं न शक्नोति तदा कार्तिकमासस्य शुकलपञ्चमी यावज्जीवमाराधनीया । सा सम्यगाराधिता सर्वं सुखं दत्ते इति गुरुवचनं श्रुत्वा जिनदेवोऽब्रवीत् - भगवन् ! मम तनयायाः तपस्याशक्तिर्न विद्यते, अतः कार्तिकपञ्चम्या विधिरादिश्यताम् । वाचंयमः[३०] प्रोचे-कार्त्तिक-शुक्लपञ्चमीदिने पुस्तकं पट्टे संस्थाप्य सुगन्धपुष्पैः सम्पूज्य धूपोत्क्षेपपूर्वकं पञ्चवर्णानि धान्यानि पञ्च पक्वान्नानि पञ्च फलानि च ढौक्यन्ते । ततो गुरोरग्रे गत्वा भक्त्याऽभिवन्द्य यथाविधि उपवासस्य प्रत्याख्यानं क्रियते । तस्मिन् दिने 'नमो नाणस्स' इति [३१]पदमेकसहस्रसङ्ख्यया उत्तराभिमुखेन गुण्यते । चेत् पौषधः क्रियते तदा तद्दिने अयं विधिर्न भवेत्, तस्मात् पारणकदिने विधिः कार्यः, यथाशक्ति उद्यापनादि अपि विधेयम् । ततो गुणमञ्जर्या तत् तपः प्रतिपन्नम् ।

अस्मिन्नवसरे राजा पृच्छति हे [३२]साधुपुरन्दर ! मत्सूनोः वरदत्तस्य कुष्ठरोगः कथमभवत् ? पठनं च किं नाऽऽयाति ? तस्य किं कारणम् ? । गुरुः जगाद अस्यापि पूर्वभवं शृणु-जम्बूद्वीपे भरतक्षेत्रे श्रीपुरनाम नगरम्, तत्र वसुनामा श्रेष्ठी वसति स्म, तस्य वसुसार-वसुदेवौ पुत्रौ, तौ एकदा क्रीडार्थं वने जग्मतुः, तत्र वने मुनिसुन्दरनामानः सूरयो दृष्टा वन्दिताश्च । गुरुभिर्धर्मदेशना प्रारब्धा-

**यत्प्रातः संस्कृतं धान्यं [३३]मध्याह्ने तद् विनश्यति ।**
**[३४]तदीयरसनिष्पन्ने काये का नाम सारता ॥१॥**

इत्यादिदेशनां श्रुत्वा तातमापृच्छ्य वैराग्यात् तौ व्रतं जगृहतुः । लघुना वसुदेवना चारित्रं बिभ्रता सिद्धान्तसारः सर्वोऽपि अधीतः । गुरुणा वसुदेवाय सूरिपदं दत्तम्, स च पञ्चशतसाधुभ्यो वाचनां ददाति । एकदा वसुदेवसूरीश्वरे [३५]रूजाऽऽक्रान्तः संस्तारके[३६] सुप्तः, तं कोऽपि साधुः आगमार्थं पृच्छति, गुरुर्व्याख्यायति, तस्मिन् गते द्वितीयो मुनिः समागतः तस्मै वाचना दत्ता, एवं भूयस्सु समागत्य समागत्य गतेषु किञ्चिन्निद्रायमाणः केनाऽपि साधुना पृष्टो भगवान् ! अग्रेतनं पदं वाच्यं पदस्यार्थोऽपि वाच्यः । तदा सूरिः कुविकल्पना[३७] हृदि चिन्तयामास कृतपुण्यो मम बृहद्भ्राता, मूर्खत्वात् तस्मै प्रष्टुं कोऽपि न याति, स्वैरं भुङ्क्ते, भाषते शेते च, अत एव मूर्खे बहवो गुणाः सन्ति यत उक्तम्-

**मूर्खत्वं हि सखे ! ममापि रुचितं तस्मिन् यदष्टौ गुणा,**
**निश्चिन्तो बहुभोजनोऽत्रपमना[३८] नक्तं[३९] दिवा शायकः ।**
**कार्याऽकार्यविचारणान्धबधिरो मानापमाने समः,**
**प्रायेणाऽऽमयवर्जितो[४०] दृढवपुर्मूर्खः सुखं जीविति ॥१॥** इति।

अतः परं न कस्मै पदमात्रमपि कथयिष्यामि नवं पदं च न पाठयिष्यामि इति विचार्य शरीरे रोगाऽऽक्रान्तो द्वादश दिवसान् मौनं चकार। तत्पातकमनालोच्य[४१] आर्तध्यानपरो मृत्वा राजन् तव सुतो जातः । पूर्वोपार्जितेन तेन कर्मणा अतीव मूर्खः कुष्ठादिरोगाऽऽक्रान्ततनुश्च बभूव । एतद् गुरोर्वचनं

श्रुत्वा वरदत्तो जातिस्मृत्या निजपूर्वभवं दृष्ट्वा मूर्च्छा प्राप, क्षणान्तरे स्वस्थीभूय[४२] सर्वं सत्यमिति गुरुं प्रति उवाच। पुनरपि नृपो बभाण-भगवन्! स देहरोगः कथं कदा व्रजिष्यति ? गुरुणा उक्तम्, कार्तिकशुक्लपञ्चमी आराध्या पूर्वोक्तः सर्वोऽपि विधिः कथितः, प्रतिपन्नं कुमारेण पञ्चमीतपः, गुरुं प्रणम्य सर्वेऽपि स्वस्वस्थानं जग्मुः, अनन्तरं सम्यक् तत्तपः कुर्वतो तपःप्रभावात् वरदत्तस्य सर्वेऽपि रोगाः क्षयं प्रापुः, स्वयंवरसमेतानां[४३] वरभूपोद्भवानां सहस्रकन्योत्तमानां समहोत्सवं पाणिग्रहणं[४४] च चकार। शिक्षिताशेषसत्कलस्य वरदत्तस्य राज्यं दत्त्वा नृपो गुरुसन्निधौ चारित्रमग्रहीत्। वरदत्तो राज्यं पालयन् वर्षे वर्षे महाशक्त्या पञ्चम्या विधिं विदधे। [४५]अखण्डाऽऽज्ञो राज्यं प्रपाल्य भुक्तभोगः स्वसूनवे राज्यं दत्त्वा स्वयं दीक्षामग्रहीत्।

इतो गुणमञ्जर्यास्तपोमाहात्म्यं वर्ण्यते-तस्यास्तपःप्रभावात् सर्वेऽपि रोगा दूरं गताः, अद्भुतं रूपं जज्ञे, सा च जिनचन्द्रेण परिणीता, करमोचनवेलायां पित्रा बहुधनं दत्तम्, चिरकालं गृहसौख्यं भुक्त्वा यावज्जीवं पञ्चमीतपः कृत्वा प्रान्ते चारित्रमग्रहीत्, तौ वरदत्तगुणमञ्जर्यौ जिनोदितं चारित्रं प्रपाल्य कालं कृत्वा वैजयन्तविमाने सुरोत्तमौ[४६] जातौ ततश्च्युत्वा वरदत्तजीवो महाविदेहे पुण्डरीकिण्यां नगर्याममरसेनराज्ञः स्त्री गुणवती, तस्याः पुत्रत्वेन समुत्पन्नः। शुभेऽह्नि तस्य शूरसेन इति पित्रा नाम कृतम्। क्रमेण यौवनं प्राप्तः कन्यकानां शतमुपयेमे,[४७] पिता स्वराज्ये स्थापितः। एकदा श्रीसीमन्धरस्वामी विहरंस्तत्र समागतः। अर्हदागमनं श्रुत्वा शूरसेनो वन्दनार्थमगमत्। भगवता धर्मदेशना प्रारब्धा, तत्र सौभाग्यपञ्चम्यास्तपसः फलं प्रकाशितम्, ततो राज्ञा पृष्टम्-भगवन्! केनाऽपि तपसः फलं प्राप्तम् ? तदा भगवता वरदत्तनृपदृष्टान्तः कथितः, तत् श्रुत्वा जातजातिस्मृतिः सन् पूर्वभवं ददर्श, पुनः तद्व्रतं जग्राह दशसहस्रवर्षं राज्ये स्थित्वा तीर्थंकरपार्श्वे संयममग्रहीत् वर्षसहस्रं दीक्षां प्रपाल्य केवलज्ञानं प्राप्य मोक्षं प्राप।

अथ गुणमञ्जरीजीवो सुखं भुक्त्वा [४८]रमणीयाख्ये विजये सुभायां नगर्याममरसिंहाभिधनृपपत्न्या अमरावत्याः कुक्षौ पुत्रत्वेन समुत्पन्नः, समये

जाते च पित्रा सुग्रीव इति नामस्थापना कृता, क्रमेण यौवनं प्राप्तो बहूनां कन्यानां पाणिग्रहणं च कृतम्, विंशतितमे वर्षे पित्रा राज्यं दत्त्वा स्वयं दीक्षा गृहीता, सुग्रीवो राजा बहूनि वर्षाणि राज्यं प्रपाल्य अन्ते गुरुपार्श्वे दीक्षां गृहीत्वा पूर्वलक्षं चारित्रं प्रपाल्य केवलमुत्पाद्य मोक्षं जगाम ॥

**जायन्तेऽधिकसौख्यानि पञ्चम्याराधनाद् नृणाम् ।**
**इत्यस्या अभिधा जज्ञे लोके सौभाग्यपञ्चमी ॥१॥**
**एवं विभाव्य भो भव्याः ! पञ्चम्याराधनोद्यमः ।**
**भवभीतिविभेदाय[४१] कार्यो भवद्भिरद्भुतः ॥२॥**

**॥ इति कार्त्तिकसौभाग्यपञ्चमीमाहात्म्यविषये वरदत्तगुणमञ्जरीकथानकं सम्पूर्णम् ॥१॥**

## : अभ्यास :

प्रश्न :

१. केन कारणेन गुणमञ्जरी आजन्मतः मूका सञ्जाता ?

२. वरदत्तः कुष्ठी कथं बभूव ?

३. सौभाग्यपञ्चम्याः विधिः कः अस्ति ?

४. सौभाग्यपञ्चम्याः आराधनायाः वरदत्तगुणमञ्जरीभ्याम् को लाभः सम्प्राप्तः ?

५. ज्ञानविराधनायाः किं फलम् ? आराधनायाश्च किं फलम् ?

१. सुष्ठु राजन्ते वा सुष्ठु रीति सुराः । ( उपपद ) सुरासुरैः सुरासुरनमस्कृतः तम् सुरासुरनमस्कृतम् । દેવો અને દાનવો વડે નમસ્કાર કરાયેલ એવા તેને ॥ २. ईर - १०. गण. परस्मै- કહેવું ॥ ३. स्वर्गे उद्भवः स्वर्गोद्भवः तम् स्वर्गोद्भवम् । સ્વર્ગમાં ઉત્પન્ન થયેલ ॥ ४. द्रुणि सन्ति यस्य सः द्रुमः । स्व. द्रुमः स्वद्रुमः । स्वद्रुमस्य उपमा यस्य तद् स्वर्द्रुमोपमम् । ( व्याधि. बहु. )કલ્પવૃક્ષની ઉપમાવાળું ॥ ५. उत्सृज्य ત્યાગ કરીને ॥ ६. नामैकदेशेन सर्वनामग्रहणाद् मञ्जरीरत्यनेन गुणमञ्जरीति ग्रहणम् ॥ ७. अष्टानां वर्षाणां समाहारः अष्टवर्षम् । ( द्विगु. ) अष्टवर्षं प्रमाणं यस्य सः अष्टवर्षप्रमाणः ॥ ८. बुध पुं. પંડિત ॥ ९. चट् १ गण प. ચડવું ॥ १०. अधीश पुं. માલિક ॥ ११. कर्पूरतिलका

नाम्नी ॥ १२. उपद्रुत वि.-पीडित ॥ १३. मूक -वि. मुंगु ॥ १४. उद् + वह् १ गण उ. प. परणवुं ॥ १५. नगरे भवः-नागरिकः । नागरिकश्चासौ लोकश्च नागरिकलोकः (वि. पू. कर्म.) १६. कुष्ठः आदौ येषान्ते कुष्ठादयः । कुष्ठादयश्च ते रोगाश्च कुष्ठादिरोगाः । दुष्टाश्च ते कुष्ठादिरोगाश्च दुष्टकुष्ठादिरोगाः [वि. पू. कर्म.]दुष्ट એवा કોઢાદિ રોગો ॥ १७. विगर्हित वि. निन्दित ॥ १८. कलत्र नपुं.-પત્ની ॥ १९. चापल्य नपुं. તોફાન ॥ २०. कम्बा स्त्री. લાકડી ॥ २१. उपालम्भ पुं. ઠપકો ॥ २२. हक्कित वि. હાંકી કાઢેલ ॥ २३. क्रोधेन व्याप्तम् क्रोधव्याप्तम् । (तृ. तत्पु.) क्रोधव्याप्तं मुखं यस्याः सा क्रोधमुखी ताम् क्रोधमुखीम् । ક્રોધથી વ્યાપ્ત મુખવાળી એવી તેણીને ॥ २४. आर्त्त वि. ॥ २५. उपल पु. પથ્થર । २६. जातेः स्मृतिः जातिस्मृतिः जाता चासौ जातिस्मृतिः च जातजातिस्मृतिः [कर्म.]तया जातजातिस्मृत्या । ઉત્પન્ન થયેલ જાતિ સ્મરણજ્ઞાન વડે ॥ २७. विलय पु. નાશ ॥ २८. वर्ति स्त्री. વાટ ॥ २९. पञ्च वर्णानि यस्य तद् पञ्चवर्णकम् ॥ ३०. वाचंयम पुं. મુનિ ॥ ३१. अष्टोत्तरैक-सहस्त्रसङ्ख्या इत्यपि क्वापि उपलभ्यते पाठः क्वापि च द्विसहस्राष्टोत्तरशतमित्यापि ॥ ३२. साधुषु पुरन्दरः साधुपुरन्दर [सप्त. तत्पु.]तत्सम्बोधने हे साधुपुरन्दरः ! । હે શ્રેષ્ઠ સાધુ ! ॥ ३३. मध्यम् अह्नः मध्याह्नः [षष्ठी. तत्पु.] तस्मिन् मध्याह्ने ॥ ३४. तदीयरस તે (ધાન્ય) રસ ॥ ३५. रूज् स्त्री રોગ ॥ ३६. संस्तारक पुं. સંથારો ॥ ३७. कुत्सिताः विकल्पाः कुविकल्पाः [कु. पूर्वपद]तान् - कुविकल्पान् ॥ ३८. अत्रपमनस् पुं. લજ્જારહિત મનવાળો ॥ ३९. नक्तम् अव्यय- રાત્રિ ॥ ४०. आमय पुं. રોગ ॥ ४१. पातक नपुं.- પાપ ॥ ४२. न स्वस्थः अवस्थः [नञ् तत्पु.]अस्वस्थः स्वस्थः इव भूत्वा स्वस्थीभूय । [गति. स.] ४३. स्वयं वृणोति स्वयंवरः [उपपद]स्वयंवरे समेताः स्वयंवसरमेताः तेषाम् । स्वयंवरसमेतानाम् ॥ ४४. पाणिग्रहण नपुं-લગ્ન ॥ ४५. अखण्डा आज्ञा यस्य सः अखण्डाज्ञः [समा. बहु.]અખંડ આજ્ઞાવાળો ॥ ४६. सुष्ठु राजेते सुरौ । [उपपद]सुरेषु उत्तमौ सुरोत्तमौ [स. तत्पु.] ४७. उप + यम् १गण-आत्म - પરણવું ॥ ४८. रमणीयः इति आख्या यस्य तद् रमणीयाख्यम् तस्मिन् रमणीयाख्ये ॥ ४९. भवात् भीतिः भवभीतिः । [पञ्चमी तत्पु.]भवभीतेः विभेदः भवभीतिविभेदः तस्मै भवभीतिविभेदाय ॥

• • •

# ॥ श्रीकार्त्तिकपर्णिमाकथा ॥

श्रीसिद्धाचलतीर्थेशं नत्वा श्रीऋषभं प्रभुम् ।
कार्त्तिकपूर्णिमायाश्च व्याख्यानं वक्ष्यते मया ॥१॥

सिज्झो विज्जायरचक्की नमि विनमि पुंडरीओ मुणींदो,
वाली पज्जुन्नसंबो भरहसुगमुनि सेलगो पंथगो य ।
रामो कोडी पंच द्दविडनरवई नारओ पण्डुपुत्ता,
मुत्ता एवं अणेगे विमलगिरिमहं तित्थमेयं नमामि ॥२॥

व्याख्या-भो भव्याः ! एतादृशं [१]पापकर्मकमलपरिहारकं श्रीविमलाचलतीर्थं मनोवाक्कायैर्नमामि, तद् विमलाचलतीर्थं कीदृशम् ? यद् यस्मिन् तीर्थोपरि विद्याधरः चक्री भरतः, नमिविनमी, शुक-शैलकपन्थक-रामचन्द्र-द्राविड-वारिखिल्लनवनारद-पाण्डव-पुण्डरीकाद्या अनशनं विधाय अष्ट कर्मारीन् हत्वा मुक्ति गताः । एतादृशं सिद्धशैलं तीर्थं मनोवाक्काययोगेन नमामि । पुनरस्मिन् कार्त्तिकपूर्णिमागमने श्रीशत्रुञ्जयगिरिसम्मुखदिशं गत्वा चैत्यवन्दन-करणे महती धर्मवृद्धिर्भवति, पुनरस्मिन् कार्त्तिकपूर्णिमाया दिने श्रीसिद्धशैले द्राविडवारिखिल्लौ आरोहणेन शिवपुरीं प्राप्तौ, तद्दृष्टान्तो यथा

अस्मिन् जम्बूद्वीपे दक्षिणभरतार्धस्य मध्यमखण्डे इक्ष्वाकुभूम्यामस्या-मवसर्पिण्यां पूर्वं सप्तमः कुलकरो नाभिनामा बभूव, तद्भार्या मरुदेवी, तस्या[२] उदरकन्दरायां श्रीप्रथमतीर्थङ्करश्रीऋषभजिन उत्पन्नः, स षट्पूर्वलक्षाणि कुमारपदे स्थितः, तदनन्तरमिन्द्रेण सुनन्दा, सुमङ्गला परिणायिते, स्वामिनः संसारव्यवहारो वर्तते स्म, क्रमेण भरतबाहुबल्याद्याः शतं पुत्रा, द्वे पुत्र्यौ अभूवन्,

यदा विंशतिलक्षपूर्वाणि व्यतीतानि तदा स्वामी राज्यभोक्ता जातः, क्रमेण त्रिषष्टिपूर्वलक्षवर्षं राज्यं प्रपाल्य दीक्षाऽवसरं ज्ञात्वा भरतस्य स्वमूल-राज्यविनीता दत्ता, बाहुबलाय तक्षशिला प्रदत्ता, एवं क्रमेण शतपुत्रेभ्यो राज्यं वासयित्वा स्वस्वनाम्ना देशाः प्रदत्ताः। तन्मध्ये एको 'द्रविड' इत्यभिधानः, तस्य द्रविडदेशं कञ्चनपुरनगरं च वासयित्वा ददौ। स्वामी दीक्षां ललौ। क्रमेण कर्मक्षये केवलज्ञानमुत्पन्नम्, अथ भगवाननेककोटाकोटीदेवपरिवारेण परिवृतः साधुसाध्वीसमुदायेन सह देशेषु विहृत्य धर्मवृद्धिं चकार।

अथ द्रविडराजाऽपि [३]पितृदत्तं राज्यं बुभुजे, स्वनार्या सार्धं विषय-सुखमनुभवस्तस्य क्रमेण द्वौ पुत्रौ बभूवतुः, बृहत्पुत्रो द्राविडः अपरो वारिखिल्लो लघिष्ठः, क्रमेण भोगसमर्थौ ज्ञात्वा उभयपुत्रौ प्रति भार्याः विवाहिताः। तावपि विषयसुखं बुभुजाते तद्भार्ययाऽपि पुत्राः प्रसूताः, तेऽपि चन्द्रकलेव ववृधिरे, एवं द्रविडराजा स्वराज्यं सुखेन प्रपालयति स्म। अथ तस्मिन्नवसरे भरतेन स्वाज्ञाज्ञापनार्थमष्टनवतिभ्रातृपार्श्वे दूतो मुमुचे, तदा द्रविडराजा दूतमुखात् सर्वं भरतस्य चक्रवर्तिपदस्वरूपं ज्ञात्वा एवं सर्वेऽपि सम्मील्य स्वस्वपुत्रं राज्यं ददौ, तदा द्रविडराजाऽपि द्राविडबृहत्पुत्राय राज्यं प्रददौ। कनिष्ठाय वारिखिल्लाय च एकलक्ष ग्रामान् पृथग् ददौ स्वयं च संसारवासना परित्यज दीक्षां गृहीत्वा यथेच्छं पर्यटन् श्रीऋषभदेवजिनपार्श्वे तपस्तप्त्वा कैवल्यं प्राप। अथ द्राविडः पित्रा दत्तं स्वराज्यं, वारिखिल्लोऽपि पितृदत्त[३]-स्वराज्यं लक्षग्रामं प्रपालयति स्म। कानिचिद् वर्षाणि गतानि। तस्मिन्नवसरे द्राविडराजा स्वमनसि एवं चिन्तयति स्म, मत्पित्रा दीक्षावसरे मल्लघुभ्रातरं प्रति लक्षग्रामं दत्तं तद्भव्यं न कृतम्, मद्राज्यन्यूनता कृता, परमहमेतद्राज्यमुद्दाल्य[४] ग्रहीष्यामि। एतद् विचिन्त्य स्वसैन्यं सम्मील्य युद्धार्थं चचाल। तदा वारिखिल्लोऽपि भ्रातुरागमनवृत्तान्तं श्रुत्वा स्वसैन्यमादाय सम्मुखं चचाल स्वदेशसीमां च रुरोध क्रमेणोभय-भ्रातृबहुसेनासमुदायेन द्वादशवर्षं यावत् महायुद्धकरणे बहवो गजा अश्वा मनुजा

भूमौ पतिताः, रुधिरसरितः प्रचलिताः एतादृशः सङ्ग्रामो जायते, तस्मिन् समये द्राविडराजा वनक्रीडाकरणार्थं वने जगाम, तद् वनमनेकाम्रनिम्बकदम्बादिगुल्म [५]लतापत्रपुष्पफलवनद्धर्या विभ्राजमानं सरोनिर्झरणैः[६] शोभितमेतादृशं वनं द्राविडराजा पश्यति, तस्मिन्नेव वनमध्यभागे तापसगणास्तपः कुर्वन्ति, ते परिव्राजका राज्ञा ददृशिरे। अश्वादुत्तीर्य तत्पार्श्वे गत्वाऽभिवन्द्य स्वोचितस्थाने तस्थौ। तस्मिन्नवसर एकेन तापसेन धर्मोपदेशो दत्तः, तन्मध्ये संसारासारताऽपि दर्शिता, तदुक्तम्-

**गयकन्नचञ्चलाई[७] अपरिचिताइ[८] रायलच्छीए।**
**जीवा सकम्मकलमलभरियभरातो[९] पडन्ति अहे ॥१॥**

इत्यादिधर्मोपदेशं श्रुत्वा संसारमसारं ज्ञात्वा क्रोधं त्यक्त्वा एवं मनसि चिन्तयति-अहो मम जीवितं धिक्, एक एव मद्भ्रता तेन सहाहं युध्ये, द्दश वर्षाणि सञ्जातानि, एतदनिष्टं कार्यं कृतं, स्तोकजीवनोपरि एतद् वैरं किं क्रियते, राज्यलोभाद् एतदनिष्टं कृतम्, एवं विचार्य द्राविडस्तापसाश्रमादुत्थाय [१०]स्वसहोदरापराधक्षमाणार्थं वारिखिल्लसेनामध्ये आयाति तावद् वारिखिल्लो बृहद्भ्रातुरागमनवृत्तान्तं श्रुत्वा सम्मुखमागत्य चरणयोर्निपतत्, स च द्राविडो [११]बाष्पपूर्णनयनः स्नेहार्द्रहृदयस्तमुत्थाप्य इति जजल्प-हे भ्रातः! एतत् सर्वमपि राज्यं त्वं गृहाण, अहं तापसीं दीक्षां ग्रहीष्यामि तदा वारिखिल्ल इत्युवाच अहमपि राज्यपदं न ग्रहीष्यामि, एतद्वचनपरस्परालापनां कृत्वा स्वस्वपुत्राभ्यामर्धार्धं राज्यं विभज्य राज्यं दत्वा स्वस्वापत्यस्य[१२] स्वस्वस्थाने प्रेषितवन्तौ, तौ पुत्रावपि स्वं स्वं राज्यं बुभुजाते।

अथ द्राविडवारिखिल्लावपि पञ्चपञ्चकोटिक्षत्रियपरिवारेण परिवृतौ तापसाश्रमे गत्वा तापसपार्श्वे तापसीं दीक्षां जगृहतुः, आतापनां चक्रतुः, कन्दमूलाद्याहारं कुर्वन्तौ [१३]वल्कलचीवरं धारयतः, तपःकरणेन कृशतनू[१४] जातौ। एवं बहुकालो गतः। अथास्मिन्नवसरे केचित् साधवस्तीर्थयात्राकरणार्थं

मार्गे तत्रैव वने आगताः, द्राविडवारिखिल्लावपि तान् साधूनवलोक्य बह्वादरं दत्तवन्तौ, साधवोऽपि गमनागमनमालोच्य भूमिं प्रमार्ज्य तरोस्तले स्थिताः, द्राविडवारिखिल्लावपि [१५]मुखाग्रे उपविष्टौ, तस्मिन्नवसरे तरुशाखात एकश्चटको[१६] मुखाग्रे पतितः, तं चटकं स्तोकायुषं[१७] ज्ञात्वा मुनिना करुणया विचार्य नमस्कारः सुश्रावितः,[१८] विमलगिरेर्महिमा कथितः, तेन चटकेन मनसि धर्मोपदेशो दधे, तद्धर्मप्रभावात् प्रथमकल्पे देवो जातः, स देवः साधिक-मुहूर्तान्तरे मुनीनां पार्श्वं आगत्य मुनीनां चरणानानम्य मुनीनामग्रे उपविष्टः, तस्मिन्नवसरे देवस्य महर्द्धिरूपं चावलोक्य द्राविडवारिखिल्लौ मुनिं प्रति पप्रच्छतुः, हे स्वामिन् अयमत्यन्तरूपकान्तिधारकः[१९] कः सुरोऽस्ति ? तदा मुनिराह अयं चटको मृत्वा एतत्स्थानात् सुरः उत्पन्नोऽस्ति, नमस्कारश्रवणेन तीर्थराजशत्रुञ्जयोज्ज्वलभावधारणेन चास्मिन् समये तीर्थराजमानम्य अत्रागतोऽस्ति ।

एतद्गुरुमुखान्निशम्य तौ पुनः पप्रच्छतुः हे स्वामिन् ! स विमलिगिरिः कीदृशोऽस्ति किञ्च तन्माहात्म्यमित्यावयोरुपरि कृपां कृत्वा सुश्रावय, तदा मुनिराह-

अस्मिन् जम्बूद्वीपे दक्षिणार्धभरते श्री शत्रुञ्जयगिरिरष्टोत्तरशत (१०८) नाम्नाऽलङ्कृतो महातीर्थमस्ति, पुनः शत्रुञ्जयः १ पुण्डरीकः २ सिद्धगिरिः ३ विमलगिरिः ४ सुरगिरिः ५ इत्यादिभिः एकविंशतिनामभिः लोके प्रसिद्धोऽस्ति, एष गिरिर्नामनिक्षेपेण निश्चलोऽस्ति, [२०]अनन्तकालापेक्षया सिद्धशैलोपरि अनन्ता मुनयो मुक्तिं गताः, पूर्वमपि सम्प्रतिनाम्नश्चतुर्विंशतितमजिनस्य प्रथमगणधरः कदम्बगिरिनामा मुक्तिं गतः, इहैव वर्तमानकाले प्रथमजिनस्य प्रथमगणधरः पुण्डरीकनामा चैत्रशुक्लपूर्णिमायां पञ्चकोटिमुनिभिः सह श्रीशत्रुञ्जये शिवपुरीं गतः । तेन पुण्डरीकगिरिरिति कथ्यते ।

पुनः द्विद्विकोटिपरिवारेण परिवृत्तौ फाल्गुनशुक्लदशम्यां नमिविनमी

विद्याधरराजर्षी[२१] श्रीसिद्धशैले शिवपुरं गतौ, पुनः नमिविनमिराज्ञोः पुत्र्यश्चतुष्षष्टिः (६४) विमलगिरौ चैत्रशुक्लचतुर्दश्यामनशनं कृत्वा शिवपुरी प्राप्ताः, तेन शिवमन्दिरारोहणे[२२] सोपानसदृशो वाच्यः, पुनः पापमलपरिहारणे नीरवद् ज्ञेयः, ते विमलगिरिरिति कथ्यते, पुनः पापारिगञ्जनेऽतीव[२३] शूरवद् ज्ञेयः, पुनर्येन नरभवं प्राप्य शत्रुञ्जये गत्वाऽऽदिजिनभक्तिपूर्वकं द्रव्यभावाऽर्चनं न कृतं तेन नरत्वं पशुरिव हारितम्, यस्तीर्थबुद्ध्या स्वहृदये सम्प्रधार्य श्रीशत्रुञ्जये गत्वा आदिजिनं नमति तस्य जीवितं सफलं स्यात्, स्तोक-कालमध्ये शिवसुखं प्राप्नोति।

एवं गुरुमुखात् सिद्धगिरेर्महान्तं महिमानं[२४] श्रुत्वा। सिद्धशैल-पर्वतवन्दनार्थं पञ्चपञ्चकोटिमुनिपरिवारपरिवृतौ द्राविडवारिखिल्लौ वल्कल-चीवरधारिणौ तापसौ स्वगुरोराज्ञां गृहीत्वा श्रीशत्रुञ्जयं प्रति चेलतुः, गुरुरपि अन्यत्र स्थाने विजहार, अथ द्राविडवारिखिल्लौ क्रमेण सपरिवारौ श्रीशत्रुञ्जयगिरौ आरोहणसमये एतादृशमवग्रहं[२५] जग्राह - यदाऽऽवयोः कर्मक्षयो भविष्यति तदाऽहारं ग्रहीष्यावः, एवं द्राविडवारिखिल्लौ चतुर्मासकालावग्रहमभिगृह्य श्रीशत्रुञ्जये चतुर्मास्यां तस्थतुः, भावतः साधुधर्ममङ्गीचक्रतुः, आत्मानं [२६]भावानुसारिणं प्रवर्तयन्तौ तपः तप्तवन्तौ शुभध्यानयोगेन कर्मराशिदूरीकरणेन [२७]चतुर्मासीप्रान्तदिवसे प्रवर्तमाने कार्तिकशुक्लपूर्णमासीदिने क्षीणमोहेन त्रयोदशगुणस्थानकारोहणेन शुक्लध्यानेन ध्यायमानेन घनघातिचतुष्कर्म-राशिक्षपणेन केवलज्ञानं केवलदर्शनं च तयोरुत्पन्नम्, चतुर्दशरज्जुलोकं ददृशतुः, बहुभव्यजीवान् प्रतिबोध्याऽऽयुष्यकर्मादिचतुष्कर्मराशिं क्षपयित्वा द्राविडवारिखिल्लराजर्षी दशकोटिमुनिभिः सह मुक्तिपुरीं प्रापतुः, अचलाक्षयगतिं शिवं निरुपद्रवं पदं लब्धम्।

तेन कार्त्तिकशुक्लपूर्णिमाऽतीवोत्तमा वर्तते, तस्माद् अद्य दिवसे श्रीशत्रुञ्जयसम्मुखं गत्वा महताऽऽडम्बरेण श्रीयुगादिजिनबिम्बं रथे संस्थाप्य पूजास्नात्रमहोत्सवादिकरणेन महाकर्मराशिः [२८]दूरीक्रियते, महती पुण्यवृद्धिश्च

भवति, तेनाद्य पर्वदिने पूजापौषधादिकरणेन दिवसः सफलः क्रियते ।

**त्रिमुनिश्वाष्टभूवर्षे,[२९] ( १८७३ ) दुर्गे[३०] च जेसलाभिधे ।**
**गणिना जयसारेण, व्यलेखि शिष्यहेतवे ॥१॥**

**: अभ्यास :**

प्रश्नः

१. कथाकृन्महर्षिः तीर्थं कथं नमति ?

२. श्रीऋषभदेवप्रभोस्सर्वा अवस्थाः सकालं विज्ञाप्यताम् ?

३. द्राविडवारिखिल्लयोः युद्धं कथं भूतम् ?

४. द्राविडवारिखिल्लाभ्याम् किं दृश्यं अदर्शि ?

५. विमलगिरेः माहात्म्यं किम् ?

६. द्राविडवारिखिल्लौ केन अभिग्रहेण कतिपय मुनिभिश्च केवलज्ञानं प्रापतुः ?

७. अस्माभिरपि अस्मिन् कार्त्तिकपूर्णिमादिने किं कर्तव्यम् ?

**इति श्रीकार्तिकपूर्णिमाया व्याख्यानं सम्पूर्णम् ।**

**१. पापानि च तानि कर्माणि च पापकर्माणि एव मलः पापकर्ममलः ( अव. कर्म. ) पापकर्ममलं परिहरति पापकर्ममलपरिहारकः तम् पापकर्ममल-परिहारकम् । પાપકર્મરૂપીમળને પરિહાર કરનાર ॥ २. उदरम् एव कन्दरा उदरकन्दरा तस्याम् उदरकन्दरायाम् ઉદરરૂપી ગુફામાં ॥ ३. पित्रा दत्तम् पितृदत्तम् । स्वस्य राज्यम् स्वराज्यम् । पितृदत्तञ्च तद् स्वराज्यश्च पितृदत्तस्वराज्यम् तम् पितृदतत्तस्वराज्यम् । પિતા વડે અપાયેલા પોતાના રાજ્યને. ४. उद्दाल्य उद् + दल-१० ग. उप. નાશ કરીને. ५. गुल्म पुं. વેલાઓનો સમૂહ ॥ ६. निर्झरण नपुं.- ઝરણું ॥ ૭. હાથીના કાનની જેમ ચંચળ એવી રાજ્યલક્ષ્મીને ત્યાગ કર્યા વિના પોતાના કર્મમેલના ભારથી જીવો અધોગતિમાં જાય છે. ॥ ८. अपरिचित्ताई નહિં છોડેલી. ॥ ९. भरातो ભારથી ॥ १०. स्वस्य सहोदरः स्वसहोदरः । स्वसहोदरस्य अपराधः स्वसहोदरापराधः । स्वसहोदरा-पराधस्य क्षामणम् स्वसहोदरापराधक्षामणम् [ष. तत्पु.]तस्मै इदम् स्वसहोदरा-**

पराधक्षामणार्थम् । પોતાના ભાઈના અપરાધને ખમાવવા માટે ॥ ११. बाष्पैः पूर्णे बाष्पपूर्णे । बाष्पपूर्णे नयने यस्य सः बाष्पपूर्णनयनः [समा. बहु.]અશ્રુપૂર્ણ નયનવાળો ॥ १२. अपत्य पुं.- સંતાન ॥ १३. वल्कलचीवर नपुं. વૃક્ષની છાલનું વસ્ત્ર ॥ १४. कृश वि. પાતળું ॥ १५. मुखाग्र - नपुं. નજીક ॥ १६. चटक पुं. - ચકલો ॥ १७. स्तोकम् आयुः यस्य सः स्तोकायुः तम् स्तोकायुषम् । [समा. बहु.]થોડા આયુષ્યવાળો ॥ १८. सु + श्रु प्रेरक कर्म. भू. कृद- સારી રીતે સંભળાવાયો. १९. अत्यन्तं रूपम् अत्यन्तरूपम् । अत्यन्तरूपस्य कान्तिः अत्यन्त-रूपकान्तिः । अत्यन्तरूपकान्तिं धरति अत्यन्तरूपकान्तिधारकः । [उपपद.]અત્યન્ત રૂપની કાન્તિને ધારણ કરનાર ॥ २०. न अन्तः अनन्तः । अन्तश्चासौ कालश्च अनन्तकालः । [वि. पू. कर्म.]अनन्तकालस्य अपेक्षा अन्तकालापेक्षा तया अनन्तकालापेक्षया- અનંતકાળની અપેક્ષાવડે ॥ २१. विद्या धरन्ति विद्याधराः । [उपपद] राजानौ विद्याधाराराजानौ । विद्याधरराजानौ एव ऋषी विद्याधरराजर्षी । [अव. पू. कर्म.]२२. आरोहण नपुं.-ચડવું તે ॥ २३. गञ्जन नपुं. નાશ ॥ २४. महतः भावः महिमा तम् महिमानम् ॥ २५. अवग्रह पुं अभिग्रह ॥ २६. भावम् अनुसरति इत्येवंशीलः भावानुसारी तम् भावानुसारिणम् । २७. चतुर्णां मासानां समाहारः चतुर्मासी । [द्विगु.]चतुर्मास्याः प्रान्तः चतुर्मासीप्रान्तः । चतुर्मासीप्रान्तश्चासौ दिवसश्च चतुर्मासीप्रान्तदिवसः तस्मिन् चतुर्मासीप्रान्तदिवसे ॥ २८. अदूरं दूरं क्रियते दूरीक्रियते [गति.]॥ २९. मुनि पुं. સાતની સંખ્યા. ३०. दुर्ग पुं. नपुं. કિલ્લો ॥

●●●

# [ २४ ]

## ॥ श्रीमौनैकादशी कथा ॥

**अरस्य प्रव्रज्या नमिजिनपतेर्ज्ञानमतुलं,**
**तथा मल्लेर्जन्म व्रतमपमलं केवलमलम् ।**
**वलक्षैकादश्यां[1] सहसि[2] लसदुद्दाममहसि,**
**अदः कल्याणानां क्षिपतु विपदः पञ्चकमिदम् ॥१॥**

अर्थः अरस्य-अरजिनस्य प्रव्रज्या-दीक्षा, नमिजिनपतेः नमिनाथस्य अतुलम्-अनुपमं ज्ञानम्, तथा मल्लेः-मल्लिजिनस्य जन्म, अपमलम्-मलरहितं व्रतम्-दीक्षां, अलम्-सर्वद्रव्यगुणपर्यायप्रेक्षणे[3] समर्थं केवलम्-केवलज्ञानं च, एतद्-अदः लसदुद्दाममहसि-तेजोवति, सहसि-मार्गशीर्षमासे वलक्षैकादश्याम् शुक्लेकादश्यां सञ्जातं कल्याणानां पञ्चकं विपदः[4] क्षिपतु ।

यथाऽस्मिन् भरते कल्याणानां पञ्चकं सञ्जातमेवं पञ्चसु भरतेषु पञ्चसु च ऐरवतेषु-दशसु क्षेत्रेषु मीलित्वा जातं पञ्चाशत् (५०) कल्याणानाम् । एवं भूतभाविवर्तमानकालाऽपेक्षया जातं सार्धशतं (१५०) । एकोपवासेऽपि सार्धशतोपवासफलं भवति । अस्मिन् दिने उपवासं कृत्वा मौनमाधाय अहोरात्रं[5] पौषधं विधाय स्थेयम्, भणनं गुणनं विना नाऽन्यत् किमपि वक्तव्यम् । पारणकोत्तरदिवसयोरेकभक्तं (एकवारं भोजनम्) कर्तव्यम्, पारणकदिवसे जिनगृहे गन्तव्यम्, जिनस्याग्रे फलानि उपढौक्य[6] भावतो जिनार्चा कर्तव्या, ततो गुरुसमीपे गत्वा नत्वा ज्ञानपूजां विधाय साधूनां संविभागं कृत्वा पारणा कर्तव्या, एवं एकादशवर्षैकादशमासपर्यन्तं यावत् व्रतं कर्तव्यम्, द्वादशमे वर्षे व्रते पूर्णे पौषधं पारयित्वा गुरुनभिवन्द्य जिनदेवस्याग्रे एकादश पक्वान्नानि, एकादश फलानि, एकादशविधानि धान्यानि एवं सुन्दरं वस्तु एकादशसङ्ख्यया उपढौकनीयम्, जघन्यतोऽपि एकादश श्रावकवात्सल्यम्, सङ्घपूजा, एकादशाङ्गपुस्तकलेखनम्, इत्याद्युद्यापनं कर्तव्यम्-अत्र कथानकम्-

एकदा ग्रामानुग्रामं विहरन् सर्वज्ञो भगवान् श्रीनेमिनाथो द्वारिकायां समवासरत्, तं वन्दनार्थं श्रीकृष्णः समागतवान्, वन्दित्वा कृष्णोऽवोचत्स्वामिन्! षष्ट्यधिकशतत्रय (३६०) दिनमध्ये एकं सारं [७]वासरं कृपां कृत्वा मम निवेदय, यमाराध्य दानशीलतपोव्रतशक्तिहीनोप्यहं निस्तीर्णो भवामि, भगवान् उवाच-यद्येवं तर्हि त्वं मार्गशीर्षशुक्लैकादशीमाराधय यतः-

**अपि [८]मिथ्यादृशां मान्या, सा मौनैकादशी तिथिः ।**
**मार्गशीर्षाख्यमासस्य[९], शुक्लपक्षे प्रकीर्तिता ॥१॥**

**तत्र पुण्यं कृतं स्वल्प-मपि प्रौढफलं भवेत् ।**
**तस्मादाराधनीया सा, विशेषेण विशारदैः[१०] ॥२॥**

**सर्वेभ्योऽपि च पर्वभ्यः, पर्व पर्युषणाह्व ।**
**दिनेभ्योऽप्यखिलेभ्योऽयं, तथा मुख्योऽस्ति वासरः ॥३॥**

**श्रमणैः श्रमणीभिश्च, श्रावकैः श्राविकादिभिः ।**
**धर्मकर्म विधातव्यमस्मिन् दिने विशेषतः ॥४॥**

इति श्रुत्वा कृष्ण उवाच-विभो ! पूर्वं केनाऽपि एकादशीव्रतमाचीर्णम्[११] ? तस्य च कीदृशी फलप्राप्तिर्जाता ? स्वामी प्राह-धातकीखण्डे इषुकारभूधरात्[१२] पश्चिमे दिग्विभागे विजयं नाम पत्तनमस्ति, तत्र पृथ्वीपालो नाम राजाऽभूत्, तस्य च औदार्यचातुर्य-शीलादिगुणशालिनी चन्द्रवती नाम प्रिया, तत्र च [१३]व्यवहारिशिरोमणिः प्रबलव्यापारोपार्जितबहुधनः [१४]षड्विधावश्यकरतः सत्पुत्रयुतो जिनभक्तिकारकः सूरनामा श्रेष्ठी । स च वृद्धावस्थायामेकदा गुरुसमीपमागत्य भक्त्या प्रणम्य उवाच-भगवन्! ईदृग्विधं धर्मं कथय येन स्वल्पेनाऽपि कर्मक्षयः स्यात्, गुरुणा एकादशीव्रतमादिष्टम्, अथ स गुर्वाज्ञया गृहमागत्य एकादशवर्षैकादशमासपर्यन्तं यावत् तपश्चकार, समाप्ते च व्रते तेन विधिपूर्वकमस्या उद्यापनमपि कृतम् ।

अथ उद्यापनदिवसात् पञ्चदशमे दिवसे आकस्मिकेन[१५] [१६]उदरशूलेन मृत्वा एकादशे [१७]आरण्ये देवलोके एकविंशतिसागरपरिमितायुःदेवो जातः। देवलोकसुखमनुभूय ततः च्युत्वा सौर्यपूरे समृद्धिदत्तव्यवहारिकगृहे प्रीतिमती-प्रियाकुक्षौ पुत्रत्वेनोत्पन्नः, तस्य नालस्थापनार्थं यदा [१८]गर्तं खनितुमारब्धं तदा गर्तखननस्थाने निधिर्निर्गतः, तद्वर्धापनिका[१९] सर्वत्र जाता, जाताऽऽह्लादः श्रेष्ठी महीयांसं[२०] जन्मोत्सवं दशदिवसपर्यन्तं कृतवान्। निवृत्तेऽशुचिकर्मणि प्राप्ते च द्वादशे दिवसे ज्ञातिबान्धवान् भोजयित्वा गर्भस्थेऽस्मिन् मातुर्व्रतेच्छाऽभूदिति गुणनिष्पन्नं सुव्रत इति नाम कृतवान् पिता। न पुनर्मङ्गलादिवद् निरर्थकम्[२१]। उक्तं च-

**भौमं[२२] मङ्गल नाम विषिकरणे भद्रा कणानां क्षये,**
**वृद्धिः, शीतलका च दुष्टपिटके, राजा रजः पर्वणि।**
**मिष्टत्वं लवणे, विष मधुरता, दग्धे गृहे शीतलं,**
**पात्रत्वं च [२३]पणाङ्गनासु गदितं नाम्ना परं नार्थकम् ॥१॥**

अथ पञ्चाभिः धात्रीभिः लाल्यमानोऽसौ अवर्धत, अनुक्रमेणायम् अष्टवार्षिकः[२४] सञ्जातः, तं पुत्रं वीक्ष्य तत्पित्रा चिन्तितम्-

**रूपलावण्यसंयुक्ता नरा जात्यादिसम्भवाः।**
**विद्याहीना न राजन्ते, ततोऽमुं पाठयाम्यहम् ॥१॥**

इति चिन्तयित्वा [२५]महामहैः पितरौ उपाध्यायसमीपे द्वासप्ततिकला-भ्यासं कर्तुं मुमुचतुः। अनायासेन सकला अपि कला अल्पकाले एव पपाठ षड्विधावश्यकसूत्रादिकं श्रावकाचारमपि पपाठ, प्राप्तयौवनस्य तस्य पित्रा श्रीकान्ता, पद्मा, लक्ष्मीः, गङ्गा, पद्मलता, तारा, रम्भा, पद्मिनी, गौरी गाङ्गेया, रतिः, इतिनाम्न्यः महर्द्धिकव्यवहारिणां एकादश कन्याः परिणायिताः ताभिः रूपलावण्यशालिभिः सह भोगान् भुञ्जाना [२६]दोगुन्दकसुर इवाभवत्। तदनन्तरं

तस्मिन् गृभारं समारोप्य स श्रेष्ठी प्रव्रज्यां गृहीत्वा सम्यक्प्रपाल्य प्रान्ते अनशनं विधाय मृतः स्वर्गञ्च प्राप्तः । अथ गृहस्वामी सुव्रतः श्रेष्ठी पूर्वजन्मनि एकादशीमाराधितवान् तत एकादशस्वर्णकोटीनां नायको जातः । तदा एकादशस्वर्णकोटीश्वरो दाता भोक्ता [२७]नगरश्रेष्ठिसुवर्णपट्टालङ्कृतभालो राजमान्यः सत्यवादी सर्वत्र विश्रुतः अतिप्रतापी, सज्जनश्रेष्ठः व्यापारिकशिरोरत्नं सुखेन कालं निनाय । अथ कालान्तरेण एकादशस्त्रीणामेकैकः पुत्रो जातः, एवमेकादश पुत्राः, तत्परिवारोऽपि विपुलो जातः अथान्येद्युः[२८] उद्याने धर्मघोषो मुनीश्वर सपरिवारः समवसृतः राजाद्याः सुव्रतश्च वन्दितुं गताः गुरुणाऽपि तदानीं तपोमहिमा व्याख्यातः-

**यद् दूरं यद् दुराराध्यं, यच्च दूरे व्यवस्थितम् ।**
**तत् सर्वं तपसा साध्यं, तपो हि दुरतिक्रमम् ॥१॥**

तत्रापि पञ्चमीतपसा ज्ञानपञ्चकस्यावाप्तिः, अष्टमीतपसाऽष्टकर्म-निषूदनम्,[२९] एकादशीतपसा एकादशाङ्गानां सुखागमनम्, चतुर्दशीतपसा चतुर्दशानां पूर्वाणामागमनम्, पौर्णमासीतपसा सम्पूर्णागमनम् एवं श्रुत्वा सुव्रतो मूर्च्छामापन्नो जातिस्मृत्या पूर्वभवं मौनैकादशीतपोविधानं विज्ञाय पुनरपि गुरुसमीपे आजन्म यावद् मौनैकादशीतपः उच्चचार । गुरुणा उक्तम्-एकादशाङ्गानामाराधना कर्तव्या, सम्यक् तपः कार्यम्, पूर्वभवे एकादशीव्रतं कृत्वा निर्मलज्ञानमाप्तवान् तदुद्यापनवशाच्च अत्र एकादश स्वर्णकोट्यः प्राप्ताः, निर्मलं यशः, लोके प्रभुत्वम्, अधिकारित्वम्, नगरश्रेष्ठित्वम्, राजमान्यत्वं च प्राप्तम्, अत एव अस्मिन् तपसि उद्यमो विधेयः । एवमुक्त्वा धर्मलाभाशिषं दत्त्वा गुरवोऽन्यत्र विहृताः । अथ सुखेन सह कुटुम्बेन श्रेष्ठी एकादशीदिवसे प्रहराष्टकम् आहारादित्यागरूपं पौषधं विदधाति । लोकेऽपि मौनैकादशीपर्वणः प्रसिद्धिर्मान्यता च जाता यतः वृद्धमान्यं सर्वे मानयन्ति यथा महादेवेन भाले स्थापितत्वात् तत्कालमात्रमपि चन्द्रं द्वितीयादिने लोकाः

पूजयन्ति । एवं च अनेके लोका मौनैकादशीमाराधयन्ति ।

अथ एकदा सकुटुम्बेन तेन श्रेष्ठिना मौनैकादशीतिथ्याम् अहोरात्र पौषधः कृत पौषधग्राहिभिः सर्वैरपि रात्रौ कायोत्सर्गः कृतः । अथैकदा चौरैर्ज्ञातम् मौनैकादश्यां सुव्रतः श्रेष्ठी न ब्रूते [३०]अपह्रियमाणमपि वस्तु न पश्यति इति विचार्य चौरघाटी[३१] तद्गृहे प्रविष्टा उद्योतं (दीपकम्) विधाय चौरा यावत् पश्यन्ति तावत् सर्वत्र पदे पदे स्वर्णराशिमेव पश्यन्ति, यावता गृह्णन्ति तावता शासनदेव्या सर्वे चौराः स्तम्भिताः, अत एव शासनदेवः पूज्यते कायोत्सर्गेणाराध्यते । अथ[३२] प्रातःकाले स्तम्भितान् सधनान् [३३]पर द्रव्यहरणोद्यतान् चौरान् दृष्ट्वा लोको मीलिताः । [३४]तलारक्षकाश्च तान्वेष्टयित्वा स्थिताः । अथ सकुटुम्बः सुव्रतः स्थापनाचार्यसमीपे पौषधं प्रपार्य उपाश्रयं गत्वा गुरून् नत्वा धर्मं श्रुत्वा गृहे समागतः, तत्र चौरान् दृष्ट्वा मा राजा चौरान् मारयतु इति बुद्ध्या श्रेष्ठिना मौनं कृतम्, ततः तलारक्षका आगताः शासनदेव्या स्तम्भिताः अथ मध्याह्ने समागतो राजा, बहुप्राभृतपूर्वं[३५] सुव्रतः पादयोर्लग्नः राज्ञाऽपि व्यतिकरः[३६] पृष्टः, सुव्रतेन कथितः वृत्तान्तः पुनःधर्मपदेशं दत्त्वा राजा तोषितः, राज्ञा उक्तम् वरं वृणु, तदा सुव्रतेन उक्तम्-अवध्याश्चौरा[३७] इति । राज्ञा तथा स्वीकृते शासनदेव्या तलारक्षकाः चौराश्च मुक्ताः श्रेष्ठिनाऽपि पारणकं कृतम् ।

पुनरपि एकदा दावानल इव समग्रं पुरं ज्वलनाय[३८] अग्निरुत्थितः तदा नगरस्थः सर्वलोक इतस्ततो नष्टः, किन्तु [३९]गृहीतपौषधः श्रेष्ठी स्वव्रतरक्षार्थं न कुत्रापि गतः, सर्वं नगरमरण्यमिव ज्वलितं परन्तु सुव्रतश्रेष्ठिनो हट्ट-गृहादि किमपि न अज्वलत् । प्रातःकाले समुद्रे द्वीप इव तस्य, हट्ट-गृहादि वीक्ष्य सर्वेऽपि पौराः सुव्रतं प्रशंसयामासुः, यथा-

**सत्त्वेन धार्यते पृथ्वी, सत्त्वेन तपते रविः ।**
**सत्त्वेन वायवो वान्ति, सर्वं सत्त्वे प्रतिष्ठितम् ॥१॥**

**अहो धर्मस्य माहात्म्यमस्याहो दृढता व्रते ।**
**पालयेद् व्रतमेवं यो, द्वेधाप्यस्य[४०] शिवं भवेत् ॥२॥**

**यतः-धर्माज्जन्म कुले शरीरपटुता, सौभाग्यमायुर्बलं,**
**धर्म्मेणैव भवन्ति निर्मलयशो, विद्यार्थसंपत्तयः ।**
**कान्ताराच्च[४१] महाभयाटच्च सततं, धर्मः परित्रायते,**
**धर्मः सम्यगुपासितो[४२] हि भवति, स्वर्गाऽपवर्गप्रदः[४३] ॥३॥**

अथ एकादशीव्रते पूर्णे जाते श्रेष्ठी उद्यापनाय मुक्ताफलानि रत्नानि शङ्खः प्रवालकानि सुवर्णानि [४४]कलधौतानि ताम्राणि पित्तलानि [४५]त्रपूंषि कांस्यानि पट्टकुलानि, बहुविधानि धान्यानि पक्वान्नानि, नालिकेर-द्राक्षा-सहकारादीनां[४६] फलानि, सुवर्ण-रूप्यकाणां पुष्पाणि, अशोकादीनां पुष्पाणि इत्यादीनि अनेकानि वस्तूनि एकादशसङ्ख्यया जिनेन्द्राग्रे ढौकयामास । एवं विस्तारेण उद्यापनं कृत्वा सङ्घपूजनं [४७]साधर्मिकवात्सल्यादीनि सप्तक्षेत्र्यां धनवपनं[४८] च विधाय मानुषं जन्म कृतार्थं कृतवान् ।

अथैकदा वृद्धावस्थायां रात्रौ मनसि श्रेष्ठी चिन्तयति-मया जन्मपर्यन्तं श्रावकव्रतं पालितं मौनैकादशीतपोऽपि तदुद्यापनादिना पूर्णं कृतम्, अथ असारः संसारः, पूर्वं पश्चाद् वा त्याज्यः इति इदानीं दीक्षां चेत् सुगुरुयोगतो गृह्णामि तदा वरम्, इति चिन्तयतस्तस्य प्रातःकालः सञ्जातः, उद्याने च तरणतारणसमर्थाः[४९] चतुर्ज्ञानधरा गुणसुन्दरसूरयः समागताः, तान् वन्दनार्थं सर्वोऽपि लोको गतः, [५०]निजतनूजस्त्रीपरिवारेण संयुतः श्रेष्ठी अपि गतवान् यावद् वन्दित्वा सर्वे स्थिताः तावद् गुरुभिः देशना प्रारब्धा-

यो यतीनां केवलिप्रज्ञप्तः [५१]अहिंसालक्षणः सप्तदशविधः विनयमूलः क्षान्तिप्रधानः महाव्रतपुरस्सरो धर्मः तेन पवनवद् द्रुतं मोक्षं व्रजेत्, यस्तु द्वादशव्रतात्मकः श्रावकधर्मस्तेन तुरङ्गवेगवद् व्रजेत्, इति अल्पकालेनैव

सर्वदुःखान्तकरः साधुधर्मः द्रूतं मोक्षगमनाय सेव्यः । यदुक्तम्-

**चारित्ररत्नान्नपरं हि रत्नं, चारित्रवित्तान्न परं हि वित्तम्[५२] ।**
**चारित्रलाभान्न परो हि लाभ-श्चारित्रयोगान्न परो हि योगः ॥१॥**

**दीक्षा गृहीता दिनमेकमेव येनोग्रचित्तेन[५३] शिवं स याति ।**
**न तत् कदाचित्तदवश्यमेव वैमानिकः स्यात्[५४]त्रिदशप्रधानः ॥२॥**

इत्यादि देशनां श्रुत्वा सुव्रतोऽब्रवीत्-हे तारक ! अहं संसारकान्ता-रादुद्विग्नोऽस्मि इति गृहभारं पुत्रे समारोप्य श्रीमतां[५५] समीपे दीक्षां ग्रहीष्यामि, इति श्रुत्वा गुरुः उवाच-यथासुखं प्रवर्तस्व प्रतिबन्धं [५६]मा विधेहि ।

ततः श्रेष्ठी गृहं गत्वा कुटुम्बं भोजयित्वा स्वजनपुत्राणामग्रे दीक्षा-ऽऽदेशममार्गयत् । तैरनुमतः सुव्रत एकादशभिः स्त्रीभिः सह प्रवव्राज । शीघ्रमेव तपोविशेषात् कायबलं [५७]क्षयीकृत्य मासिकेनाऽनशनेन तस्य एकादशपत्न्योऽपि केवलं प्राप्य शिवं गताः । अथ सुव्रतः मुनिर्ग्रहणासेवनाशिक्षां पठित्वा साधुधर्मे चरति यदुक्तम्

**जयं चरे जयं चिट्ठे, जयमासे जयं सए[५८] ।**
**जयं भुंजंतो भासंतो, पावकम्मं न बंधई ॥१॥**

एवं पवित्रं चारित्रं पालयामास तथा विशेषतः षष्ठाष्टमादि तपः कृतवान्तस्य सङ्ख्या लिख्यते-

**जनिते द्वे शते षष्ठे, अष्टमानां शतं तथा ।**
**चतुष्टयं चतुर्मास्या, एकं [५९]षाणमासिकं तपः ॥१॥**

**स मौनेकादशीतिथ्यास्तपस्तपन् विशेषतः ।**
**पाठको द्वादशाङ्गीनां, शुद्धां दीक्षामपालयत् ॥२॥ इति ।**

अथैकदा एकादश्यां मोनमास्थाय तपः कुर्वति सुव्रते तत्परीक्षार्थं कश्चिद् मिथ्यादृष्टिदेवः कस्यचित् साधोः कर्णयोः महतीं वेदनामकारयत् तस्य वेदना महति उपचारे कृतेऽपि न शाम्यति, तदा तेन देवेन साधुना पुरत उक्तम्-अस्य वेदना सुव्रतमुनेः भैषज्यात्[६०] क्षयं यास्यति, यदि स एव स्वस्थानाद् बहिरागत्य उपचारं करिष्यति इति, तत् श्रुत्वा ते साधवः तत्रागत्य उपचारार्थं सुव्रतमभ्यर्थयन्, सुव्रतोऽपि मौनी रात्रौ न स्वस्थानाद् बहिर्याति, ततो देवानुभावतः स वेदनार्तो[६१] मुनिः सुव्रतं मस्तके मारयति ततः सुव्रतस्यातीव वेदना सम्भूता परन्तु स मुनिश्चिन्तयति-

**अर्हन्तो भगवन्तो ये, साधवो गणधारिणः ।**
**इन्द्राश्चन्द्रा दिनेन्द्राश्च,[६२] नागेन्द्रा व्यन्तरेन्द्रकाः ॥१॥**
**सचक्रवर्तिनो वासुदेवाः प्रतिनरायणाः[६३] ।**
**बलदेवा नराधीशा, मानवा अपरेऽपि च ॥२॥**
**कर्मणा पापिनाऽनेन, ते सर्वेऽपि विडम्बिताः ।**
**कियन्मात्रो वराकोऽहं, पुरस्तात् तस्य कर्मणः ॥३॥**
**अरे जीव ! क्षमस्व त्वमुदितं कर्म तेऽस्ति यत् ।**
**तद् भोगेन विना नैव, प्रक्षीयेत कदाचन ॥४॥**
**लद्धं[६४] अलद्धपुव्वं-जिणवयण सुभासिअं अभियभूयं[६५] ।**
**गहिओ सग्गइमग्गो-नाहं मरणाउ बीहेमि ॥५॥**
**[६६]तपस्तीव्रं [६७]घरट्टोऽयं, क्षमामर्करिकान्वितः ।**
**धृतिहस्तो मनःकीलः,[६८] कर्मधान्यानि चूर्णयेत् ॥६॥ इति ।**

अथ विभङ्गज्ञानेन मुनिमक्षुभितं मत्वा देवः विशेषेणोपसर्गान् अकरोद्,

मुनिस्तु क्षपकश्रेणिमारूढः केवलज्ञानं प्राप्तवान् भव्यान् प्रतिबोध्य मोक्षं जगाम। एवं श्रीनेमिनाथमुखाद् निशम्य श्रीकृष्णवासुदेवादयः मौनैकादश्यां सादरा बभूवुस्तदा जाता च महती प्रसिद्धिः । एवं श्रुत्वा श्रावकैरपि मौनैकादशीव्रतं कर्तव्यम् ।

## : अभ्यास :

प्रश्न :

१. अस्मिन्पर्वणि कल्याणकानां सार्धशतं कया रीत्या भवति ?

२. तस्मिन् दिने का आराधना कर्तव्या ?

३. मौन एकादशी महिमा केन कस्मै पृष्टः ?

४. सुव्रतश्रेष्ठिनः "सुव्रत" इति नाम किमर्थं कृतम् ?

५. सुव्रतश्रेष्ठी कुत्र अवसत् ?

६. कस्य कस्य तपसः किं किं फलं प्राप्यते ?

७. श्रेष्ठिनां पौषधोपवासस्य साक्षात् फलं कदा लब्धम् ?

८. देवेन सुव्रतमुनेः कीदृशी परीक्षा कृता ?

## इति श्रीमौनैकादश्यां माहात्म्यं (व्याख्यानं) सम्पूर्णम्

**१. वलक्ष वि. शुक्ल ॥ २. सहस-पुं. માગસર માસ ॥ ३. द्रव्याणि च गुणाश्च पर्यायाश्च द्रव्यगुणपर्यायाः । (द्वन्द्व) सर्वे च ते द्रव्यगुणपर्यायाश्च सर्वद्रव्यगुणपर्यायाः । (वि. पू. कर्म.) सर्वद्रव्यगुणपर्यायाणाम् प्रेक्षणम् सर्वद्रव्यगुणपर्यायप्रेक्षणम् (ष. तत्पु.) तस्मिन् सर्वद्रव्यगुणपर्यायप्रेक्षणे । સર્વ દ્રવ્ય-ગુણ-પર્યાયને જોવામાં (સમર્થ) ४. विपदः स्त्री- વિપત્તિઓ ॥ ५. अहश्च रात्रिश्च अहोरात्रः तम् अहोरात्रम् । (समाहार द्वन्द्व) રાત્રિ અને દિવસ ॥ ६. उप + ढौक् १. ग. आत्म. ભેટ ધરવું ॥ ७. वासर पुं. - દિવસ ॥ ८. मिथ्या दृक् येषान्ते मिथ्यादृशः (समा. बहु.) तेषाम्-मिथ्यादृशाम् । ९. मार्गशीर्ष इति आख्या यस्य सः मार्गशीर्षाख्यः । (बहु.) मार्गदृशीर्षाख्यश्चासौ मासश्च मार्गशीर्षाख्यमासः (वि. पू. कर्म.) तस्य मार्गशीर्षाख्यमासस्य । માગસર નામના માસના ॥ १०. विशारद वि. નિષ્ણાત ॥**

११. आचीर्ण वि. આચરેલ १२. भूधर पुं. પર્વત ॥ १३. व्यवहारिषु शिरोमणिः व्यवहारिशिरोमणिः । ( सप्त. तत्पु. ) વેપારીઓમાં શિરોમણિ । १४. षण्णां विधानां समाहारः षड्विधम् । ( समाहार द्विगु ) षड्विधञ्च तद् आवश्यकञ्च षड्विधावश्यकम् । ( वि. पू. कर्म. ) षड्विधावश्यके रतः षड्विधावश्यकरतः । ( सप्त. तत्पु. ) १५. अकस्मात् भवः आकस्मिकः तेन-आकस्मिकेन । [तद्धित.]॥ १६. उदरशूलं नपुं. પેટનો દુઃખાવો. १७. आरणः ૧૧મા દેવલોકનું નામ ॥ १८. गर्तः पुं. ખાડો. १९. वर्धापनिका स्त्री- વધામણી ॥ २०. महीयम् वि. મોટું ॥ २१. निर्गतः अर्थः, यस्मात् तद् निरर्थकम् । ( प्रादि. बहु. ) ॥ ૨૨. ભૌમને મંગળ, વિષ્ટી નામના કરણને ભદ્રા, ધાનને કાપવાના કામને (વાઢ્યો) વૃદ્ધિ, ગરમીના રોગને શીતલા, હોળીનો રાજા, લવણને મીઠું. વિષને મધુર, બળેલા ઘરને ટાઢું (શીતલ) થયું, અને વેશ્યાને પાત્ર કહેવામાં આવે છે. બધામાં નામને અર્થ સાથે કંઈ સંબંધ નથી નામથી ઊલટું જ છે. २३. पणाङ्गना स्त्री- વેશ્યા ॥ २४. अष्टानां वर्षाणां समाहारः अष्टवर्षम् । ( समाहार ) अष्टवर्षे भवः अष्टवार्षिकः । ( तद्धित ) ॥ २५. महान्तश्चामी महाश्च महामहाः तैः महामहैः । ( वि. पू. कर्म. ) મોટા મહોત્સવપૂર્વક ॥ २६. दोगुन्दकसुर पुं. ઇચ્છા મુજબ વિચરનાર દેવ ॥ २७. नगरस्य श्रेष्ठी नगरश्रेष्ठी । ( ष. तत्पु. ) सुवर्णस्य पट्टः सुवर्णपट्टः । ( ष. तत्पु. ) सुवर्णपट्टेन अलङ्कृतम् । सुवर्णपट्टालङ्कृतम् । ( ष. तत्पु. ) नगरश्रेष्ठिनः सुवर्णपट्टालङ्कृतं भालं यस्य सः नगरश्रेष्ठसुवर्णपट्टालङ्कृतभालः । ( व्याधि. बहु. ) નગરશેઠના સુવર્ણપટ્ટથી સુશોભિત લલાટવાળો. २८. अन्येद्युस् अव्य- એક વખત ॥ २९. निषूदनम् नपुं. નાશ ॥ ३०. अपह्रियमाण कर्म. वर्त.कृ- લઈ જવાતાં ॥ ३१. घाटी स्त्री. સમૂહ ॥ ३२. तान् स्तम्भितान् प्रातः तलारक्षको दृष्ट्वा भूपालसमीपे निनाय, राज्ञा वधाय आदिष्टाः, प्रातः श्रेष्ठी पौषधं पारयित्वा प्राभृतं लात्वा राज्ञः पार्श्वे गत्वा सर्वान् अमोचयत् इत्याद्यपि समुपलभ्यते पाठः । ३३. परस्य द्रव्यम् परद्रव्यम् । ( ष. तत्पु. ) परद्रव्यं हरति परद्रव्यहरणम् । ( उपपद ) परद्रव्यहरणे उद्यताः परद्रव्यहरणोद्यताः ( सप्त. तत्पु. ) तान् परद्रव्यहरणोद्यतान् । પરદ્રવ્ય હરણ કરવામાં તત્પર એવા તેઓને. ३४. तलारक्षक पुं. કોટવાળ ॥ ३५. प्राभृत नपुं. ભેટણું ॥ ३६. व्यतिकर पुं. - वृत्तान्त ॥ ३७. अवध्य वि. ન હણવાલાયક. ३८. ज्वालन नपुं. બળવું ॥ ३९. गृहीतः पौषधः येन सः गृहीतपौषधः ( समा. बहु. ) ગ્રહણ કરાયેલ પૌષધવાળો ॥ ४०. द्वेधा अव्य (અહીં) ઉભયલોક ॥

४१. कान्तार नपुं. જંગલ. ४२. उपासित वि. સેવાયેલ ॥ ४३. स्वर्गश्च अपवर्गश्च स्वर्गापवर्गौ । ( द्वन्द्व ) स्वर्गापवर्गौ प्रददाति स्वर्गापवर्गप्रदः ( उपपद ) સ્વર્ગ અને મોક્ષને આપનાર. ॥ ४४. कलधौत नपुं.- એક પ્રકારનું સુવર્ણ ॥ ४५. त्रपुस नपुं. કલાઈ ॥ ४६. सहकार पुं. આંબો ॥ ४७. समाने धर्मे भवाः साधर्मिकाः ( तद्धित ) साधर्मिकाणां वात्सल्यम् साधर्मिकवात्सल्यम् । ( ष. तत्पु. ) साधर्मिकवात्सल्यम् आदौ येषां तानि साधर्मिकवात्सल्यादीनि । ( बहु. ) ४८. वपन नपुं. વાવવું ॥ ४९. तरणश्च तारणश्च तरणतारणे । ( द्वन्द्व ) तरणतारणयोः समर्थाः तरणतारण-समर्थाः । ( सप्तः तत्पु. ) તરવા તથા તારવામાં સમર્થ. ५०. तनूज पु. पुत्र ॥ ५१. न हिंसा अहिंसा । ( नञ्. तत्पु. ) अहिंसा लक्षणं यस्मिन् सः अहिंसालक्षणः । ( ब. व्री. ) અહિંસા લક્ષણવાળો ॥ ५२. वित्त नपुं- धन ५३. उग्रचित पुं. तीव्र સંવેગપૂર્ણ ચિત્ત ॥ ५४. त्रिदशप्रधान पुं. શ્રેષ્ઠ દેવ ॥ ५५. श्रीमत् वि. - આપ પૂજ્ય ॥ ५६. प्रतिबन्ध पुं. વિલંબ ॥ ५७. न क्षयम् अक्षयम् । ( नञ्. तत्पु. ) अक्षयं क्षयम् इव कृत्वा क्षयीकृत्य । ( च्वि. समास. ) ॥ ५८. सए શયન કરવું જોઈએ. ॥ ५९. षण्णां मासानां समाहारः षण्मासम् । [द्विगु]षण्मासे भवम् षाण्मासिकम् ( तद्धित ) ॥ ६०. भैषजय नपुं.- ઔષધ ॥ ६१. वेदनया ऋतः वेदनार्त्तः । ( तृ. तत्पु. ) वा वेदनया आर्त्तः वेदनार्त्तः । ( तृ. तत्पु. ) વેદનાથી પીડાયેલ ॥ ६२. दिनेन्द्र पु. सूर्य. ६३. प्रति नारायण पुं. प्रति વાસુદેવ ॥ ६४. કદી ન મળેલું અમૃત જેવું મધુર અને સુંદર જિનવચન, મને મળ્યું, સદ્‌ગતિનો માર્ગ પ્રાપ્ત થયો તેથી હવે હું મૃત્યુથી ડરતો નથી. ६५. તપરૂપી તીવ્ર ઘંટીનું પૈડું જે ક્ષમારૂપી થાળા ઉપર મનરૂપી ખીલામાં ફીટ થયેલું છે. અને ધૈર્યરૂપી જેનો હાથો છે તે કર્મ રૂપી અનાજ દળી નાંખે છે. ॥ ६६. अमियभूय वि. અમૃતસમાન ॥ ६७. घरट्ट पुं. ઘંટી ॥ ६८. कील पुं. ખીલો ॥

• • •

# [ २५ ]

## ॥ श्रीपौषदशमीमाहात्म्यकथा ॥

( फलवर्धि-पार्श्वनाथतीर्थ-माहात्म्यम् )

श्रीपार्श्वनाथमवनम्य सुधर्मवृक्ष-
मेघं सुवाणिमतुलां सुगुरुं स्वकीयम् ।
कुर्वे कथां प्रवरतज्जिनजन्मपूत-
सत्पौषकृष्णदशमीदिवसस्य वर्याम् ॥१॥

अहं श्रीपार्श्वनाथं त्रयोविंशतितमतीर्थङ्करमवनम्य नत्वा, किं भूतं पार्श्वनाथं सुधर्मः सुष्ठु जिनोक्तो धर्मः, स एव वृक्षस्तस्य सिञ्चने मेघस्तं, पुनः वाणीं सरस्वतीं देवीमतुलामनुपमां, पुनः स्वकीयं सुगुरुं सद्गुरुं शुच्याचारप्रचाराचरित्रचारित्रश्रीमत्पन्यासदयाविमलगणिशिष्यसम्प्राप्तसौभाग्य-श्रीपन्याससौभाग्यविमलगणिसंज्ञकमवनम्य च प्रवरः श्रेष्ठो यस्तज्जिनस्तत्पार्श्वनाथजिनस्तस्य जन्म तेन पूतं पवित्रं यः सत्पौषकृष्णस्य सत्पौषमासकृष्णपक्षस्य या दशमीतिथिस्तस्या दिवसस्तस्य माहात्म्यकथां कुर्वे करोमि ।

तथाहि-श्रीपार्श्वनाथतीर्थनाथनामस्मरणात्रेणैव सिद्धिसाधितृणां सकलसमीहितार्थाः सिद्ध्यन्ति । यच्चोक्तम्-"तह[१] समरं हतविग्घं दत्तपुत्तकलत्तहिं" तथा तज्जिनप्रणाममप्यत्यन्तफलदायकं यतश्चोक्तम्, श्रीभद्रवाहुस्वामिभिः "चिट्ठउ दूरे मंतो तुज्झ पणामो वि बहुफलो होइ" इत्यादि यतः-श्रीपार्श्वनाथार्हतः पादस्पर्शनमात्रतः लौकिकैर्वन्द्या गङ्गानद्यपि पवित्रा जाता तत्सम्बन्धि कथानकं हरिवंशपुराणोदितं लोकानां कौतुकाय लिख्यते ।

तद्यथा-अथैकदा समये गङ्गादेवी देवेन्द्रसभायां गता, परमिन्द्रेण

गङ्गायाः सत्कारादिकमपि न कृतं, ततः सन्मानदानाभावतो विलक्षीभूता[२] गङ्गादेवी स्वस्थानमेतुं[३] पुनर्यावत्पश्चाद्वलते तावदिन्द्रस्तत्पार्श्वे समाययावागत्य चैवमुक्तं "भगवति गङ्गे ! समागच्छ भवत्याः किं कार्यमस्ति" तच्छ्रुत्वा गङ्गादेव्या प्रोक्तम्, "भो देवेन्द्र ! त्वं प्रचुरसाम्राज्यमदेन प्रोन्मत्तीभूतोऽस्यतः[४] कारणादसम्सु तव किं प्रयोजनं यतो ममागमने त्वं प्रत्युत्थानादिकमपि[५] न कुरुषे"। तद्वचनामाकर्ण्येन्द्रो जगाद "भगवति गङ्गे ! क्षमस्वेदानीमस्मदपराधं, यतो मया भवत्या एव चिन्ता क्रियते" तदा गङ्गादेव्योक्तम्, "का सा तव मच्चिन्ता ?" देवेन्द्रोऽप्यूचे मनुष्यलोकवासिनो मनुष्या बालस्त्रीगोब्रह्म-हत्यादिमहापापानपि कृत्वा त्वयि स्नात्वा तानि सर्वाण्यपि तुभ्यं समर्प्य त्वद्यात्रानिर्मातारो[६] लोकाः स्वनिलयं[७] प्रतियान्ति ततस्तैस्त्वयि मुक्तान् पापान् त्वं तु कुत्रस्थाने क्षिपसीति चिन्तया मम चित्तं भृतमस्तीति श्रुत्वा गङ्गादेवी प्रोवाच, "भो देवेन्द्र ! मया तानि सर्वाण्यपि पापानि जनार्दनपादयोः[८] प्रक्षिप्यन्ते। यच्चोक्तं स्मृत्यन्तरे विष्णुपादोदकी गङ्गेति तेषां पापानां च परमेश्वरजनार्दनपादस्पर्शनान्मुक्तिर्भवतीति" गङ्गावचनमाकर्ण्य सुरेन्द्रः प्राह, "हे गङ्गे ! त्वं मैवं ब्रूहि तवेदं वचो भ्रममूलकमेव। यतः-कौरवपाण्डवानां युद्धे यदा पाण्डवैः स्वबलं प्रशंसितं तदा कृष्णवासुदेवेनाऽप्युक्तम्, भोः। पाण्डवा ! भवद्भिरभिमानो नाभिकर्त्तव्यो यतो युवयोर्बलं सम्यङ्मया दृष्टमस्ति तत्र भवतां बलमेव न हि हेतुर्भवन्तस्तु तत्र कारणभूता एव किं त्वयं मम सुदर्शनचक्र एव सर्वान् मारयेदेतासामष्टादशाक्षौहिणीनां मारणरूपपातकस्तु मत्पादयोरेव[९] वर्त्ततेऽत एव मया तत्पापप्रक्षालनार्थं गङ्गानदी निस्सारिता सैव लोकानां पापप्रक्षालनं करिष्यती"त्यादीन्द्रवाक्यमाकर्ण्य गङ्गादेवी पुनरिन्द्रमब्रवीत् "यद्येवं तर्हि अहं त्वीश्वरस्य शिरसि तिष्ठाम्यतो मदीयं पापमीश्वरस्य मस्तके पतति" तद्वचः श्रुत्वा पुनर्देवेन्द्रः प्राह, भगवति ! गङ्गे ! इत्येतदपि तव भ्रम एव यतो महादेवेन स्वकीयत्रिशूलेन ब्रह्मदेवस्य पञ्चमगर्दभशिरच्छेदितमतस्त-त्पातकपरिहारेच्छया स महादेवस्तु त्वां शिरसि सन्धत्तेऽतः स तव स्वाम्यपि स्वपापं तवैवार्पयति तर्हि मदीयं पापमीश्वरमस्तके पततीति तव वचनमुपहास्य-जनकामेवेति सुरेन्द्रवचो निशम्य गङ्गा प्राह "एवमस्तु परं मम यात्रायां

[10]"परदारापरद्रव्यपरद्रोहपराङ्मुखः कोऽपि महात्मा पुरुषः समायास्यति तदा तत्पुरुषचरणरजसैवाहं पवित्रीभविष्याम्यर्थात्स महात्मा पुरुष एव मां पावयिष्यति" तद्गङ्गादेवीवचनं श्रुत्वा देवराजोऽप्याह" गङ्गे ! चैवंविधस्तु त्वदुक्तो महात्मा देवलोके पातालेऽपि नास्ति तर्हि मनुष्यलोकस्य तु का कथा इतीन्द्रवदननिर्गतवचनं श्रुत्वा हृदि कुपिता गङ्गादेवी चैतादृग्विधस्य महात्मनो दर्शनार्थं सहस्रशो नेत्राणि विधाय कमपि महान्तमनुपमपुरुषमन्वेषयत्परमी-दृग्विधः पुरुषः क्वापि नोपलब्धः प्रतिदिनमेवं तादृक्पुरुषं गवेषमाणया गङ्गा-देव्या कियता कालेन वाराणस्यां नगर्यां श्रीपार्श्वकुमारो दृष्टस्तत्तीर्थङ्करदर्शनादेव सञ्जातप्रमोदा वाराणसीनगर्यामागत्य पञ्चकोशं यावत्तदभ्यर्णे[11] स्थितवती तेन श्री पार्श्वनाथप्रभावेण स्वयमतीव पवित्रीभूय त्रिभुवनपावनसमर्था बभूव। श्रीपार्श्वनाथचरणप्रक्षालनतस्तस्याः सर्वमेव पापं प्रलयं गतमत एव वाराणसी-पुरीपार्श्वे पञ्चक्रोशं यावद्गङ्गानद्यां जलस्नाने पापिनां पापं प्रणश्यतीत्युच्यते। तथैवैतादृशानि बहूनि श्रीपार्श्वनाथाभिधतीर्थनाथप्रतिमाचमत्काराणि दृश्यन्ते। तथा चाद्याप्यष्टोत्तरशतपरिमितानि [12]निखिलापद्विनाशकानि भूरिभव्यजन-नमस्कृतानि सकललोककामितदायकानि श्रीपार्श्वनाथप्रतिबिम्बानि नभसि विरहन्त्य एव कारणात् सपादलक्षदेशान्तर्गतश्रीफलवर्द्धिकाभिधग्रामेस्मिन्नेव पौषबहुलदशमीदिवसे श्रीचतुर्विधसङ्गमिलनेन श्रावकसमूहेन बहुद्रव्य-व्ययपूर्वको महीयान् समर्चनः क्रियते तदस्मिन्विषयेऽदभ्रभव्यप्रतिबोधाय कथानकमभिधीयते।

श्रीविक्रमादित्य क्षितिपतिराज्याच्चतुःसप्तत्याधिकैकादशशत ११७४ प्रमिते[13] वत्सरे श्रीमद्देवसूरिनामान आचार्यवर्याः सञ्जाताः येषां त्रिचत्वारिंश-दधिकैकादशशतवर्षे जन्म तथा द्वापञ्चाशदधिकैकादशशतवर्षे दीक्षा तथा चतुस्सप्तत्यधिकैकादशशतवर्षे सूरिपदं तथा षड्विंशत्यधिकद्वादशशतवर्षे स्वर्गवासः यैराचार्यैश्चतुरशीतिवादिनामधिपः कुमुदचन्द्राभिधो दिगम्बरचन्द्रोऽपि पराजितः।

यच्चोक्तम्, श्रीदेवसूरिकृत प्रमाणनयतत्त्वालोकालङ्कारस्य रत्करा-

वतारिकानाम्नीलघुवृत्तौ श्रीदेवसुरिशिष्यैः श्रीरत्नप्रभसूरिभिः यैरत्र स्वप्रभया दिगम्बरस्यार्पिता [१४]पराभूतिः प्रत्यक्षं विबुधानां जयन्तु ते देवसूरयो नव्याः । तथा तैरेव तद्दिगम्बरबौद्धादिकुमतिमतोच्छेदनतत्परोऽष्टाध्यायरूपः प्रमाणनय-तत्त्वालोकालङ्कारस्याद्वादरत्नारनाम प्रमाणः ग्रन्थो ग्रथितस्तद्वृत्तिश्च चतुरशीति-सहस्रश्लोकपरिमिता कृतास्तद्विनेयैर्स्लघुवृत्तिर्विहिता तत्र चतुरशीतिवादिनश्चेमे । यतः-

**बंभअट्ठनव १७ बुद्धनग १८ अट्ठारहजित्तीय शैव ।**
**सोल १६ दहभट्ट १० सत्त ७ गंधव्व विजित्तीय ।।१।।**

**जित्तदिगम्बरसत्त ७ पुणरवरवत्तियचार ४ ।।**
**दु २ ज्झोइ ईक १ धीवरइक १ भिल्ल अरु**
**भूमिपाडइक १ भोई ।।२।।**

इत्येषां गुणनयोगेन चतुरशीतिवादिनो भवन्त्येतच्चतुरशीतिवादिनाथ-कुमुदचन्द्रदिगम्बरोऽणहिलपुरपत्तने सर्वराजसभासमक्षं पराजितोऽतः सिद्धराज-जयसिंहमहीपतिसभास्थितैः सर्वपण्डितैः श्रीदेवसूरिणां श्रीवादिदेवसूरिरित बिरूदं प्रदत्तमथैकस्मिन् समये श्रीवादिदेवसूरयश्चातुर्मासतपश्चर्यार्थं श्रीमण्डन-मेडतानामनि नगरे संस्थातिस्तत्रस्थाः श्राद्धसद्धर्माराधननिबन्धनबुद्धयः शुद्धश्राद्धाः सर्वे वक्ष्यमाण सद्विधिना धर्ममाराधयन्तस्तिष्ठन्ति स्म यतः-

**व्याख्यानश्रवणं जिनौकसि[१५] गर्तिर्नित्यं गुरोर्वन्दनम् ,**
**प्रत्याख्यानविधानमागमगिरां चित्ते चिरं स्थापनम् ।**
**कल्याणोदिमात्मशक्तितपसा संवत्सराराधनम् ,**
**श्राद्धा जन्मफलं सदेति जगृहुः श्रीदूरिपादान्तिके ।।१।।**

**तथाऽन्यत्रापि प्रोक्तम्, यतः-**

**त्रैकाल्यं जिनपूजनं प्रतिदिनं सङ्घस्य सन्मानम्,**
**स्वाध्यायो गुरुसेवनं च विधिना दानं तथावश्यकम् ।**

**भक्त्या च व्रतपालनं वरतपो ज्ञानस्य पाठस्तथा ।**
**सैष श्रावकपुङ्गवस्य[१६] कथितो धर्मो जिनेन्द्रागमे ॥१॥**

ततश्चैवं तत्र चातुर्मास्यमतिवाह्यते श्रीवादिदेवसूरयो महात्मानोऽपि विहरन्त [१७]स्वकीयोपदेशजलधरधारया भव्यमनःप्रमोदलताकन्दमुत्पादयन्तः श्रीफलवर्द्धिपार्श्वनाथराजिते श्रीफलवर्द्धिपुरे मासकल्पकरणाय समाजग्मुस्तत्रपुरे चैको निर्धनः पारससंज्ञकः श्रावकः प्रतिदिनं धर्ममेवाराधयन् तिष्ठति । यतः-

**निद्रान्ते परमेष्ठिसंस्मृतिरथो देवार्चनाव्यापृतिः,**
**साधुभ्यः प्रणतिः प्रमादविरतिः सिद्धान्ततत्त्वश्रुतिः ।**
**सर्वस्योपकृतिः शुचिव्यवहृतिः सत्पात्रदाने रतिः,**
**श्रेयो निर्मलधर्मकर्मनिरतिः[१८] श्लाघ्या नराणां स्थितिः ॥१॥**

ततो दौःस्थ्यावस्थायामवस्थितेऽपि तस्मिन् पारसश्रावके सर्वे एव श्रमणोपासकगुणाश्चासन् । ते चामी योगशास्त्रे श्रीहेमचन्द्रसूरिभिरूक्तास्तद्यथा,

**न्यायसम्पन्नविभवः शिष्टाचारप्रशंसकः ।**
**कुलशीलसमैः सार्द्धं कृतोद्वाहोऽन्यगोत्रजैः ॥१॥**

**पापभीरुः प्रसिद्धं च देशाचारं समाचरन् ।**
**अवर्णवादी न क्वापि राजादिषु विशेषतः ॥२॥**

**सदा कुलौचितं कुर्वन् व्ययं चित्तानुसारतः ।**
**अष्टविधगुणैर्युक्तं शृण्वानां धर्ममन्वहम् ॥३॥**

**दीर्घदर्शी विशेषज्ञः कृतज्ञो लोकवल्लभः ।**
**सलज्जः सबलः सौम्यः परोपकृतिकर्मकृत् ॥४॥ इत्यादि ।**

अक्षुद्रो १ रूपवान् २ सौम्यो ३ विनय ४ निययुतः ५ क्रूरता ६ शाठ्यमुक्तो[१९] ७ मध्यस्थो ८ दीर्घदर्शी ९ परहितनिरतो १० लब्ध लक्षः ११

कृतज्ञः १२ सद्दाक्षिण्यो १३ विशेषज्ञ १४ सदय १५ गुणरुचि १६ सत्कथः १७ सुपक्षयुक्तो १८ वृद्धार्हो १९ सलज्जः २० शुभजनदयितो २१ धर्मरत्नस्य योग्यः श्राद्धगुणाः । एवं विधः श्रावकः कथ्यते । स च धर्म एव रत्नं तस्य योग्यः ।

किं रूपः ? अक्षुद्रः अपरच्छिद्रान्वेषी १ रूपेण युक्त रूपवान् । २ सौम्यश्च ३ विनयः गुरुजनानां नम्रीभावः, नयः न्यायमार्गस्ताभ्यां सहितः विनयी ४ नयी ५ क्रूरता रौद्राकारता, शाठ्यं मायावित्वगताभ्यां रहितः अक्रूरः ६ मायारहित ७ मध्यस्थः न कदाग्रही ८ दीर्घदर्शी अग्रेतनशुभचिन्तकः ९ अन्यवात्सल्यतत्पर[20] १० लब्धलक्षः अवसरज्ञाता ११ कृतज्ञः कृतं जानातीति १२ सत्प्रधानं दाक्षिण्यं यस्य स तथा १३ विशेषो विद्यते यस्मिन् सविशेषी विशेषज्ञ इत्यर्थः १४ सदयो दयावान् १५ गुणो रुचिरभिलाषो यस्य स गुणरुचिः गुणरागीत्यर्थः १६ सती प्रधानाकथावार्त्ता यस्य सत्कथः, स्त्रीकथा, भक्तकथा, देशकथा, राजकथा भेदाच्चतुर्विधकथा तया रहित इत्यर्थः १७ उभयपक्षविशुद्धः १८ वृद्धार्हो वृद्धजनसेवापरः १९ लज्जावान् २० शुभजनानां सत्पुरुषाणां दयितो वल्लभो लोकप्रिय इत्यर्थः २१ य एकविंशतिगुणवान् स्यात् स योग्यः ।

श्रावकगुणैः पारसमणिरिव निर्मलः पारसनामा श्राद्धः समभूदथैकदा स पारसश्रावको बहिर्भूमिं गतस्तत्रैकं [21]पाषाणम्लानपुष्पशोभितं तत्रस्थामवनिं च सचिक्कणामवलोक्य[22] स्वचेतस्याश्चर्यं दधानो निजगृहमागत्य मनस्यैवं चिन्तयति स्म । तदस्मिन्नवावसरे तस्य श्रेष्ठिनश्चैका गौ गोपालकेन वने नीयमाना सायाह्ने गृहं प्रत्यागतवती दुग्धदोहा[23] भवत् । ततस्तां निर्दुग्धां धेनुं विलोक्य गोपालमाहूय तस्यैव चौर्यमित्यवगम्य भृशन्तं गोपालमताडयत्ततस्ताडनाद्भीतेन गोपालेन प्रोक्तम्, स्वामिन्नत्र ममापराधं न किञ्चिदप्यस्ति यतो युष्माकमियं गौः स्वयमेव तु [24]कानने पयः प्रस्रवतीदं मद्वचनं यदि मिथ्यैव जानासि तर्हि मया सह तत्र वनप्रदेशे समागत्य भवान् प्रदर्शयत्वित्यादि गोपवाक्यमाकर्ण्य स पारसश्राद्धस्तदनु तद्वनदेशे स्वधेनुपयः पतनस्थाने समागच्छत् । ततो द्वावेव

श्रेष्ठिगौपो तस्याः मार्गे गत्वा स्वयं तत्रैकस्मिन् प्रदेशे दुग्धं प्रस्रवन्तीमात्मीय-सुरभिमवेक्ष्य सञ्जातविस्मयौ तौ द्वावपि स्वगृहमीयतुस्ततः प्रभातकाले साश्चर्यं स पारस श्रावकः श्रीमद्वादिदेवसूरिगुरुणामभ्यर्णे गत्वा तत्कारणं विनयेन कृताञ्जलिः शीघ्रमपृच्छत् ततः श्रीमद्वादिदेवसूरिगुरवोऽपि शुद्धध्यानेनैतदवलोक्य तत्रभूमौ जैनेश्वरीं काञ्चनप्रतिमामवगत्य तेन पारसश्रेष्ठिना सह तस्मिन् वनप्रदेशे समागत्य [२५]तामवनिमुत्खातयामासुस्ततस्तद्भूमिगर्त्तादेका[२६] स्वद्युतिसमुदायेन तत्काननदेशमुद्योतयन्ती तदालोकिलोकानामभितश्चित्तवृन्दममन्दमानन्दयन्ती श्रीपार्श्वनाथार्हत्प्रतिमा निःसृता। ततो महताडम्बरेण तां रथे समारोप्य निजगृह-मानीय श्रीमद्देवसूरिगुरुभिराज्ञप्तः स पारस श्रावकस्तस्यास्तीर्थकृत्प्रतिमायाः प्रतिदिनं पूजनादिकं विदधाति स्म।

ततश्चैकदा सा सद्देवताधिष्ठिता श्रीपार्श्वनाथार्हदप्रतिमप्रतिमा तं श्रेष्ठिश्रेष्ठं स्वप्नमध्ये वक्ष्यमाणं [२७]भारत्यैवमुवाच। "हे भक्तैकवत्सल ! श्रीपार्श्वनाथ-भक्त ! ममोत्तमप्रासादं कारयेति" वचनमाकर्ण्य पारसाभिध श्राद्धोऽप्यभ्यधात् ,"त्रिजगज्जनस्वामिन् ! हन्त नितरां निर्द्रव्योऽस्म्यतो द्रव्यासद्भावात्कथं त्रिभुवनाधिभवनं भवेदिति" श्रुत्वा जिनप्रतिमयाप्युक्तम्, "वित्तस्य चिन्ता त्वया न कर्त्तव्या। यतो मम पुरस्तादतुललोकैः प्रत्यर्पिता अक्षताः सुवर्णमया भविष्यन्ति, तैश्चापरिमितं वित्तं तव सदने स्वयमेवायास्यति परमियं मदुक्ता वार्त्ता कस्याप्यग्रे नावश्यं प्रकाशनीयेत्यादि' वचनमुक्त्वा [२८]त्रिदशस्तिरोहितस्ततः [२९]प्रत्यूषसमये समुत्थाय पारसश्रावकस्तीर्थकरदेवसदनं कारयितुं स्वमनसि दृढविचारमकरोत्तद्दिवसत एव ये पार्श्वनाथप्रतिमापूजनकाङ्क्षया ये भव्य-जनास्तत्र प्रतिमापाश्र्वे समेत्याक्षतानि[३०] सदक्षनान्यर्पयन्ति ते च सुवर्णमया भवन्ति स्म।

अथ च कियता कालेन पुष्कले [३१]कलधौते जाते सति पारसाख्येन श्रेष्ठिना श्रीपार्श्वदेवसदननिर्माणं प्रारब्धं, तदा कियद्भिर्दिनैर्विशालोद्दण्डमण्डप-मण्डितं, कमनाकारप्राकारवेष्टितं, कनकमौक्तिकतोरणादिपरिकलितं, [३२]जाम्बू-नदजटितस्तम्भराजिविराजितं, द्वारिसंस्थितमत्तवारणवर्णनीयं, पार्श्वयोश्च धर्म-

शालायुगलेन शोभितं, कूपवापिकायुक्तं, [३३]मनोहरारामरमणीयमपरं, वैमानिकविमानमिव श्रीमत्त्रयोविंशतितमतीर्थङ्करश्रीपार्श्वदेवमन्दिरमुद्यद्द्युतिमज्जातम् । तन्महावैभवकार्यमालोक्य लोकानां मनस्यतीव कौतुकमभूत् । लोकाश्चानल्पविस्मयविस्मिताः सञ्जाताः, परं न कोऽपि पुरुषः किञ्चिन्मुखाद्वदति, ततश्चान्यदा तस्य पारसश्रेष्ठिनः कनिष्ठपुत्रेणात्यन्ताग्रहात् पृष्टम्, 'हे तात ! त्वयैतावद्धनं कुतः प्राप्तमिति' सुतवचनं श्रुत्वा पारसश्राद्धेनाप्यधायि 'रे पुत्रबालक [३४]क्षीरकण्ठश्चास्यतस्तवेदृग्विधेन प्रश्नेन किं कार्यमस्त्यतस्त्वं मौनं कुरु,' तथापि पुत्रस्तु तत्पितृवचनं निशम्य बालकभावाद्धठमवलम्ब्य भोजनप्रमुखमपि त्यक्तवानथ तत्पुत्रस्य कदाग्रहमवलोक्य स पारसाभिधसाधुः सुतस्नेहवशतः सकलमपि कलधौतप्राप्तिसाधनं प्रत्यवोचत् ततस्तदनन्तरं पूर्ववद्द्वितीये दिवसे ते चाक्षताः स्वर्णमया नाभवन्, तेनावशिष्टं धनं गृहमवशिष्टमेवासीत् ।

परं श्रीमज्जिनेश्वराज्ञानुपालकमुनिचन्द्रश्रीमुनिचन्द्रसूरिपदाम्भोजभ्रमरायमाण सहृदयसैद्धान्तिकतार्किकवैयाकरणकविचक्रचक्रवर्त्तिसुविहितसुगृहीतनामधेयैः श्रीमद्वादिदेवसूरिभिस्तत्रागत्य विक्रमादित्यश्चतुरधिकद्वादशशते वर्षे १२०४ तत्पार्श्वनाथबिम्बचैत्यस्य तस्य गृहस्य प्रतिष्ठा कारिता, तच्च फलवर्धिकानामतीर्थं सञ्जातम् । तत्तीर्थस्य महिमा केनापि कविना वक्तुं नैव शक्यते यत्र च तीर्थे स्वयमेव भगवानधिष्ठायकवृन्दारकाधिष्ठितस्तीर्थङ्करो नृसिंहरूपेण तत्तीर्थस्य रक्षां करोति, तदाऽऽराधनविधिस्तु श्रीजिनप्रभसूरिकृततीर्थकल्पादवसेयो, यदा स महाप्रभुः सन्तुष्टो भवति तदा प्रदीपहस्तस्तन्मन्दिराद्बहिः समागत्य स्वदर्शनेन जनान् कृतार्थयति लोकेभ्यश्च वरान् प्रयच्छति । तत्रार्हत्प्रासादद्वारेषु कपाटानि न सन्ति यतस्तत्र कपाटदानेन देवप्रभया कपाटानां स्वयमेव भञ्जनं भवति, तत्र तीर्थे च पौषबहुलदशमीदिवसे महामहोत्सवं भवति । तथाऽस्मिन् पर्वणि सहस्रशो जनास्तत्र गत्वा तत्तीर्थदर्शनादिना स्वकीयपापकलापं प्रणाशयन्ति ।

तत्फलवर्धिपार्श्वनाथप्रतिमास्नात्रजलेन नेत्रप्रक्षालनाल्लोकानामक्षिरोगा नश्यति । तत्प्रेक्षणे ज्वारादयश्चामया[३५] विलयं प्रयान्ति, तत्तीर्थदर्शनमाहात्म्यतो

भक्तलोकानामुत्तरोत्तरमङ्गलमाला मिलत्यतः कारणाज्जनैस्तत्तीर्थयात्राऽवश्यं करणीया । विशेषतोऽस्य तीर्थस्य पौषदशमी एव पर्व, ततस्त्पौषदशमी समाराध्या तद्विधिरप्यस्मत्कृतप्रथमपौषदशमीकथानकादवसेयस्तत्पौषदशमी-व्रताराधका अप्यतुलतीर्थंकरोक्तजीवदयाधर्ममङ्गीकृत्य विमलसौभाग्यवाप्या-खिलकर्मप्रमुक्तिरूपविमलमुक्तिसुखभाजो भव्या भवन्त्यतस्तत्पौषदशमी-व्याख्यानमात्मीयकर्णाभ्यामाकर्ण्याराधकैस्तदाराधनं विधेयं शुद्धसिद्धान्त-श्रद्धालुभिः श्राद्धैरित्यस्माकं हितोपदेशस्ततश्चाथ संस्कृतगद्यबद्धपौषदशमी-कथारचयितृस्वगुरुपरम्परादिप्रशस्ति-रुच्यते । यतः-

॥ अथ शार्दूलविक्रीडितवृत्तम् ॥

**आनन्दाद्विमलास्तपागणवरे जाताः सुसूरीश्वरा-**
**स्तच्छिष्याः कृतिनः सुऋद्धिविमला ज्ञानादिरत्नाकराः ।**
**स्फुर्जत्कीर्त्तिसुकीर्त्तिविमलास्तेषां विनये पुन-**
**स्तेषां धीरसुवीरवीरविमला जाताः सुशीलालयाः ॥१॥**

**तेषां शिष्यवरा विशुद्धविमलास्तेषां विशुद्धाशयाः,**
**सौदर्याः सुमहोदयादि विमला मोक्षस्य मार्गाध्वगाः ।**
**तेषां शिष्यधवाः प्रमोदविमलाः सर्वप्रमोदप्रदा-**
**स्तेषां सन्मणयो मणीविमलजित्संज्ञाः सुशिष्याधिपाः ॥२॥**

**उद्योताद्विमलाः प्रखण्डितमला उद्योतदीप्ताः,**
**पुनस्तेषां ज्ञानसुदानिदानविमलाः शिष्यानिदानं श्रियात् ।**
**पन्न्यासाः सुदयादयादिविमलास्तेषां विनेया नयाः,**
**सौभाग्याद्विमलाः सुभाग्यभरभृद्देहा मुदा मालयाः ॥३॥**

**तच्छिष्येण सुमुक्तिमुक्तिविमलेनोद्यद्गुरोराज्ञया,**
**पन्न्यासाख्यपदान्वितेन मयका सद्गद्यबद्धं मुदा ।**

पार्श्वार्हज्जनि पूतपौषदशमीमाहात्म्यमेत्कृतं,
श्रीप्राल्हादनपार्श्वपूतजगतौ प्राह्लादनाख्ये पुरे ॥४॥
तत्रस्थे शुभडायराख्यवसतौ संवेगिसूपाश्रये
संवत्सोम १, हयां ७ क ९ चन्द्रक १ मिते माघे सुमासे तिथौ ।
राकायं[३६] रविवारके कृतमिदं भव्यप्रबोधप्रदं,
यावच्चन्द्रदिवाकरौ[३७] विजयतां तावत्सतां हर्षदम् ॥५॥

श्रीपौषदशमी - माहात्म्यकथा सम्पूर्णा ॥

: अभ्यास :

१. लोके गङ्गास्नानस्य किम् महत्त्वं ?

२. गङ्गादेव्या सह इन्द्रस्य कस्संवादो भूतवान् ?

३. श्रावकस्य एकविंशतिगुणाः वर्ण्यताम् ?

४. अक्षताः स्वर्णमयाः केन कृताः ?

५. पश्चात् ते अक्षताः स्वर्णमयाः कथं न भूता ?

१. "तं हतविघ्नं दत्तपुत्रकलत्रं स्मरामि" ॥ २. अविलक्षः विलक्षः इव भूता विलक्षीभूता । ( च्वि. ) વિલખી થયેલી ॥ ३. एतम्-आ + इ धातु- २જો ગણહેત્વ કૃ. જવા માટે ॥ ४. अप्रोन्मत्तः प्रोन्मत्तः इव भूतः प्रोन्मत्तीभूतः । ( च्वि. ) પ્રકૃષ્ટ રીતે ઉન્મત્ત થયેલો ॥ ५. प्रत्युथान नपुं.- ઊભા થવું ॥ ६. निर्मातरः निर् + मा- धातु-तृच प्रत्यय (કર્તા અર્થમાં) પ્રથમા બહુ વ. કરનારાઓ ॥ ७. निलय-नपुं- ઘર ॥ ८. जनार्दन - पुं.- કૃષ્ણ ॥ ९. मम पादौ मत्पादौ । तयोः मत्पादयोः । મારા પગમાં. ॥ १०. परदारा स्त्री. પરસ્ત્રી ॥ ११. अभ्यर्ण-वि. પાસે ॥ १२. निखिल-वि. સઘળું ॥ १३. अदभ्र ॥ १४. पराभूति स्त्री. પરાજય ॥ १५. औकस् - पुं. ઘર ॥ १६. पुङ्गव पुं. ઉત્તમ ॥ १७. स्वकीय । श्चासौ उपदेशश्च ( वि. पू. क. ) स्वकीयोपदेशः । जल धरति जलधरः । ( उप. स्वकीयोपदेशः एव जलधरः स्वकीयोपदेशजलधरः । ( अव. ) तस्य धारा स्वकीयोपदेशजलधधारा । ( ष. त. ) तया स्वकीयोपदेश-जलधरधारया । પોતાના ઉપદેશરૂપી મેઘની ધારાવડે ॥ १८. निर्गतः मलातनिर्मलः ( प्रादि ) ।

निर्मलश्चासौ धर्मश्च निर्मलधर्मः । ( वि. पू. क. ) तस्य कर्म-निर्मलधर्म कर्म । ( ष. त. ) निर्मलधर्म कर्मणि निरतिः निर्मलधर्मकर्मनिरतिः । ( सप्त. तत्. ) ॥ १९. शाव्य.- नपुं. કપટ ॥ २०. अन्यवात्सल्यतत्पर परहिततत्पर ॥ २१. न म्लानं अम्लानं । ( निञ्) अम्लानं च तद् पुष्पं च अम्लानपुष्पम् । ( वि. पू. क. ) तेन शोभितं अम्लानपुष्प शोभितम् । ( तृ. त. ) નહિ કરમાયેલા પુષ્પથી શોભતો ॥ २२. चक्कण नपुं. - ચીકણીફલદ્રૂપા ॥ ૨૩. દોહાઈ ગયેલા દૂધવાળી ॥ २४. कानन-नपुं. જંગલ ॥ २५. उद् + खन् १ गण परोक्ष त्रीजो पु. बहु व कर्मणि । ખોદાવી ॥ २६. गर्ता-स्त्री.- ખાડો ॥ २७. भारती-स्त्री- વાણી ॥ २८. त्रिदशः-દેવ ॥ २९. तिरोहित-पुं. - અંતર્ધ્યાન. ३०. समेत्य सम + आ- જઈને સંબં. ભૂ.કૃ. ॥ ३१. कलधौत नपुं. सुवर्ण ॥ ३२. जाम्बुनदेन जटित जाम्बूनदजटितः [तृ. त.] जाम्बूनदजटितश्चासौ स्तम्भाश्च जाम्बुनदजटितस्तम्भाः । [वि. पू. क.]तेषाम् राजयः जाम्बुनदजटितस्तम्भराजयः । तम् तैः विराजितः [ष. त.]जाम्बुनद-जटितस्तम्भराजीविराजितः । [तृ. तत्पु.] जाम्बुनदजडितस्तम्भराजी विराजितं સુવર્ણથી જડેલા થાંભલાઓની શ્રેણિઓથી શોભતા ॥ ३३. आराम-पुं. બગીચો ॥ ३४. क्षीरकण्ठ पुं. દૂધ પીતો. ३५. आमय-पुं. રોગ ॥ ३६. राका स्त्री.- પૂર્ણિમા ॥ ३७. दिवाकर पुं. सूर्य ॥

• • •

: प्रकाशक :

भद्रंकर प्रकाशन

४९/१, महालक्ष्मी सोसायटी, शाहीबाग, अहमदाबाद-३८०००४